destined husband, of whom she is to be allowed the free choice. She is called Kandukavatí, her brother, Bhímadhanwá. Mitragupta beholds the pastime of the princess, which is described with singular minuteness of detail, and they become mutually enamoured, carrying on a communication through Chandrasená, the foster-sister of the princess, who is the object of the young prince's affection, but who is attached to a different person, one Koshadása. Mitragupta forms an intimate friendship with him, and devises schemes for their joint success, when he is seized by order of Bhímadhanwá, and thrown, fettered, into the sea. With the aid of a strong plank he floats until he is picked up by a Yavana vessel, apparently intimating an Arab ship. He has not changed his lot to advantage, and is about to be maltreated, when the vessel is attacked by another ship from the shore. Mitragupta encourages the crew to resist, and, being let loose, animates them to board and capture their assailant, the captain of which proves to be Bhímadhanwá. He is taken on board the Yavana vessel and confined, when a contrary wind rises, and carries the ship out of her course to a distant island, abounding with fruit and fresh water. They anchor, and Mitragupta goes on shore. He meets with a Rákshas, who threatens to kill him unless he answers correctly to the questions, What is that which is naturally cruel? What is the great wish of a householder? What is love? What overcomes difficulties? To which he replies severally, The heart of a woman; A virtuous wife; Determination to possess; Intelligence; and illustrates his replies by four narratives, of each of which a woman is the heroine. These narratives present some curious pictures of manners, and several incidents which are to be found in other compilations, particularly the third story, in which the wife of a merchant is made to appear, in the estimation of her husband and the Panchayat, or Council of the city, a

Dákini, or woman who obtains supernatural powers by an impure intercourse with the spirits of ill, who haunt the ground where the dead are buried. The point of the story is found in the first narrative of the Baitál Pachísí.

The Rákshas is pleased by the stories he hears, and promises Mitragupta his friendship. He is presently called upon to prove it. A brother Rákshas is seen in the sky, carrying off a female, evidently against her will. Mitragupta's friend ascends to the rescue, and the ravisher drops the damsel, who proves to be Kandukavatí. Mitragupta sets sail with her, and arrives at Dámalipta in time to save the lives of the King and Queen and all the chief citizens, who had vowed to starve themselves to death on the banks of the Ganges. He restores the Princess and her brother to their parents, and is gladly accepted by them as their son-in-law. Tungadhanwá is one of the allies of Anga, and Mitragupta has come to Champá in command of his troops.

The adventures of Mantragupta form the subject of the seventh chapter. He arrives at Kalinga, and goes to sleep on the edge of a lake bordered by a thicket contiguous to the burning-ground of the dead. He is wakened by a conversation between two goblins relating to a Siddha, an ascetic, who has acquired magical powers; and, curious to know what it means, follows them privily to where their master is seated, decorated with ornaments of human bones, smeared with ashes, wearing braided hair, and feeding a fire by dropping into it, with his left hand, seeds of mustard and sesamum. At his command the Princess of Kalinga, Karnalekhá, is brought by one of his ministering demons before him. The ascetic seizes her by the hair, and is about to cut off her head, when Mantragupta rushes upon him, and decapitates him with his own sword. He hides the head and hair in the hollow of a tree. The spirits present, wearied of the tyranny

and cruelty of the magician, praise the youth for his courage, and declare themselves his servants. He desires them to convey the Princess to her apartments, but she implores him to accompany her, and they are both carried into the palace, where Mantragupta remains undiscovered.

The King of Kalinga, Karddana, moves in the hot season with his family and suite to the sea-shore, to spend a few days encamped upon the sand. While amusing himself with songs and music and merry-making he is suddenly attacked by the flotilla of the King of Andhra, and, with his wife and daughter, carried prisoner to Andhra, leaving Mantragupta overwhelmed with despair. He hears, after a short time, that Jayasinha, the King of Andhra, wooes Karnalekhá to become his queen. A report, however, prevails that a Yaksha loves the Princess, and that unless he can be put to flight by a powerful sorcerer, the Raja's suit cannot be safely prosecuted. Mantragupta avails himself of the hint, and sets off for Andhra in the character of a magician, dressed in the tangled hair of the Siddha whom he had decapitated, and accompanied by disciples who spread his reputation through the country. The King soon hears of his fame, and applies to him for aid. After some pretended hesitation, he desires the Raja to plunge at midnight into a neighbouring pond, having previously had it dragged to remove all its living creatures, and surrounded it at some little distance by guards to prevent any one's approach. By doing this, and in consequence of the magic rites which he, the pretended sorcerer, has practised, he will issue forth with a person entirely metamorphosed, and such as the Yaksha will be unable to resist. With these instructions the pretended ascetic takes his leave of the Raja, professing that he has tarried longer than was consistent with his religious observances in the same place. He accordingly sends off his followers, but secretes himself in a hollow which

he has previously dug in the bank of the pond. The King conforms to the directions he has received, but, when he is under water, is seized by Mantragupta, and stifled. His body is concealed in the hollow, and his enemy comes forth from the water as representing the Raja. The guards, deeming it impossible that any other person could have issued from the pond, acquiesce quietly in the substitution, and escort Mantragupta to the palace, where he privately communicates the truth to the princess and her parents, and, with their concurrence, marries Karnalekhá according to the ritual. Her father, Karddana, becomes King of both Andhra and Kalinga, and sends his son-in-law to succour his ally the Raja of Anga.

One incident of this story, the transformation of the person, is repeated from the story of Upahâravarmá; but the narrative is peculiar in the locality of the incidents, the sea-coast of Kalinga, and in making Andhra, the ancient Telingana, a maritime power. There is also an allusion to the predominance of heretical opinions, either Buddhist or Jain, in Andhra; as Mantragupta, when Raja, orders the temples of Siva, Yama, Vishnu, and other gods, to be reverenced, to the discomfiture and shame of the infidels or Nástikas.

The last of the narratives is attributed to Viśruta, who, while wandering in the Vindhya forest, meets with the young Prince of Vidarbha, or Berar, and extricates his solitary attendant from a well into which he had fallen while seeking to procure water for the boy, who is exhausted with hunger and thirst. The Prince is of the family of Bhoja: his grandfather, Punyavarmá, is described as a Prince of superior merit; but his father, Anantavarmá, is led by vicious companions into habits of dissipation, which end in the loss of his kingdom and life. The arguments which are urged by one of his favourites in behalf of idle pleasures, and in detraction of grave advisers and ministers, while they speak

the language of the profligate in all ages, afford some curious insight into the abuses of official authority which prevailed in Indian Governments at the time of the composition. There is also, in the account of the feudatories of Anantavarmá, whose disaffection is the cause of his death, an interesting enumeration of the principalities bordering on Berar, to the north and west. Some of them must be identical in topographical situation with the provinces of the Mahratta principality, but the name Mahratta does not occur. It is found in older writings as Mahárāshtra; but the kingdom appears to have been broken up in the middle ages into a number of petty states, among whom the ancient name was forgotten, or it was applied to the people, not to the territory; a circumstance which is equally applicable to modern times, in which we have "the Marhattas," the people of Kandesh, Poona, and the Konkan, not of Mahárāshtra.

After the death of Anantavarmá, his Queen, Vasundhará, with her daughter, Manjuvádiní, and her son, Bháskaravarmá, take refuge with the half-brother of her husband, Mitravarmá, Prince of Máhishmatí. He plots against his nephew's life, and the Rani sends her son into the thickets with one of her attendants. They are suffering greatly from hunger and thirst, when Visruta encounters them, and relieves their necessities. He proves to be a kinsman of the Prince's mother, and engages to replace him in his father's kingdom. He therefore sends her servant back to Vasundhará, to inform her of what has chanced, and desires her to spread a report that the Prince has been devoured by a tiger. He sends her also a poisoned chaplet, with which he directs her to strike Mitravarmá on the heart, exclaiming that it will prove fatal only if she has been a faithful wife; and then, washing the garland, she is to apply it to her daughter's person, when it will prove innocuous. The death of Mitravarmá

is accordingly considered by the people to be the consequence of his guilt, not of any treacherous practice. The principality is taken possession of by Prachañdavarmá, who demands Manjuvádiní in marriage; a demand with which the Queen, by Visruta's advice, feigns to comply. Visruta and his charge, in the disguise of Saiva ascetics, then repair to Vidarbha, where the former attires himself as a juggler, and mixing with a crowd of dancers and posture-masters, by whom Prachañdavarmá is surrounded, exhibits various feats of sleight of hand and activity: among other things, he plays with knives, and tossing one of them in the direction of Prachañdavarmá, it penetrates his breast and kills him. In the confusion Visruta escapes, resumes his garb, and hides himself with the young Prince in an old temple of Durgá, where he contrives the means of entering it unobserved, and concealing himself underneath the pedestal of the image. The Rani, in obedience to a pretended vision, repairs to the temple, attended by all the chief people of Máhishmatí, in whose presence she has the interior examined and the doors closed. After an interval the doors are opened from within, and Visruta and the Prince appear. The former tells the people that he is the minister of the goddess, and is commanded by her to announce to them that she was pleased, in the form of a tigress, to carry off the Prince, in order more effectually to save him from his enemies; but as they are now removed, she restores him to their homage. He is accordingly recognised as Raja; and Visruta marrying Manjuvádiní, he becomes the chief manager of the principality. The last incident may be regarded as evidence of the profane uses to which the divinities of the Hindus were sometimes made subservient. The new Minister proceeds to take measures for recovering Vidarbha, which has been seized by the King of the Aśmakas, and we may conclude

that he is victorious; but the work terminates abruptly, and leaves the *denouement* to the imagination. The deficiency is supplied by Gopinátha, who not only carries on the story of Visruta to the end, but takes the united Princes to Pataliputra, and re-establishes Rajahansa in his kingdom. We might have annexed his supplement, but the narrative is not of great interest, and the only copy of the work available is far from accurate. It has been thought better, therefore, to close with Dańdi's own composition.

In editing the text of the Daśa Kumára Charita various copies belonging to myself and to the Library of the East-India Company have been consulted. I have had but two manuscripts of the Púrva Píthiká, one from each source. In the body of the work I have had the use of five: two, my own, A. and E.; the former including the Commentary transcribed from the copy of a Marhatta Brahman; the other, the text only, from a very good copy procured at Benares. B. C. D. are manuscripts in the Company's Library. The first and best is from the Collection of Colonel Mackenzie, and is accompanied, for the first few pages, by a marginal comment. C. is a MS of the Colebrooke Collection, written A.D. 1789: it is not very correct. D. is the "improved" version of the original, but, as observed above, retaining nearly the whole of the original unaltered. It is one of the MSS bequeathed by Dr. Taylor to the East-India Company, and is valuable as affording a specimen of the copies current in Western India. The copies collated have thus the advantage of being written in different and distant parts of Hindustan, and their general concurrence shews that the Work has not been tampered with, except in the instances which are avowed. The separate copy of the Commentary of Siva Ráma is one of Mr. Colebrooke's MSS.

In revising the text I have taken pains to make it correct,

and I have had, for the most part, the benefit of the revision of Professor Johnson. In those passages which were not seen by him some errors have occurred, but many of them are of obvious correction, arising from confounding similar letters. I have given a list of such typographical mistakes as I have detected. I have added a few notes, chiefly grammatical, in order to assist the student who may not be accustomed to meet with the forms of verbal inflexion for which the text is remarkable. To have made the explanations more frequent or extensive would have been to anticipate the work of translation, which is intentionally left to younger and more enterprising study.

June 18, 1846.

दशकुमारचरिते पूर्व्वपीटिकायां
कुमारोत्पत्तिर्नाम प्रथम उच्छ्वासः

श्री गणेशाय नमः॥ ब्रह्माण्डच्छत्रदण्डः शतधृतिभवनाम्भो-
रुहो नालदण्डः। क्षौणीनौकूपदण्डः क्षरदमरसरित्पट्टिकाकेतु-
दण्डः। ज्योतिश्चक्राक्षदण्डस्त्रिभुवनविजयस्तम्भदण्डोऽङ्घ्रिदण्डः।
श्रेयस्त्रैविक्रमस्ते वितरतु विबुधद्वेषिणां कालदण्डः[1]॥

अस्ति समस्तनगरीनिकषायमाणा[2] शश्वदगण्यपण्यविस्ता-
रितमणि[3]गणादिवस्तुजातव्याख्यातरत्नाकरमाहात्म्या मगधदे
शशेखरीभूता पुष्पपुरी नाम नगरी॥ तत्र वीरभटपटलोत्तरङ्ग-
तुरङ्गकुञ्जरमकरभीषणसकलरिपुगणकटकजलनिधिमथनम-
न्दरायमानसमुद्दण्डभुजदण्डमण्डनः पुरन्दरपुराङ्गणवनविहरण-
परायणतरुणगणिकाजनगीयमानयाऽतिमानया शरदिन्दुकु-

SECTION I.

[1] "May the staff of the foot of him of the three steps (Vishńu) convey you to eternal felicity! that limb which is the stick of the umbrella of the universe, the stalk of the lotus in which Brahmá resides, the mast of the vessel of the earth, the flag-staff of the banner of the ambrosia-shedding river, the pole-staff of the planetary sphere, the column of victory over the three worlds, the death-dealing club to the enemies of the gods." The author apparently alludes to the name of the original writer, Dańdi, by including in his initiatory benediction the word Dańda, "a stick or staff," in a variety of applications.

[2] Participle of a nominal verb, from निकष, "a touch-stone," serving as a test or standard for all cities.

[3] B. reads मणिगणिगणादि; but गणिन्, "having a heap or quantity," seems to be superfluous, except for the alliteration.

न्दघनसारनीहारहारमृणालमरालसुरगजनीरक्षीरगिरिशाट्ट-
हासकैलासकाशनीकाशमूर्त्त्या रचितदिगन्तरालपूर्त्त्या कीर्त्त्या[1]
ऽभितः सुरभितः[2] स्वर्लोकशिखरोरुरुचिररत्नरत्नाकरवेलामेख-
लावलयितधरणीरमणीसौभाग्यभोगभाग्यवान् अनवरत-
यागदक्षिणारक्षितशिष्टविशिष्टविद्यासम्भारभासुरभूसुरनिकरो
विरचितारातिसन्तापेन प्रतापेन सतततुलितवियन्मध्यहंसो
राजहंसो नाम घनदर्पकन्दर्पसौन्दर्य्यसोदर्यहृद्यनिरवद्यरूपो भूपो
बभूव ॥ तस्य वसुमती नाम सुमती लीलावती कुलशेखरमणी
रमणी बभूव ॥ रोषरूक्षेण[3] निटिलाक्षेण[4] भस्मीकृतचेतने मक-
रकेतने तदा [5]भयेनानवद्या वनितेति मत्वा तस्य रोलम्बावली[6]
केशजालं प्रेमाकरो रजनीकरो विजितारविन्दं वदनं जयध्वजा-
यमानो मीनो जायायुतो ऽक्षियुगलं सकलसैनिकाङ्गवीरो
मलयसमीरो निश्वासः पथिकहृद्दलनः करवालः प्रवालश्चा-
धरविम्बं विजयशङ्खो बन्धुरा लावण्यधरा कन्धरा पूर्णकुम्भौ
चक्रवाकानुकारौ पयोधरौ ज्यायमाने[7] मार्द्दवासमाने विसलते
बाहू ईषदुत्फुल्ललीलावतंसकह्लारकोरकी गङ्गावर्त्तसनाभिर्ना-

---

[1] Fame is always compared to objects of a white colour, as the autumnal moon, and the rest enumerated in the compound शरदिन्दु, &c.

[2] This is said to signify here "renowned," ख्यात; and refers, like the preceding epithet भुजदण्डमण्डनः, and the following भोगभाग्यवान्, भूसुरनिकरः and निरवद्यरूप, to king Rájahansa.

[3] रोपणेन क्षणेन, B.

[4] Both copies have निटिलाक्ष; the dictionary, on the authority of the Śabdártha Kalpa Taru, has निटलाक्ष, a name of Siva. There is a radical for टल, but not for टिल.

[5] This is to be connected with अस्त्रभूतानि प्रसूनानि समभूवन्. See below.

[6] The line of bees, the bowstring of Kandarpa.

[7] Being, as it were, two bowstrings, from ज्या, "a bowstring," used as a nominal verb.

भिः दूरीकृतयोगिमनोरथो चैत्ररथो[1]ऽतिघनं जघनं जयस्तम्भभूते सौन्दर्य्यभूते विघ्नितयतिजनारम्भे रम्भे[2] चोरुयुगं आतपत्रसहस्रपत्रं पादद्वयमस्त्रभूतानि प्रसूनानि तानीतराण्यङ्गानि च समभूवन्निव। विजितामरपुरे पुष्पपुरे निवसता साऽनन्तभोगलालिता वसुमती वसुमतीव मगधराजेन यथासुखमन्वभावि[3]॥ तस्य राज्ञः परमविधेया[4] धर्म्मपालपद्मोद्भवसितवर्म्मनामधेया धीरधिषणावधीरितविबुधाचार्य्यविचार्य्यकार्य्यसाहित्याः कुलामात्यास्त्रयोऽभूवन्। तेषां सितवर्म्मणः सुमतिसत्यवर्म्माणौ धर्म्मपालस्य सुमन्त्रसुमित्रकामपालाः पद्मोद्भवस्य सुश्रुतरत्नोद्भवाविति तनयाः समभूवन्॥ तेषु धर्म्मशीलः सत्यवर्म्मा संसारासारतां बुद्ध्वा तीर्थयात्राभिलाषी देशान्तरमगमत्। विटनटवारनारीपरायणो दुर्विनीतः कामपालो जनकाग्रजन्मनोः शासनमतिक्रम्य भुवं बभ्राम। रत्नोद्भवोऽपि वाणिज्यनिपुणतया पारावारतरणमकरोत्। इतरे मन्त्रिसूनवः पुरन्दरपुरातिथिषु पितृषु[5] यथापूर्व्वमन्वतिष्ठन्॥ ततः कदाचिन्नानाविधमहदायुधनैः पुण्यरचितागण्यजन्य[6]राजन्यमौलिपालिनिहितनिशितसायको मगधनायको मालवेश्वरं प्रत्यग्रसंग्रामघस्मरं समुत्कटमानसारं मानसारं प्रति सहेलं न्यक्कृतजल-

---

[1] The garden of Kuvera. B. has रथ only.
[2] The two Rambhás: the nymph Rambhá, and any other Apsaras.
[3] Third pers. sing. indef. præt. passive voice of भू, with अनु prefixed.
[4] Charged with great offices, परमं विधेयं कार्य्यं येषां —ते परमविधेयाः.
[5] Their fathers being dead, or having been received as guests in the city of Indra.
[6] जन्यं here, and in a passage shortly subsequent, means, "war," "battle."

निधिघोषाहङ्कारेण भेरीभाङ्कारेण हठिकाकर्णन[1]नाक्रान्तभयचण्डमानं दिग्दन्तावलवलयं विघूर्णयन् निजभरनमन्मेदिनीभरणायस्तभुजगराजमस्तकबलेन चतुरङ्गबलेन संयुतः सङ्ग्रामाभिलाषेण रोषेण महताविष्टो निर्ययौ ॥ मालवनाथोऽप्यनेकानेकपयूथसनाथो विग्रहः सविग्रह[2] इव साग्रहो[3]ऽभिमुखीभूय भूयो निर्जगाम ॥ तयोरथ रथतुरगखुरक्षुण्णक्षोणीसमुद्भूते करिघटाकटस्रवन्मदधाराधौतमूले नववल्लभवरणागतदिव्यकन्याजनजवनिकापटमण्डल इव वियत्तलव्याकुले धूलीपटले दिविषद्ध्वनि धिक्कृतान्यध्वनिपटहध्वानबधिरिताशेषदिगन्तरालं शस्त्राशस्त्रि हस्ताहस्ति परस्पराभिहतसैन्यजन्यमजनि ॥ मगधराजः प्रक्षीणसकलसैन्यमण्डलं मालवराजं जीवग्राहमभिगृह्य दयालुतया पुनरपि स्वराज्यं प्रतिष्ठापयामास। ततः स रत्नाकरमेखलामनन्यशासनां शासन्ननपत्यतया नारायणं सकललोककारणम् निरन्तरमर्चयामास ॥ अथ कदाचित् तदग्रमहिषी देवी देवेन कल्पवल्लीफलमाधेहीति प्रभातसमये सुस्वप्नमबलालोकितवती सा तदा दयितमनोरथपुष्पभूतं गर्भमधत्त। राजा सम्पत्प्रकृताखण्डलः[4] सुहृन्नृपमण्डलं समाहूय निजसम्पन्मनोरथानुरूपं देव्याः सीमन्तोत्सवं

---

[1] हठिकाकर्णन is explained in a marginal note of A. to signify that noise which is heard unwillingly; शुश्रूषामन्तरा यदाकर्णनं सा हठिकाकर्णनं, "a loud clashing or clamour," महान् नादसमुदायसङ्घातः.

[2] "Like war embodied," सविग्रहः, सशरीरः.

[3] "With promptitude or courage," स, आग्रहः.

[4] This reading is doubtful. A. has सम्पन्त्यहृताखण्डलः, B. सम्पत्यकृताखण्डलः, both evidently faulty. Apparently it means, "being equal to Indra आखण्डलः in his fortune."

व्यधत्त ॥ एकदा हितैः सुहृन्मन्त्रपुरोहितैः सभायां सिंहासनासीनो गुणैरहीनो ललाटतटन्यस्ताञ्जलिना द्वारपालेन व्यज्ञापि[1] देव देवसंदर्शनलालसमानसः कोऽपि देवेन विरच्यार्चनार्हो यतिर्द्वारदेशमध्यास्त[2] इति । तदनुज्ञातेन तेन स संयमी नृपसमीपमनायि । भूपतिरायान्तं तं विलोक्य सम्यग्ज्ञाततदीयगूढचारभावो निखिलमनुचरनिकरं विसृज्य मन्त्रिजनसमेतः प्रणतमेनं मन्दहासमभाषत । ननु तापस देशं सापदेशं भ्रमन् भवांस्तत्र तत्रभवदभिज्ञातं कथयत्विति । तेनाभाषि भूभ्रमणवलिना प्राञ्जलिना देव शिरसि देवस्याज्ञामादायैनं निर्दोषं वेशं स्वीकृत्य मालवेन्द्रनगरं प्रविश्य तत्रगूढतरं वर्त्तमानस्तस्य राज्ञः समस्तमुदन्तजातं विदित्वा प्रत्यागमं । मानी मानसारः स्वसैनिकायुष्मत्त्वान्तराये[3] सम्पराये भवतः पराभवमनुभूय वैलक्ष्यलक्ष्यहृदयो वीतदयो महा[4]कालनिवासिनं कालीविलासिनमनश्वरं महेश्वरं समाराध्य तपःप्रभावसन्तुष्टादस्मादेकवीरातिघ्नीं भयदां गदां लब्ध्वात्मानमप्रतिभटं मन्यमानो महाभिमानो भवन्तमभियोद्धुमुद्युक्तः । ततः परं देव एव प्रमाणमिति । तदालोच्य

[1] Third pers. sing. indef. præter. of the passive of the causal verb of ज्ञा, "to know," ज्ञप, "to inform," with वि prefixed, to represent, "he was respectfully apprized."

[2] Third pers. sing. 1st præter. atm. pada of आस, "to sit," verb of the 2d conj. with अधि prefixed, "to sit at or upon.

[3] A. has स्वसैनिकायुष्मत्तान्तराये, and B. apparently the same, although indistinct; but आयुष्मत्त is a form that can scarcely be admitted in such a place. It has been conjecturally changed to the abstract noun.

[4] Mahákála is the form of Śiva, worshipped before the Mohammedan conquest at Ougein.

निश्चितकृत्यैरमात्यै राजा विज्ञापितोऽभूत्। देव निरुपायेन
दैवसहायेन योद्धुमरातिरायाति तस्मादस्माकं युद्धं साम्प्रतम[1]-
साम्प्रतं सहसा दुर्गसंश्रयः क्रियतामिति। तैर्बहुधा विज्ञापितो
ऽप्यखर्वेण गर्वेण विराजमानो राजा तद्वाक्यमकृत्यमित्यनादृत्य
प्रतियोद्धुमना बभूव। शिति[2]कण्ठदत्तशक्तिसारो मानसारो
योद्धुं[3]मनसामग्रीभूय सामग्रीसमेतो ऽक्लेशं मगधदेशं प्रविवेश।
तदा तदाकर्ण्य मन्त्रिणो भूमहेन्द्रं मगधेन्द्रं कथञ्चिदनुनीय
रिपुभिरसाध्ये विन्ध्याटवीमध्येऽवरोधान्मूलबलरक्षितान् नि-
वेशयामासुः। राजहंसस्तु प्रशस्तवीतदैन्यसैन्यसमेतस्तीव्रगत्या
निर्गत्याधिकरुषं द्विषं रुरोध। परस्परबद्धवैरयोरेतयोः शूरयो-
स्तदालोकनकुतूहलागतगगनचराश्चर्य्यकारणे रणे वर्त्तमाने
जयाकांक्षी मालवदेशरक्षी विविधायुधस्थैर्य्यचर्य्याञ्चितसम-
रतुलितामरेश्व[4]रस्य मगधेश्वरस्य तस्योपरि त्रिपुरारातिदत्तां
गदां प्राहि[5]णोत्। निशितशरनिकरशकलीकृताऽपि सा पशु-
पतिशासनस्याबन्ध्यतया सूतं निहत्य रथस्थं राजानं मूर्च्छित-
मकार्षीत्। ततो वीतप्रग्रहा अक्षतविग्रहा वाहा रथमादाय
दैवगत्यांतःपुरशरण्यं महारण्यं प्राविशन्। मालवनाथो
जयलक्ष्मीसनाथो मगधराज्यं प्राज्यं समाक्रम्य पुष्पपुरमध्य-
तिष्ठत्। तत्र हेतिततिहतिश्रान्ता अमात्या दैवगत्याऽप्रत्युत्क्रा-

---

[1] War is now **साम्प्रतं** unfit or inexpedient **असाम्प्रतं**.

[2] The black-throated; Śiva.

[3] Becoming the first (or most ardent) of those whose minds were resolved to fight.

[4] Equal to the king of the immortals in battle, marked by steady skill in the use of various weapons.

[5] Third pers. sing. 1st preter. of **हि**, "to send," verb 5th conj. with **प्र** prefixed.

न्तजीविता निशान्तवातलब्धसञ्ज्ञाः कथञ्चिदाश्वस्य राजानं समन्तादन्वीक्ष्यानवलोकितवन्तो दैन्यवन्तो देवीमवापुः ॥ वसुमती तु तेभ्यो निखिलसैन्यक्षतिं राज्ञोऽदृश्यत्वं चाकर्ण्योद्विग्ना शोकसागरमग्ना रमणानुगमने मतिं व्यधत्त। कल्याणि भूरमणमरणमनिश्चितं किञ्च दैवज्ञकथितं मथितोद्धतारातिः सार्व्वभौमाभिरामो भविता सुकुमारः कुमारस्त्वदुदरे वसति तस्मादद्य तव मरणमनुचितमिति भूषितभाषितैरमात्यपुरोहितैरनुनीयमानया तया क्षणं क्षणहीनया तूष्णीमस्थायि। अथार्द्धरात्रे निद्रानिलीढनेत्रे परिजने विजने शोकपारावारमपारमुत्तर्त्तुमशक्नुवती सेनानिवेशदेशं निःशब्दलेशं शनैरतिक्रम्य यस्मिन् रथस्य संसक्ततया तदानयनपलायनश्रान्ता गन्तुमक्षमा क्ष्मापतिरथ्याः पथ्याकुलाः पूर्व्वमतिष्ठन् तस्य निकटवटतरोः शाखायां मृतिरेखायामिव[1] क्वचिदुत्तरीयार्द्धेन बन्धनं मृतिसाधनं विरच्य मर्त्तुकामा वाङ्माधुरी विरसीकृतकलकण्ठा साश्रुकण्ठा व्यलपत्। लावण्योपमितपुष्पसायक[2] भूनायक भवानेको भाविन्यपि जन्मनि वल्लभा भवत्विति। तदाकर्ण्य नीहारकर[3]किरणनिकरसम्पर्कलब्धावबोधो मागधोऽगाधरुधिरचिरक्षरणनष्टचेष्टो देवीवाक्यमिव निश्चिन्वानस्तन्वानः[4] प्रियवचनानि शनैस्तामाह्वयत्। सा ससम्भ्रममा-

---

[1] मृतिरेखा a row or mark of death.

[2] पुष्पसायक Cupid: having flower-shafts पुष्पनिर्म्मिताः शराः.

[3] नीहारकर the cold-rayed, the moon.

[4] Part. pres. atm. pada of तन, "to spread;" here meaning, "to repeat or utter," verb, 8th conj. uttering kind words तन्वानःप्रियवचनानि.

गत्यामन्दहृदयानन्दसंफुल्लवदनारविन्दा तमुपोषिताभ्या[1]मि-
वानिमिषिताभ्यां लोचनाभ्यां सम्प्राप्य विकस्व[2]रेण स्वरेण
पुरोहितामात्यजनमुच्चैराहूय तेभ्यस्तमदर्शयत्। राजा निटिल-
तटे चुम्बितनिजचरणाम्बुजैः प्रशंसितदैवमहात्म्यैरमात्यैरभा[3]णि।
देव रथ्य[4]चयः सारथ्यपगमे रथं रभसादरण्यमनयदिति[5]। तत्र
निहतसैनिकग्रामे सङ्ग्रामे मालवपतिनाराधितपुरारातिना
प्रहितया गदया दयाहीनेन ताडितो मूर्च्छामागत्यात्र नि-
शान्तपवनेन बोधितोऽभवमिति महीपतिरकथयत्। ततो
विरचितवहेन मन्त्रिनिवहेन विरचितदैवानुकूल्येन कालेन
शिबिरमानीयापनीताशेषशल्यो विकसितनिजाननारविन्दो
राजा सहसा विरोपितव्रणोऽकारि। विरोधिदैवधिक्कृतपुरुष-
कारो दैन्यव्याप्ताकारो मगधाधिपतिरधिकाधिरमात्यसम्मत्या
मृदुभाषितया तया वसुमत्या मत्या च कलितया समबोधि[6]।
देव सकलस्य भूपालकुलस्य मध्ये तेजो वा वरिष्ठो गरिष्ठो
भवानद्य वनमध्यं निवसतीति। जलबुद्बुदसमाना विराजमा-
ना सम्पत् तडिल्लतेव सहसैवोदयति नश्यति च। तन्निखिलं
दैवायत्तमेवावधार्य्य कार्य्यं। किञ्च पुरा हरि[7]श्चन्द्ररामचन्द्रमुख्या

---

[1] With eyes intent, or eager; literally, as it were, "fasting or hungry."

[2] Commonly "expanding," as a flower; here, "bursting forth," "loud screaming."

[3] "Was addressed," 3d pers. sing. indef. preter. passive verb, from भण, "to speak."

[4] A pair or a team of horses, the horses collectively, from रथ्य, "a carriage horse," and चय, "an assemblage."

[5] This closes the remark or inquiry of the ministers: the following is the Rajá's reply.

[6] Was instructed (indef. pret. of the causal of बुध "to know") by Vasumatí, and by acquired or improved knowledge.

[7] Harischandra was a prince of the solar dynasty, who, after being elevated to heaven for his merit, was ejected from it for his self-esteem.

महीन्द्रा ऐश्वर्य्योपमितमहेन्द्रा दैवतन्त्रं दुःखयन्त्रं सम्यगनुभूय पश्चादनेककालं निजराज्यमकुर्व्वन्। तद्वदेव भवान् भविष्यति कञ्चनकालं विरचितदैवसमाधिर्गलिताधिस्तिष्ठतु तावदिति। ततः सकलसैन्यसमन्वितो राजहंसस्तपोविभ्राजमानं वामदेवनामानं तपोधनं निजाभिलाषावाप्तिसाधनं जगाम। तं प्रणम्य तेन कृतातिथ्यस्तस्मै कथितकथ्यस्तदाश्रमे दूरीकृतश्रमे कञ्चन कालमुषित्वा निजराज्याभिलाषी मितभाषी सोमकुलावतंसो राजहंसो मुनिमभाषत। भगवन् मानसारः प्रबलेन दैवबलेन मां निर्जित्य मद्भोज्यं राज्यमनुभवति। तदहमप्युग्रं तपो विरच्य तमरातिमुन्मूलयिष्यामि लोकशरण्येन भवत्कारुण्येनेति नियमवन्तं भवन्तं प्राप्नवमिति। ततस्त्रिकालज्ञस्तपोधनो राजानमवोचत्। सखे शरीरकार्श्यकारिणा तपसाऽलं। वसुमतीगर्भस्थः सकलरिपुकुलमर्द्दनो राजनन्दनो नूनं सम्भविष्यति। कञ्चन कालं तूष्णीमास्स्वेति। गगनचारिण्याऽपि वाण्या सत्यमेतदिति तदैवावोचि। स राजाऽपि मुनिवाक्यमङ्गीकृत्यातिष्ठत्। ततः सम्पूर्णगर्भदिवसा वसुमती सुमुहूर्त्ते सकललक्षणलक्षितं सुतमसूत। ब्रह्मवर्च्चसेन तुलितवेधसं पुरोधसं पुरस्कृत्य कृत्यविन्महीपतिः कुमारं सुकुमारं जातसंस्कारेण बालालङ्कारेण च विराजमानं राजवाहनं नामानं व्यधत्त। तस्मिन्नेव काले सुमतिसुमन्त्रसुमित्रसुश्रुतानां मन्त्रिणां प्रमतिमित्रगुप्तमन्त्रगुप्तविश्रुताख्या महदभिख्याः सूनवो नवोद्यदिन्दुरुचयश्चिरायुषः समाजायन्त। राजवाहनो मन्त्रिपुत्रैरात्ममित्रैः सह बालकेलीरनुभवन्नवर्द्धत॥

अथ कदाचिदेकेन तापसेन रसेन राजलक्षणविराजितं कंचिन्नयनानन्दकरं सुकुमारं कुमारं राज्ञे समर्प्यावोचि[1]। भूवल्लभ कुशशमिधानयनाय वनगतेन मया काचिदशरण्या व्यक्तकार्पण्याऽश्रु मुञ्चती युवती विलोकिता। निर्ज्जने वने किं निमित्तं रुद्यते त्वयेति पृष्टा सा कररुहैरश्रूणि प्रमृज्य सगद्गदं मामवोचत्। मुने लावण्यजितपुष्पसायके मिथिलानायके कीर्त्तिव्यापृतसुधर्म्मिणि निजसुहृदो मगधराजस्य सीमन्तिनी-सीमन्तमहोत्सवाय पुत्रदारसमन्विते पुष्पपुरमुपेत्य कञ्चन कालमधिवसति समाराधितगिरीशो मालवाधीशो मगधराजं योद्धुमभ्यगात्। तत्र प्रख्यातयोरेतयोरसंख्ये संख्ये वर्त्तमाने सुहृत्साहाय्यकं कुर्व्वाणो निजबलेऽसति विधेये विदेहेश्वरो प्रहारवर्म्मा जयवता रिपुनाभिगृह्य कारुण्येन पुण्येन विसृष्टो हतावशेषेन शून्येन सैन्येन सह स्वपुरगमनमकरोत्। ततो वनमार्गेण दुर्गेण गच्छन्नधिकबलेन शवरबलेन रभसादभि-हन्यमानो मूलबलाभिरक्षितावरोधः पलायिष्ट[2]॥ तदीयार्भक-योर्यमलयोर्धात्रीभावेन परिकल्पिताहं मद्दुहिताऽपि तीव्र-गतिं भूपतिमनुगन्तुमक्षमे अभूव[3]। तत्र विवृत्तवदनः कोऽपि रूपी कोप इव व्याघ्रो मामाघ्रातुमागतवान् भीताऽहमुदग्र-पाणिः स्खलन्ती पर्य्यपतम्। मदीयपाणिभ्रष्टो बालकः कस्य

---

[1] Third pers. sing. ind. pret. passive verb, from वच. The radical vowel follows the same change as in the active verb, being changed to उ, convertible to the Guna ओ.

[2] Third pers. sing. indef. pret. of अय, with परा prefixed, and the र changed to ल. That पल is considered as the preposition, not the verb, is evident from the augment not being prefixed, the reading of both MSS. being पलायिष्ट.

[3] First pers. dual. indef. pret. of भू.

कपिला[1]शावस्य क्रोडमभ्यलीय[2]त तच्छवाकर्षिणोऽमर्षिणो व्याघ्रस्य प्राणान् वाणो वाणासनयन्त्रामुक्तोऽपाहरत्। विलोलालको बालकोऽपि शवरैरादाय कुत्रचिदुपानीयत। कुमारमपरमुद्वहन्ती मद्दुहिता कुत्र गता न जाने साहं मोहं गता केनापि दयालुना गोपालेन स्वकुटीरमावेश्य विरोपितव्रणाभवं। ततः स्वस्थीभूय भूयः क्ष्माभर्त्तुरन्तिकमुपतिष्ठासुरसाहाय्यतया दुहितुरनभिज्ञाततया च व्याकुली भवामीत्यभिदधाना एकाकिन्यपि स्वामिनं गमिष्यामीति सा तदैव निरगात्। अहमपि भवन्मित्रस्य विदेहनाथस्य विपन्निमित्तं विषादमनुभवन् तदान्वयाङ्कुरं कुमारमन्विष्यन् तदैकं चण्डिकामन्दिरं सुन्दरं प्रा[3]गाम्। तत्र सन्ततमेवंविधविजयसिद्धये कुमारं देवतोपहारं करिष्यन्तः किराताः महीरुहशाखावलम्बितमेनमसिलतया वा सैकततले खननिक्षिप्तचरणं लक्षीकृत्य शितशरनिकरेण वानेकचरणैः पलायमानं कुक्कुरबालकैर्वा दंदशयि[4]त्वा संहनिष्याम इति भाषमाणा मया समभ्यभाष्यन्त। ननु किरातास्तमोघोरप्रचारे कान्तारे स्खलितपथः स्थविरभूसुरोऽहं मम पुत्रकं क्वचिच्छायायां निक्षिप्य मार्गान्वेषणाय किञ्चिदन्तरमगच्छम्। स कुत्र गतः केन वा गृहीतः परीक्ष्यापि न वीक्ष्यते। तन्मुखालोकनेन विना नैकान्यहान्यतीतानि किं करोमि क्व

[1] The carcase of a cow.

[2] "Fell into or alighted on," "came in contact with"; from ली verb, 4th conj. with अभि prefixed, 3d pers. sing. 1st pret. atmane-pada.

[3] प्र before गा, from the indef. pret. of इण, "to go."

[4] Causal of the intensive form of दंश, "to bite," dropping the nasal in the radical syllable, and retaining it in the reduplicate; indeclin. past part.

यामि भवद्भिर्न किमदर्शीति । द्विजोत्तमः कश्चिदत्र तिष्ठति किमेष तव नन्दनः सत्यमेतदेनं गृहाणेत्युक्त्वा दैवानुकूल्येन मह्यं तं व्यतरत् । तेभ्यो दत्ताशीरहं बालकमङ्गीकृत्य शिशिरोदकादिनोपचारेणाश्वास्य निःशङ्कं भवदङ्कमानीतवानस्मि । एनमायुष्मन्तं पितृरूपो भवानभिरक्षतात्[1] इति । राजा सुहृदापन्निमित्तं शोकं तन्नन्दनविलोकनसुखेन किञ्चिदधरीकृत्य[2] तमुपहारवर्म्मनाम्नाहूय राजवाहनमिव पुपोष । जनपतिरेकस्मिन्दिवसे तीर्थस्नानाय पुक्कश[3]निकटमार्गेण गच्छन्नबलया कयाचिदुपलालितमनुपमशरीरं कुमारं कञ्चिदवलोक्य कुतूहाकुलस्तामपृच्छत् । भामिनि रुचिरमूर्त्तिः सराजगुणसम्पूर्त्तिरासावर्भको भवदन्वयसम्भवो न भवति कस्य नयनानन्दो निमित्तेन केन भवदधीनो जातः कथ्यतां याथातथ्येन त्वयेति । प्रणतया शवर्य्या सलीलमलापि । राजन्नात्मपल्लीसमीपे पदव्यां वर्त्तमानस्य मिथिलेश्वरस्य सर्व्वस्वमपहरति शवरसैन्ये मद्दयितेनापहृत्य कुमार एष मह्यमर्पितो व्यवर्द्धत । तदवधार्यकार्य्यज्ञो राजा मुनिकथितं द्वितीयराजकुमारमेव निश्चित्य सामदानाभ्यां तामनुनीयापहारवर्म्मेत्याख्याय देव्यै वर्द्धयेति समर्पितवान् ॥

कदाचिद्वामदेवशिष्यः सोमशर्म्मनामा कञ्चिदेकबालकं

---

[1] The benedictive imperative, formed with तात्.

[2] "Having suppressed." अधर, "down," "inferior," with ई inserted before कृत्य, "having made."

[3] A. has पुष्काण, B. पक्कण, words not elsewhere met with. It appears from the story that the woman is a Śavarí, "a forester or one of low caste," and the term may be therefore पुक्कश "a Chaṅḍála."

राज्ञः पुरो निक्षिप्याभाषत। देव रामतीर्थे स्नात्वा प्रत्यागच्छता मया काननावनौ वनितया कयापि धार्य्यमाणमेनमुज्ज्वलाकारं कुमारं विलोक्य सादरमभाणि[1] स्थविरे का त्वमेतस्मिन्नटवीमध्ये बालकमुद्वहन्ती किमर्थमायासेन भ्रमसीति। वृद्धयाऽप्यभाषि[2]। मुनिवर कालयवननाम्नि द्वीपे कालगुप्तो नाम धनाढ्यो वैश्यवरः कश्चिदस्ति तन्नन्दिनीं नयनानन्दकारिणीं सुवृत्तां नामैतस्मादागतो मगधनाथमन्त्रिसम्भवो रत्नोद्भवो नाम रमणीयगुणालयो भ्रान्तभूवलयो मनोहारी व्यवहारी उपयम्य सुवस्तुसम्पदा श्वशुरेण सम्मानितोऽभूत्। कालक्रमेण नताङ्गी गर्भिणी जाता। ततः सोदरविलोकनकुतूहलेन रत्नोद्भवः कथञ्चिच्छ्वशुरमनुनीय चपललोचनया सह प्रवहणमारुह्य पुष्पपुरमभिप्रतस्थे। कल्लोलमालिकाभिहतः पोतः सामुद्राम्भस्यमज्जत्। गर्भभरालसां तां ललनां धात्रीभावेन कल्पिताऽहं कराभ्यामुद्वहन्ती फलकमेकमधिरुह्य दैवगत्या तीरभूमिमगमं। सुहृज्जनपरिवृत्तो रत्नोद्भवस्तत्र निमग्नो वा केनोपायेन तीरमगमद्वा न जानामि। क्लेशस्य परां काष्ठामधिगता सुवृत्ताऽस्मिन्नटवीमध्ये सुतमसूत। प्रसववेदनया विचेतना सा प्रच्छायशीतले तरुतले निवसति। विजने वने स्थातुमशक्यतया जनपदगामिनं मार्गमन्वेष्टुमुद्युक्तया मया विवशायास्तस्याः समीपे बालकं निक्षिप्य गन्तुमनुचितमिति कुमारोऽप्यनायीति। एतस्मिन्नेव क्षणे वन्यो वारणः

---

[1], [2]. Third pers. indef. pret. passive verb, used impersonally, "it was said."

कश्चिददृश्यत। तं विलोक्य भीता सा बालकं निपात्य प्राद्रवत्। अहं समीपलतागुल्मे प्रविश्य परीक्ष्यमाणोऽतिष्ठम्। निपतितं बालकं पल्लवकवलमिवाददति गजपतौ कण्ठीरवो महाग्रहेण न्यपतत्। भयाकुलेन दन्तावलेन झटिति वियति पात्यमानो बालको न्यपतत्। चिरायुष्मतयासन्नोन्नततरुशाखासमासीनेन वानरेण केनचित् पक्वफलमनीषया परिगृह्य फलेतरतया विततस्कन्धमूले निक्षिप्तोऽभूत्। सोऽपि मर्कटः क्वचिदगात्। बालकेन सत्वसम्पन्नतया सकलक्लेशसहेनाभावि। केसरिणा करिणं निहत्य कुत्रचिदगामि। लतागृहान्निर्गतोऽहमपि तेजःपुञ्जं बालकं शनैरवनिरुहादवतार्य्य वनान्तरे वनितामन्विष्याविलोक्यैनमानीय गुरवे निवेद्य तन्निर्देशेन भवन्निकटमानीतवानस्मीति। सर्व्वेषां सुहृदामेकदैवानुकूलदैवाभावेन महदाश्चर्य्यं बिभ्राणो राजा रत्नोद्भवः कथमभवदिति चिन्तयन् पुष्पोद्भवनामधेयं विधाय तद्वृत्तं व्याख्याय सुश्रुताय विषादसन्तोषावनुभवन् तदनुजतनयं समर्पितवान्॥

अन्येद्युः कञ्चन बालकमुरसि दधती वसुमती वल्लभमभिगता तेन कुतोऽसाविति पृष्टा समभाषत। राजन्नतीतायां रात्रौ काचन दिव्यवनिता मत्पुरतः कुमारकमेकं संस्थाप्य निद्रामुद्रितां मां विबोध्य विनीताऽब्रवीत्। देवि त्वन्मन्त्रिणो धर्म्मपालनन्दनस्य कामपालस्य वल्लभा यक्षकान्ताऽहं तारावली नाम नन्दिनी माणिभद्रस्य यक्षेश्वरानुमत्या मदात्मजमेनं भवत्तनुजस्याम्भोनिधिवलयवेष्टितक्षोणीमण्डलेश्वरस्य भाविनो विशुद्धयशोनिधेः राजवाहनस्य परिचर्याकरणायानी-

वत्यस्मि। त्वमेनं मनोजसन्निभमभिवर्द्धयेति। विस्मयविकसितनयनया मया सविनयं सत्कृता स्वक्षी यक्षी सा ऽदृश्यामयासीदिति। कामपालस्य यक्षकन्या सङ्गमे विस्मयमानमानसो राजहंसो रञ्जितमित्रं सुमित्रमाहूय तदीयभ्रातृपुत्रमर्थपालं विधाय तस्मै सर्व्ववार्त्तादिकं व्याख्यायादात्[1]।

ततः परस्मिन्दिवसे वामदेवान्तेवासी तदाश्रमवासी समाराधितदेवकीर्त्तिं निर्भर्त्सितमारमूर्त्तिं कुसुमसुकुमारं कुमारमेकमवगमय्य नरपतिमवादीत्। देव तीर्थयात्राप्रसङ्गेन कावेरीतीरमागतो ऽहं विलोलालकं बालकं निजोत्सङ्गतले निधाय रुदन्तीं स्थविरामेकां विलोक्यावोचिषं[2]। स्थविरे का त्वमयमर्भकः कस्य नयनानन्दकरः कान्तारं किमर्थमागता शोककारणं किमिति। सा करयुगेन वाष्पजलमुत्सृज्य निजशोकशङ्कूत्पाटनक्षममिव मामवलोक्य शोकहेतुमवोचत्। द्विजात्मज राजहंसमन्त्रिणः शितवर्म्मणः कनीयानात्मजः सत्यवर्म्मा तीर्थयात्राभिलाषेण देशमेनमागच्छत्। स कस्मिंश्चिदग्रहारे कालीं नामैकस्य भूसुरस्य नन्दिनीं विवाह्य तस्या अनपत्यतया गौरीं नाम तद्भगिनीं काञ्चनकान्तिं परिणीय तस्यामेकं तनयमलभत्। काली सासूयमेकदा धात्र्या मया सह बालमेनमेकेन मिषेणानीय तटिन्यामेतस्यामक्षिपत्। करेणैकेन बालकमुद्धृत्यापरेण प्लवमाना नदीवेगागतस्य कस्य-

---

[1] व्याख्याय "having explained"; अदात् "gave."

[2] First pers. sing. indef. pret.; but this is not the usual form, as वच takes the terminations of the first pret. in the third, Gr. p. 205; here it takes its own, with इ inserted. In the next sentence occurs the regular form अवोचत्.

चित्तरोः शाखामवलंब्य तत्र शिशुं निधाय नदीवेगेनोह्यमाना केनचित्तरुलग्नेन कालभोगिना ऽहमदंशि । मदवलंबीभूतो भूरुहोऽयमस्मिन्देशे तीरमगमत् । गरलस्योद्दीपनतया मयि मृतायामरण्ये कश्चन शरण्यो नास्तीति मयाऽशोच्यत इति। ततो विषमविषज्वालावलीढावयवा सा धरणीतले न्यपतत्। दयाविष्टोऽहं मन्त्रबलेन विषव्यवस्थामपनेतुमक्षमः समीपकुञ्जेष्वौषधविशेषमन्विष्य प्रत्यागतो व्युत्क्रान्तजीवितां तां व्यलोकयम् । तदनु तस्याः पावकसंस्कारं विरच्य शोकाकुलचेताः बालमेनमगतिमादाय सत्यवर्म्मवृत्तान्तश्रवणवेलायां तन्निवासाग्रहारनामधेयस्याश्रुततया तदन्वेषणमशक्यमित्यालोच्य भवदमात्यतनयस्य भवानेव रक्षितेति भवन्तमेनमनयमिति तन्निशम्य सत्यवर्म्मस्थितेः सम्यगनिश्चिततया खिन्नमानसो नरपतिः सुमतये मन्त्रिणे सोमदत्तं नाम तदनुजतनयमर्पितवान् । सोऽपि सोदरमागतमिव मन्यमानो विशेषेण पुपोष ॥

एवं मिलितेन कुमारमण्डलेन बालकेलीरनुभवन्नधिरूढानेकवाहनो राजवाहनोऽनुक्रमेण चौडोपनयनादिसंस्कारजातमलभत्। ततः सकललिपिज्ञानं निखिलदेशीयभाषापाण्डित्यं षडङ्गसहितवेदसमुदायकोविदत्वं काव्यनाटकाख्यानकाख्यायिकेतिहासचित्रकथासहितपुराणगणनैपुण्यं धर्म्मशब्दज्योतिस्तर्कमीमांसादिसमस्तशास्त्रचातुर्य्यं कामन्दकीयादिनीतिपटलकौशलं वीणाद्यशेषवाद्यदाक्ष्यं सङ्गीतसाहित्यहारित्यं मणिमन्त्रौषधादिमायाप्रपञ्चचाटवं मातङ्गतुरङ्गादिवाह-

नारोहणपाटवं विविधायुधप्रयोगचरणत्वं चौर्य्यदुरोदरादि-कपटकलाप्रौढत्वञ्च तत्तदाचार्य्येभ्यः सम्यग् लब्ध्वा यौवनेन विलसन्तं कृत्येष्वनलसं कुमारनिकरं निरीक्ष्य महीवल्लभः सोऽहं शत्रुजनदुर्लभ इति परमानन्दमविन्दत ॥

द्विजोपकृतिर्नाम द्वितीय उच्छ्वासः

अथैकदा वामदेवः सकलकलाकुशलेन कुसुमसायकसंश-मितसौन्दर्य्येण कल्पितसौदर्य्येण साहसापहसितकुमारेण सुकु-मारेण जयध्वजातपवारणकलशाङ्कितकरेण कुमारनिकरेण परिवेष्टितं राजानमानतशिरसं समभिगम्य तेन तां कृतां परिचर्य्यामङ्गीकृत्य निजचरणकमलयुगलमिलन्मधुकरायमा[1]-नकाकपक्षं विदलिष्यमाण[2]विपक्षं कुमारचयं गाढमालिङ्ग्य मितसत्यवाक्येन विहिताशीरभ्यभाषत । भूवल्लभ भवदीयं मनोरथफलमिव समृद्धलावण्यं तारुण्यं नुतमित्रो[3] भवत्पुत्रो ऽनुभवति । सहचरसमेतस्य नूनमेतस्य दिग्विजयारम्भसमय एषः तदस्य सकलक्लेशसहस्य राजवाहनस्य दिग्विजयप्रमाणं

SECTION II.

[1] "The hair on whose temples became the bees that alighted on the two lotuses of his feet:" मधुकर "a bee," being used as a nominal verb.

[2] "By whom their foes will be rent in pieces"; from दल, "to tear," with वि pre-fixed, part. fut. atm. pada.

[3] This is rather a singular compound, meaning, "one who has praised or worthy friends."

क्रियतामिति। कुमारा माराभिरामा रामाद्यपौरुषा रुषा भस्मीकृतारयो रयापहसितसमीरणा रणाभियानेन यानेन तेनाभ्युदयाशंसं राजानमकार्षुः । तत् साचिव्यमितरेषां विधाय समुचितां बुद्धिमुपदिश्य शुभे मुहूर्त्ते सपरिवारं कुमारं विससर्ज । राजवाहनो मङ्गलसूचकं शुभशकुनं विलोकयन् देशं कञ्चिदतिक्रम्य विन्ध्याटवीमध्यमविशत् तत्र हेतिहतिकिणाङ्कं कालायसकर्कशकायं यज्ञोपवीतेनानुमेयविप्रभावं व्यक्तकिरातप्रभावं लोचनपरुषं कमपि पुरुषं ददर्श । तेन विहितपूजनो राजवाहनोऽभ्यभाषत । ननु मानव जनसङ्गरहिते मृगहिते घोरप्रचारे कान्तारे विन्ध्याटवीमध्ये भवानेकाकी किमिति निवसति । भवदंसोपनीतं यज्ञोपवीतं भूसुरभावं द्योतयति हेतिहतिभिः किरातरीतिरनुमीयते कथय किमेतदिति । तेजोमयोऽयं मानुषमात्रपौरुषो नूनं भवतीति मत्वा स पुरुषस्तद्वयस्यमुखान्नामजनने विज्ञाय तस्मै निजवृत्तान्तमकथयत् । राजनन्दन केचिदस्यामटव्यां वेदादिविद्याभ्यासमपहाय निजकुलाचारं दूरीकृत्य सत्यशौचादि धर्म्मव्रतं परित्यज्य किल्बिषमन्विष्यन्तः पुलिन्दपुरोगमास्तदन्नमुपभुञ्जाना बहवो ब्राह्मणब्रुवा निवसन्ति । तेषु कस्यचित् पुत्रो निन्दापात्रचारित्रो मातङ्गो नामाहं । स च किरातजालेन जनपदं प्रविश्य ग्रामेषु धनिनः स्त्रीबालसहितानानीय

---

[1] This passage is not without difficulty, but it may, perhaps, be rendered, "the princes beautiful as Cupid, but having the valour of those of whom Ráma is the first, reducing by their wrath their foes to ashes, and deriding the winds in speed, have made the king expectant of glory by a career tending to battle."

बन्धने निधाय तेषां सकलधनमपहरन्नुद्धृत्य वीतदयो व्यचरम्। कदाचिदेकस्मिन् कान्तारे मदीयसहचरगणेन जिघांस्यमानं[1] भूसुरमेकमवलोक्य दयायत्तचित्तोऽवोचं ननु पापा नहन्तव्यो ब्राह्मण इति। ते रोषारुणनयना मां बहुधा निरभर्त्सयन्। तेषां भाषणपारुष्यमसहिष्णुरहमवनिसुररक्षणाय चिरं प्रयुध्य तैरभिहतो गतजीवितोऽभवम्। ततः प्रेतपुरीमुपेत्य तत्र देहधारिभिः पुरुषैः परिवेष्टितं सभामध्ये रत्नखचितसिंहासनासीनं शमनं[2] विलोक्य तस्मै दण्डप्रणाममकरवम्[3]। सोऽपि मामवेक्ष्य चित्रगुप्तं नाम निजामात्यमाहूय तमवोचत्। सचिव नैषोऽमुष्य मृत्युसमयो निन्दितचरितोऽप्ययं महीसुरनिमित्तं गतजीवितोऽभूत्। इतः प्रभृति विगलितकल्मषस्यास्य पुण्यकर्म्मकरणे रुचिरुदेष्यति पापिष्ठैरनुभूयमानमत्र यातनाविशेषं विलोक्य पुनरपि पूर्व्वशरीरमनेन गम्यतामिति। चित्रगुप्तोऽपि तत्र तत्र सन्तप्तेष्वायस्तम्भेषु बध्यमानान् अत्युष्णीकृते विततशरावतैले क्षिप्यमानान् लगुडैर्जर्ज्जरीकृतावयवान् निशितटङ्कैः परितक्ष्यमाणानपि दर्शयित्वा पुण्यबुद्धिमुपदिश्य माममुञ्चत्। तदेव पूर्व्वशरीरमहं प्राप्तो महाटवीमध्ये शीतलोपचारं रचयित्वा महीसुरेण परीक्ष्यमाणः शिलायां शयितः क्षणमतिष्ठम्। तदनु विदितोदन्तो मदीय

---

[1] Part. pres. pass. verb of the desiderative form of हन्, "to kill, "being sought to be killed."

[2] A name of Yama.

[3] दण्डप्रणामः, "prostration," "obeisance to the ground," "lying on it like a stick."

बन्धुगणः सहसा समागत्य मन्दिरमानीय मामपक्रान्तव्रणम् अकरोत् द्विजन्मा कृतज्ञो मह्यमक्षरशिक्षां विधाय विविधागमतन्त्रमाख्याय कल्मषक्षयकारणं सदाचारमुपदिश्य ज्ञानेक्षणगम्यमानस्य शशिखण्डशेखरस्य पूजाविधानमभिधाय पूजां मत्कृतामङ्गीकृत्य निरगात् । तदारभ्याहं किरातकृतसंसर्गबन्धुकुलमुत्सृज्य सकललोकैकगुरुमिन्दुकलावतंसं चेतसि स्मरन्नस्मिन् कानने दूरीकृतकलङ्को वसामि । देव भवते विज्ञापनीयं रहस्यं किञ्चिदस्त्यागम्यतामिति । स च वयस्यगणादपनीय रहसि पुनरेनमभाषत । राजन्नतीते निशान्ते गौरीपतिः स्वप्नसन्निहितो निद्रामुद्रितलोचनं विबोध्य प्रसन्नवदनकान्तिः प्रश्रयाननं मामवोचत् । मातङ्ग दण्डकारण्यान्तरालगामिन्यास्तटिन्यास्तीरभूमौ सिद्धसाध्याराध्यमानस्य स्फटिकलिङ्गस्य पश्चाददद्रिपतिकन्यापदपंक्तिचिह्नितस्याश्मनः सन्निधौ विधेराननमिव विलं विद्यते । तत्र निक्षिप्तं ताम्रशासनं[1] विधातुरिव शासनं समादाय विधिं तदुपरिष्टं दिष्टविजयमिव विधाय पाताललोकाधीश्वरेण भवता भवितव्यं । भवत्साहाय्यकरो राजकुमारोऽद्य श्वो वा समागमिष्यतीति । तदादेशानुगुणमेव भवदागमनमभूत् । साधनाभिलाषिणो मम तोषिणो रचय साहाय्यमिति । तथेत्युक्त्वा राजवाहनो साकं मातङ्गेन नमितोत्तमाङ्गेन विहायार्द्धरात्रे निद्रापरतन्त्रं मित्रगणं वनान्तरमवाप । तदनु

---

[1] "An inscription," "an edict or deed शासनं on a copper plate."

तदनुचराः साकल्येन राजकुमारमनवलोकयन्तो विषण्णहृदयास्तेषु वनेषु सम्यगन्विष्यानवेक्षमाणा एतदन्वेषणमनीषया देशान्तरं चरिष्णवो निश्चितपुनःसङ्गमसङ्केतस्थानाः परस्परं वियुज्य ययुः ॥

लोकैकवीरेण कुमारेण रक्ष्यमाणः सन्तुष्टान्तरङ्गो मातङ्गोऽपि बिलं शशिशेखरकथिताभिज्ञानपरिज्ञानं निःशङ्कं प्रविश्य गृहीतताम्रशासनो रसातलं पथा तेनैवोपेत्य तत्र कस्यचित् पट्टनस्य निकटे केलीकाननकासारस्य[1] विगतसारसस्य समीपे नानाविधेन शासनविधानोपपादितेन हविषा होमं विरच्य प्रत्यूहपरिहारिणि[2] सविस्मयं विलोकयति[3] राजवाहने समिधाज्यसमुज्ज्वलिते ज्वलने पुण्यगेहं देहं मन्त्रपूर्वकमाहुतीकृत्य तडित्समानकान्तिं दिव्यां तनुमलभत। तदनु मणिमयमण्डनमण्डलमण्डिता सकललोकललनाकुलललामभूता कन्यका काचन विनीतानेकसखीजनानुगम्यमाना कलहंसगत्या शनैरागत्यावनिसुरोत्तमाय मणिमेकमुज्ज्वलाकारमुपायनीकृत्य तेन का त्वमिति पृष्टा सोत्कण्ठा कलकण्ठस्वनेन मन्दं मन्दमुदञ्जलिरभाषत। भूसुरोत्तमाहमसुरोत्तमनन्दिनी कालिन्दी नाम मम पिताऽस्य लोकस्य शासिता महानुभावो निजपराक्रमासहिष्णुना विष्णुना दूरीकृतामरे समरे यमनगरातिथिरकारि। तद्वियोगशोकसागरमग्नां मामवेक्ष्य कोऽपि कारुणिकः सिद्धतापसोऽभाषत। बाले कश्चिद्दिव्यदेहधारी

---

[1] "A pond," "a piece of water." [2] "Guarding against interruption."

[3] The present part. locative case.

मानवो नवो वल्लभस्तव भूत्वा सकलरसातलं पालयिष्यतीति। तदादेशं निशम्य घनोन्मुखी चातकी वर्षागमनमिव तवालोकनकाङ्क्षिणी चिरमतिष्ठम्। मन्मनोरथफलायमानं भवदागमनमवगम्य मद्राज्यावलम्बनभूतामात्यानुमत्या मदनुकृतसारथ्येन मनसा भवन्तमागच्छम्। लोकस्यास्य राज्यलक्ष्मीमङ्गीकृत्य मां तत्सपत्नीं करोतु भवानिति। मातङ्गोऽपि राजवाहनानुमत्या तां तरुणीं परिणीय दिव्याङ्गनालाभेन हृष्टतरो रसातलराज्यमुरीकृत्य परमानन्दमाससाद॥

वञ्चयित्वा वयस्यगणं समागतो राजवाहनः तदवलोकनकौतूहलेन भुवं गमिष्णुः कालिन्दीदत्तं क्षुत्पिपासादिक्लेशनाशनं मणिं साहाय्यकरणसन्तुष्टान्मातङ्गाल्लब्ध्वा कञ्चनाध्वानमनुवर्त्तमानं तं विसृज्य बिलपथेन निर्ययौ। तत्र मित्रगणमनवलोक्य भुवं बभ्राम। भ्रमंश्च विशालोपशल्ये[1] कमप्याक्रीडमासाद्य[2] विशश्रमिषुरान्दोलिकारूढं[3] रमणीसहितमाप्तजनपरिवृतमुद्याने समागतमेकं पुरुषमपश्यत्। सोऽपि परमानन्देन पल्लवितचेता विकसितवदनारविन्दो मम स्वामी सोमकुलावतंसो विशुद्धयशोनिधी[4] राजवाहन एष महाभाग्यतयाऽकाण्ड[5] एवास्य पादमूलं गतवानस्मि सम्प्रति महान् नयनोत्सवो जात इति ससम्भ्रममान्दोलिकाया

---

[1] उपशल्यं, "an open space near a village or town."

[2] आक्रीडः, "a royal or public garden."

[3] "Desirous of stopping or resting," desiderative form of श्रम with वि prefixed.

[4] Visarga rejected before र, and the final of निधि made long.

[5] अकाण्डे, "on a sudden," "unexpectedly."

अवतीर्य्य सरभसपदविन्यासविलासिहर्षोत्कर्षचरितः चिचतुः पदान्युन्नतस्य चरणकमलयुगलं गलदुल्लसन्मल्लिकावलयेन मौलिना पस्पर्श । प्रमोदाश्रुपूर्णो राजा पुलकिताङ्गं तं गाढमालिङ्ग्य अये सौम्य सोमदत्त इति व्याजहार ॥ ततः कस्यापि पुन्नागभूरुहस्य प्रच्छायशीतले तले संविष्टेन मनुजनाथेन सप्रणयमभाणि । सखे कालमेतावन्तं देशे कस्मिन् प्रकारेण केनास्थायि भवता । सम्प्रति कुत्र गम्यते तरुणी केयमेषः परिजनः सम्पादितः कथं कथयेति ॥ सोऽपि मित्रसन्दर्शनव्यतिकरापगतचिन्ताज्वरातिशयो मुकुलितकरकमलः सविनयमात्मीयप्रचारप्रकारमवोचत् ॥

तृतीय उच्छ्वासः सोमदत्तचरितं

देव भवच्चरणकमलसेवाभिलाषी भूतोऽहं भ्रमन्नेकस्यां वनावनौ पिपासाकुलो लतापरिवृतशीतलनदसलिलं पिबन्नुज्ज्वलाकारं रत्नं तत्रैकमद्राक्षम्[1] । तदादाय गत्वा च कञ्चनाध्वानमतिक्रम्याम्बरमणेरत्युष्णतया गन्तुमक्षमो वनेऽस्मिन्नेव किमपि देवायतनं प्रविष्टो दीनाननं बहुतनयसमेतं स्थविरं महीसुरमेकमवलोक्य कुशलमुदितदयोऽहमपृच्छम् । कार्पण्यविवर्णवदनो महदाशापूर्णमानसोऽवोचदग्रजन्मा । महाभाग

SECTION III.

[1] First person singular indefinite preterite of दृश, "to see."

सुतानेतान्मातृहीनाननेकैरुपायै रक्षन्निदानीमस्मिन् कुदेशे
भैक्षं सम्पाद्य ददद्[1]देतेभ्य वसामि शिवालयेऽस्मिन्निति । भूदेव
एतत्कटकाधिपती राजा कस्य देशस्य किन्नामधेयः किमत्रा-
गमनकारणमस्येति पृष्टोऽभाषत महीसुरः । सौम्य मत्तकालो
नाम [2]लाटेश्वरो देशस्यास्य पालयितुर्वीरकेतोस्तनयां वाम-
लोचनां नाम तरुणीरत्नमसमानलावण्यं श्रावं श्रावम-
वधूतदुहितृप्रार्थनस्य तस्य पाटलीं नाम्ना नगरीमरौत्सीत्[3] ।
वीरकेतुरपि भीतो महदुपायनमिव तनयां मत्तकालायादात् ।
तरुणीलाभहृष्टचेता लाटपतिः परिणेया निजपुर एवेति
निश्चित्य गच्छन् निजदेशं प्रति मृगयादरेणात्र वने सैन्यवास-
मकारयत् । कन्यासारेण नियुक्तो मानपालो नाम वीरकेतुमन्त्री
मानधनश्चतुरङ्गबलसमन्वितोऽन्यत्र रचितशिविरस्तन्निजना-
थावमानखिन्नमानसोऽन्तर्बिभेद[4]ेति । विप्रोऽसौ बहुतनयो
विद्वान् निर्धनः स्थविरश्च दानयोग्य इति तस्मै करुणापूर्ण-
मना रत्नमदाम् । परमाह्लादविकसिताननोऽभिहितानेकाशीः
कुत्रचिदग्रजन्मा जगाम । अध्वश्रमखिन्नेन मया तत्र निर[5]वेशि

---

[1] The part. pres. of दा does not take न् in the nominative masculine, Gr. p. 57.

[2] The country of Láta is often mentioned by writers of this period though not found in the Pauranik lists. It corresponds apparently with the Larike of classical geographers.

[3] Third pers. sing. indef. pret. of रुध, "to obstruct;" here meaning, "to besiege."

[4] Third pers. sing. redup. pret. of भिद, "to break;" but it is used here in the passive voice, implying, with the preposition अन्तर्, "was internally afflicted or grieved," "was heart-broken."

[5] "Was entered into or enjoyed," 3d pers. sing. indef. pret. passive verb of विश, "to enter," with निर् prefixed.

निद्रासुखं । तदनु पश्चान्निगलितबाहुयुगलः स भूसुरः कशाघातचिह्नितगात्रो ऽनेकनैस्त्रिंशिकैरनुयातो ऽभ्येत्य मामसौ दस्युरित्यदर्शयत् । परित्यक्तभूसुरा राजभटा रत्नावाप्तिप्रकारं मदुक्तमनाकर्ण्य भयरहितं मां गाढं नियम्य रज्जुभिरानीय कारागारमेते तव सखाय इति निगडितान् कांश्चिन्निर्दिष्टवन्तो मामपि निगडितचरणयुगलमकार्षुः । किंकर्त्तव्यतामूढेन निराशङ्कक्लेशानुभवेनावोचि मया । ननु पुरुषा वीर्य्यपरुषा निमित्तेन केन निर्विशथ कारावासदुःखं दुस्तरं । यूयं वयस्या इति निर्द्दिष्टमेतैः किमिदमिति । तथाविधं मामवेक्ष्य भूसुरान् मया श्रुतं लाटपतिवृत्तान्तं व्याख्याय चौरवीराः पुनरवोचन् महाभाग वीरकेतुमन्त्रिणो मानपालस्य किंकरा वयं तदाज्ञया लाटेश्वरमारणाय रात्रौ सुरङ्गद्वारेण तदगारं प्रविश्य तत्रराजाभावेन विषण्णा बहुधनमपहृत्य महाटवीं प्राविशाम । अपरेद्युश्चान्वेषिणो राजानुचरा बहवो ऽभ्येत्य धृतधनान्वितानस्मान् परितः परिवृत्य दृढतरं बध्वा निकटमानीय समस्तवसुशोधनवेलायामेकस्यानर्घ्यरत्नस्याभावेनास्मद्वधाय माणिक्यादानायास्मान् किलाशृङ्खलयन्निति । श्रुतरत्नरत्नालोकनस्थानो ऽहमिदं तदेवं माणिक्यमिति निश्चित्य भूदेवदानमिति तान् दुःखस्थानात्मनो जन्म नामधेयं युष्मदन्वेषणपर्य्यटनप्रकारं चाभाष्य समयोचितैः संलापैर्मैत्रीमकार्षम् । ततो ऽर्द्धरात्रे तेषां मम च शृङ्खलाबन्धनं निभिद्य तैरनुगम्य-

[1] Nominal verb, from शृङ्खला, "a chain," 3d pers. plur. 1st pret.

मानो निद्रितस्य द्वाःस्थगणस्यायुधजालमादाय पुररक्षान् पुरतोऽभिमुखागतान् पटुपराक्रमलीलयाभिद्राव्य मानपालशिविरं प्राविशम्। मानपालो निजकिङ्करेभ्यो मम कुलाभिमानवृत्तान्तं तत्कालीनविक्रमञ्च निशम्य मामार्च्चयत्॥ परेद्युर्मत्तकालेन प्रेषिताः केचन पुरुषाः मानपालमुपैत्य मन्त्रि मदीयराजमन्दिरे सुरुङ्गया बहुधनमपहृत्य चौरवीरा भवदीयकटकं प्राविशन्। तानर्पय नोचेन्महाननर्थः सम्भविष्यतीति क्रूरतरं वाक्यमब्रुवन्। तदाकर्ण्य रोषारुणितनेत्रो मन्त्री लाटपतिः कस्तेन मैत्री का पुनरस्य वराकस्य सेवया किं लभ्यमिति तान् निरभर्त्सयत्। ते च मानपालेनोक्तं विप्रलापं मत्तकालाय तथैवाकथयन्। कुपितोऽपि लाटपति दौर्वीर्य्यगर्व्वेणाल्पसैनिकसमेतो योद्धुमभ्यगात्। पूर्व्वमेव कृतरणनिश्चयो मानपालः सन्नद्धयोधी योद्धुकामो भूत्वा निःसङ्कं निरगात्। अहमपि सबहुमानं मन्त्रिदत्तानि बहुलतुरङ्गमोपेतं चतुरसारथिरथं च दृढतरं कवचं मदनुरूपं चापं च विविधवाणपूर्णं तूणीरद्वयं समुचितान्यायुधानि गृहीत्वा युधसन्नद्धो मदीयबलविश्वासेन रिपूद्धरणोद्युक्तं मन्त्रिणमन्वगाम्। परस्परमत्सरेण तुमुलसङ्गरकरमुभयसैन्यमतिक्रम्य समुल्लसद्भुजाटोपेन वाणवर्षं तदङ्गे विमुञ्चन्नरातीन् प्राहरम्। ततोऽतिरयतुरङ्गमं मद्रथं तन्निकटं नीत्वा शीघ्रलङ्घनोपेततदीयरथोऽहमरातेः शिरः कर्त्तनमकार्षम्। तस्मिन्निपतिते तदवशिष्टसैनिकेषु पलायितेषु नानाविधं हयगजादिवस्तुजालमादाय परमानन्दसम्भृतो मन्त्री ममानेकविधां सम्भावनाम-

कार्षीत्॥ मानपालप्रेषितात्तदनुचरादेनमखिलमुदन्तमाकर्ण्य सन्तुष्टमना राजा ऽभ्युन्नतो मदीयपराक्रमे विस्मयमानः समहोत्सवममात्यबान्धवानुमत्या शुभदिने निजतनयां मह्यमदात्। ततो यौवराज्याभिषिक्तो ऽहमनुदिनमाराधितमहीपालचित्तो वामलोचनयानया सह नानाविधसौख्यमनुभवन् भवद्विरहवेदनाशल्यवैकल्यहृदयः सिद्धादेशेन सुहृज्जनावलोकनफलप्रदेशं महाकालनिवासिनः परमेश्वरस्याराधनायाद्य पत्नीसमेतः समागतो ऽस्मि। भक्तवत्सलस्य गौरीपतेः कारुण्येन भवत्पदारविन्दसन्दर्शनानन्दसन्दोहो[1] मया लब्ध इति॥

तं निशम्य नन्दितपराक्रमो राजवाहनस्तन्निरपराधदण्डदैवमुपलभ्य तस्मै क्रमेणात्मचरितं कथयामास। तस्मिन्नवसरे पुरतः पुष्पोद्भवं विलोक्य ससम्भ्रमं निजनिटिलतटस्पृष्टचरणाङ्गुलिमुदञ्जलिमत्युन्नाढमालिङ्ग्यानन्दवाष्पसङ्कुलसम्फुल्ललोचनः सौम्य सोमदत्तोयं स पुष्पोद्भव इति तस्मै तं दर्शयामास। तौ च चिरविरहदुःखमुत्सृज्यान्योन्यालिङ्गनसुखमन्वभूताम्। ततस्तस्यैव महीरुहस्य छायायामुपविश्य राजा समभाषत। वयस्य भूसुरकार्य्यकरिष्णुरहं मित्रगणो विदितार्थः सर्व्वथान्तरायं करिष्यतीति निद्रितान् भवतः परित्यज्य निरगाम्। तदनु प्रबुद्धो वयस्यवर्गो किमिति निश्चित्य मदन्वेषणाय

[1] सन्दोह occurs in the Amara Kosha among the synonimes of "a flock," "a multitude." Most of the terms, however, denote quantity as well as number, or heap, plenty, aggregate, abundance, which latter sense is most appropriate in the text.

कुत्र गतवान् भवानेकाकी क्क गन्तेति । सोऽपि ललाटतट चुम्बदञ्जलिपुटः सविनयं समलपत् ॥

चतुर्थ उच्छ्वासः पुष्पोद्भवचरितं

देव महीसुरोपकारायैव देवो गतवानिति निश्चित्यापि देवेन गन्तव्यं देशं निर्णेतुमशक्नुवानो मित्त्रगणः परस्परं वियुज्य दिक्षु देवप्रने[1]ष्टुमगच्छत् । अहमपि देवस्यान्वेषणाय महीमटन् कदाचिदम्बरमध्यगतस्याम्बरमणेः किरणमसहिष्णुरेकस्य गिरितटमहीरुहस्य प्रच्छायशीतले तले क्षणमुपाविशम् । मम पुरोभागे दिनमध्यसमये सङ्कुचितसर्व्वावयवां शूर्पाकृतिं कूर्म्माकृतिं मानुषच्छायां निरीक्ष्योन्मुखो गगनतलान्महारयेण पतन्तं पुरुषं कञ्चिदन्तराल एव दयोपनतहृदयोऽहमवलंव्य शनैरवनितले निक्षिप्य दूरापातवीतसञ्ज्ञं तं शिशिरोपचारेण विबोध्य शोकातिरेकेणोद्गतवाष्पलोचनं तं भृगुप[2]तनकारणमपृच्छम् । सोऽपि कररुहैरश्रुकणानपनयन्नभाषत । सौम्य मगधाधिनाथामात्यस्य पद्मोद्भवस्यात्मसम्भवो रत्नोद्भवो नामाहं वाणिज्यरूपेण कालयवनद्वीपमुपेत्य कामपि

---

[1] Inf. of the desiderative of णी, "to bring," with प्र prefixed.

[2] This is an unusual phrase; but one of the meanings of भृगु is, "a precipice," and भृगुपतनं therefore means, "falling from a height," being synonymous, in fact, with the expression गिरिपतनं, which occurs a few lines below.

बणिक्कन्यकां परिणीय तया सह प्रत्यागच्छन्नम्बुतीरस्यानतिदूर एव प्रवहणस्य भग्नतया सर्व्वेषु निमग्नेषु कथं कथमपि दैवानुकूल्येन तीरभूमिमभिगम्य निजाङ्गनावियोगदुःखार्णवे प्लवमानोऽहं कस्याऽपि सिद्धतापसस्यादेशादरेण षोडशहायनानि कथञ्चिन्नीत्वा दुरवस्थापारमनवेक्षमाणो गिरिपतनमकार्षमिति ॥

तस्मिन्नेवावसरे किमपि नारीकूजितमश्रावि । न खलु समुचितमिदं यत्सिद्धादिष्टे पतितनयमिलने विरहमसहिष्णुर्वैश्वानरं विशसीति । तन्निशम्य मनोविदितजनकभावं तमवादिषं । तात भवते विज्ञापनीयानि बहूनि सन्ति । भवतु पश्चादखिलमाख्यातव्यं । अधुना नारीकूजितमनुपेक्षणीयं मया । क्षणमात्रमत्र भवता स्थीयतामिति । तदनु सोऽहं त्वरया किञ्चिदन्तरमगमम् । तत्र पुरतो भयङ्करज्वालाकुलहुतभुगवगाहनसाहसिकां मुकुलिताञ्जलिपुटां वनितां काञ्चिदवलोक्य ससम्भ्रममनलादपनीय कूजन्त्या वृद्धया सह मत्पितुरभ्यर्णमभिगमय्य स्थविरामवोचं । वृद्धे भवत्यौ कुत्रत्ये कान्तारे निमित्तेन केन दुरवस्थानुभूयते कथ्यतामिति । सा सगद्गदमवादीत् पुत्र कालयवनद्वीपे कालगुप्तनाम्नो बणिजः कस्यचिदेषा सुता सुवृत्ता नाम रत्नोद्भवेन निजकान्तेनागच्छन्ती जलधौ मग्ने प्रवहणे निजधात्र्या मया सह फलकमेकमवलंब्य दैवयोगेन कूलमुपेता आसन्नप्रसवसमया कस्याञ्चिदटव्यामात्मजमसूत । मम तु मन्दभाग्यतया बाले वनमातङ्गेन गृहीते मद्द्वितीया परिभ्रमन्ती षोडशवर्षानन्तरं

भर्तृपुत्रसङ्गमो भविष्यतीति सिद्धवाक्यविश्वासादेकस्मिन् पुण्याश्रमे तावन्तं समयं नीत्वा शोकमपारं सोढुमक्षमा समुज्ज्वलिते वैश्वानरे शरीरमाहुतीकर्त्तुमुद्युक्तासीदिति । तदाकर्ण्य निजजननीं ज्ञात्वा तामहं दण्डवत्प्रणम्य तस्यै मदुदन्तमखिलमाख्याय धात्रीभाषणफुल्लवदनं विस्मयविकसिताक्षं जनकमदर्शयम् । पितरौ तौ साभिज्ञानमन्योन्यं ज्ञात्वा मुदितान्तरात्मानौ विनीतं माममन्दाश्रुवर्षेणाभिषिच्य गाढमाश्लिष्य शिरस्युपाघ्राय कस्याञ्चिन्महीरुहच्छायायामुपाविशताम् । कथं निवसति महीवल्लभो राजहंस इति जनकेन पृष्टोऽहं तस्य राज्यच्युतिं त्वदीयजननं सकलकुमारावाप्तिं तव दिग्विजयारम्भं भवतो मातङ्गानुयानमस्माकं युष्मदन्वेषणकारणं सकलमभ्यधाम् । ततस्तौ कस्यचिदाश्रमे मुनेरस्थापयम् । ततो देवस्यान्वेषणपरायणोऽहमखिलकार्य्यनिमित्तचित्तं निश्चित्य भवदनुग्रहाल्लब्धस्य साधकस्य साहाय्यकरणदक्षं शिष्यगणं निष्पाद्य विन्ध्यवनमध्ये पुरातनपट्टनस्थानान्युपेत्य विविधनिधिसूचकानां महीरुहाणामधो निक्षिप्तान् वसुपूर्णान् कलशान् सिद्धाञ्जनेन[1] ज्ञात्वा रक्षिषु परितः स्थितेषु खननसाधनैरुत्पाट्य दीनारानसङ्ख्यान् राशीकृत्य तत्कालागतमनतिदूरे निवेशितं वणिक्कटकं[2] कञ्चिदभ्येत्य तत्र बलिनो बलीवर्द्दान् गोणींश्च[3] क्रीत्वाऽन्यद्रव्यमिषेण वसु तद्गोणीसम्मितं तैरुह्यमानं शनैः कटकमनयम् । तदधिकारिणा चन्द्रपालेन

---

[1] By magic collyrium, enabling the eyes to see through opaque substances.
[2] "An encampment or caravan of traders."
[3] गोणी, "a sack."

केनचिद्वणिक्पुत्रेण विरचितसौहृदो ऽहममुनैव साकमुज्जयिनीमुपाविशम्। मत्पितरावपि तां पुरीमभिगमय्य सकलगुणनिलयेन बन्धुपालनाम्ना चन्द्रपालजनकेन नीयमानो मालवनाथदर्शनं विधाय तदनुमत्यारूढवासतिमकरवम्। ततः काननभूमिषु भवन्तमन्वेष्टुमुद्युक्तं मां परममित्रं[1] बन्धुपालो निशम्यावदत्। सकलं धरणीतलमपारमन्वेष्टुमक्षमो भवान् मनोग्लानिं विहाय तूष्णीं तिष्ठतु। भवन्नायकालोकनकारणं शुभशकुनं निरीक्ष्य कथयिष्यामीति। तल्लपितामृताश्वसितहृदयो ऽहमनुदिनं तदुपकण्ठवर्त्ती कदाचिदिन्दुमुखीं नवयौवनावलीढावयवां नयनचन्द्रिकां बालचन्द्रिकां नाम तरुणीरत्नं बणिग्मन्दिरलक्ष्मीमूर्त्तामवलोक्य तदीयलावण्यावधूतधीरभावो लतान्तवाणलक्ष्यतामयासिषम्। चकितबालकुरङ्गलोचना सा ऽपि कुसुमसायकसायकायमानेन कटाक्षवीक्षणेन मामसकृन्निरीक्ष्य मन्दमारुतान्दोलितलतेवाकम्पत्। मनसाभिमुखैः समाकुञ्चितै रागलज्जान्तरालवर्त्तिभिः साङ्गवर्त्तिभिरीक्षणविशेषैर्निजमनोवृत्तिमकथयत्। चतुरगूढचेष्टाभिरस्या मनोनुरागं सम्यग् ज्ञात्वा सुखसङ्गमोपायमचिन्तयम्। अन्यदा बन्धुपालः शकुनैर्भवद्गतिं प्रेक्षिष्यमाणः पुरप्रान्तविहारवनं मया सहोपेत्य कस्मिंश्चिन्महीरुहे शकुनवचनानि शृण्वन्नतिष्ठत्। अहमुत्कलिकाविनोदपरायणो वनान्ते परिभ्रमन् सरोवरतीरे चिन्ताक्रान्तचित्तां

---

[1] मित्रं, "a friend," is properly a neuter noun as here employed.

दीनवदनां मन्मनोरथैकभूमिं बालचन्द्रिकां व्यलोकयम्। तस्याः ससम्भ्रमप्रेमलज्जाकौतुकमनोरमं लीलाविलोकनसुखमनुभवन् सुदत्या वदनारविन्दे विषण्णभावं मदनकदनखेदानुभूतं ज्ञात्वा तन्निमित्तं ज्ञास्यन् लीलया तदुपकण्ठमुपेत्यावोचिषम्। सुमुखि तव मुखारविन्दस्य दैन्यकारणं कथयेति। सा रहस्यसञ्जातविश्रम्भतया विहाय लज्जाभये शनैरभाषत॥

सौम्य मानसारो मालवाधीशो वार्द्धकस्य प्रबलतया निजनन्दनं दर्पसारमुज्जयिन्यामभ्यसिञ्चत्। स कुमारः सप्तसागरपर्य्यन्तं महीमण्डलं पालयिष्यन् निजपैतृष्वस्रीयावुद्दण्डकर्म्माणौ चण्डवर्म्मदारुवर्म्माणौ धरणीभरणे नियुज्य तपश्चरणाय राजगिरिमभ्यगात्। राज्यं सर्व्वमसपत्नं शासति चण्डवर्म्मणि दारुवर्म्मा मातुलाग्रजन्मनो शासनमतिक्रम्य पारदार्य्यपरद्रव्यापहरणादिदुःकर्म्म कुर्व्वाणो मन्मथसमानस्य भवतो लावण्यायत्तचित्तां मामेकदा विलोक्य कन्यादूषणदोषं दूरीकृत्य बलात्कारेण रन्तुमुद्युंक्ते[1] तच्चिन्तया दैन्यमगच्छमिति। तस्या मनोगतं मयि रागोद्रेकं मन्मनोरथसिद्ध्यन्तरायञ्च निशम्य वाष्पपूर्णलोचनां तामाश्वास्य दारुवर्म्मणो मारणोपायञ्च विचार्य्य वल्लभामवोचम्। तरुणि भवदभिलाषिणं दुष्टहृदयमेनं निहन्तुं मृदुरुपायः कश्चिच्चिन्त्यते। यक्षः कश्चिदधिष्ठाय बालचन्द्रिकां निवसति तदाकारसम्पदाशाशृङ्खलितहृदयो यः सम्बन्धयोग्यः साहसिको रतिमन्दिरे तं यक्षं

---

[1] युज, 7th conj., takes the atm. pada after उद्, Gr. p. 265.

निर्जित्य तयैकसखीसमेतया मृगाक्ष्या संलापामृतसुखमनुभूय कुशली निर्गमिष्यति तेन चक्रवाकसंशयाकारपयोधरा विवाहनीयेति सिद्धेनैकेनावादीति पुरजनस्य पुरतो भवदीयैः सत्यवाक्यैरसकृत् कथनीयं। तदनु दारुवर्म्मा वाक्यानीत्थंविधानि श्रावं श्रावं तूष्णीं यदि भिया स्थास्यति तर्हि वरं यदि वा दौर्जन्येन त्वया सङ्गमङ्गीकरिष्यति तदा स भवदीयैरित्थं वाच्यः सौम्य दर्पसारवसुधाधिपामात्यस्य भवतोऽस्मिन्निवासे साहसकरणमनुचितं पौरजनसाक्षिकं भवन्मन्दिरमानीतया तया तोयजाक्ष्या सह क्रीडन्नायुष्मान् यदि भविष्यति तदा परिणीय तरुणीं मनोरथान्निर्विशेति। सोऽप्येतदङ्गीकरिष्यति त्वं सखीवेषधारिणा मया सह तस्य मन्दिरं गच्छ अहमेकान्तनिकेतने मुष्टिजानुपदाघातैस्तं रभसान्निहत्य पुनरपि वयस्यामिषेण भवतीमनु निः शङ्कं निर्गमिष्यामीति। तदेनमुपायमङ्गीकृत्य विगतसाध्वसलज्जाभवत्। जनकजननीसहोदराणां पुरत आवयोः प्रेमातिशयमाख्याय सर्व्वथास्मत् परिणयकारणेताननुनयेः तेऽपि वंशसम्पल्लावण्याढ्याय यूने मह्यं त्वां दास्यन्त्येव दारुवर्म्मणो मरणोपायं तेभ्यः कथयित्वा तेषामुत्तरमाख्येयं मह्यमिति। साऽपि किञ्चिदुत्फुल्लसरसिजानना मामब्रवीत्। सुभग क्रूरकर्म्माणं दारुवर्म्माणं भवान् हन्तुमर्हेति। तस्मिन् हते सर्व्वथा युष्मन्मनोरथः फलिष्यति। एवं क्रियतां। भवदुक्तं सर्व्वमहमपि तथा करिष्य इति मामसकृद्विवृत्तवदना विलोकयन्ती मन्दमगारमगात्। अहमपि बन्धुपालमुपेत्य शकुनज्ञात्तस्मा-

त्रिंशद्दिवसानन्तरमेव भवत्सङ्गः सम्भविष्यतीत्यभृणवम् । तदनु मदनुगम्यमानो बन्धुपालो निजावासम् प्रविश्य माममपि निलयाय विससर्ज्ज । मन्मायोपायवागुरापाशलग्नेन दारुवर्म्मणा समाहूता बालचन्द्रिका तं गमिष्यतीति दूतिकां मन्निकटमभिप्रेषितवती । अहमपि मणिनुपूरमेखलाकङ्कणकटकताडङ्कहारक्षौमकज्जलं वनितायोग्यं मण्डनजातं निपुणतया तत्तत् स्थानेषु निक्षिप्य सम्यगङ्गीकृतमनोज्ञवेषो वल्लभया तया सह तदागारद्वारोपान्तमगच्छम् । द्वाः स्थकथितास्मदागमनेन सादरं विहिताभ्युद्गतिना तेन द्वारोपान्तनिवारिताशेषपरिवारेण मदन्विता बालचन्द्रिका सङ्केतागारमनीयत । नगरव्याकुलां यक्षकथां परीक्षन् नागरिकजनोऽपि कुतूहलेन दारुवर्म्मणः प्रतीहारभूमिमगमत् । विवेकशून्यमतिरसौ रागातिरेकेण रत्नखचितहेमपर्य्यङ्के हंसतूलगर्भशयनमानीय तरुणीं तस्यै मह्यं तमिस्रासम्यगनवलोकितपुंभावाय मनोरमस्त्रीवेषाय च चामीकरमणिमयमण्डनानि सूक्ष्माणि चित्रवस्त्राणि कस्तूरिकामिलितहरिचन्दनं कर्पूरसहितं ताम्बूलं सुरभीनि कुसुमानि ललितं वस्तुजातं समर्प्य मुहूर्त्तद्वयमात्रं हासवचनैः संलपन्नतिष्ठत् । ततो रागान्धतया सुमुख्यालिङ्गने मतिं व्यधत्त । रोषारुणितोऽहमेनं पर्य्यङ्कतलान्निःशङ्को निपात्य मुष्टिजानुपदाघातैः प्राहरम् । नियुद्धरभसविकलमलङ्कारं पूर्व्ववन्मिलयित्वा भयकम्पितां नताङ्गीमुपलालपन् मन्दिराङ्गणमुपेतः साध्वसकम्पित इवोच्चैरकूजम् । हा बालचन्द्रिकाधिष्ठितेन घोराकारेण यक्षेण

दारुवर्म्मा निहन्यते। सहसा समागच्छत पश्यतेति॥ तदाकर्ण्य मिलिता जनाः समुद्यद्बाष्पा हाहानिनादेन दिशो बधिरयन्तो[1] बालचन्द्रिकामधिष्ठितं यक्षं बलवन्तं शृण्वन्नपि दारुवर्म्मा मदान्धस्तामेवायाचत तदसौ स्वकीयेन कर्म्मणा निहतः किं तस्य विलपिनेति मिथो लपन्तः प्राविशन्। कोलाहले तस्मिंश्चटुललोचनया सह नैपुण्येन सहसा निर्गतो निजावासमगाम्। ततो गतेषु कतिपयदिनेषु पौरजनसमक्षं सिद्धादेशप्रकारेण विवाह्य तामिन्दुमुखीं पूर्वसङ्कल्पितं सुखं यथेष्टमनुभवम्। बन्धुपालशकुननिर्द्दिष्टदिवसेऽस्मिन्निर्गत्य पुराद्वर्त्तमानो नेत्रोत्सवकारि भवदनुलोकनसुखमप्यनुभवामीति॥

एवं मित्रवृत्तान्तं निशम्याम्लानमानसो राजवाहनः स्वस्य च सोमदत्तस्य च वृत्तान्तमस्मै निवेद्य सोमदत्त महाकालेश्वराराधनानन्तरं भवद्वल्लभां सपरिकरां निजकटकं प्रापय्यागच्छेतिनियुज्य पुष्पोद्भवेन सेव्यमानो भूस्वर्गायमानमवन्तिकापुरं[2] विवेश। तत्रायं मम स्वामिकुमार इति बन्धुपालादये बन्धुजनाय कथयित्वा तेन राजवाहनाय बहुविधां सपर्य्यां कारयन् सकलकुशलो महीसुर इति पुरि प्रकटयन् पुष्पोद्भवोऽमुष्य राज्ञोऽन्नभोजनादिकमनुदिनं स्वमन्दिरे कारयामास॥

---

[1] Nominal verb, from बधिर, "deaf," "were deafening," the skies.

[2] "Avanti or Ujayin making heaven of earth."

पञ्चम उच्छ्वासोऽवन्तीसुन्दरीपरिणयः

अथ मीनकेतनसेनानायकेन मलयगिरिमहीरुहनिरन्तरावासिभुजङ्गमभुक्तावशिष्टेनेव सूक्ष्मतरेण धूतहरिचन्दनपरिमलभरेणेव मन्दगतिना दक्षिणानिलेन वियोगिहृदयस्थं मन्मथानलमुज्ज्वलयन् सहकारकिसलयमकरन्दास्वादनरक्तकण्ठानां मधुकरकलकण्ठानां काकलीकलकलेन दिक् चक्रं वाचालयन् मानिनीमानसोत्कलिकामुपनयन् माकन्दसिन्दुवाररक्ताशोककिंशुकतिलकेषु कलिकामुपपादयन् मदनमहोत्सवाय रसिकमनांसि समुल्लासयन् वसन्तसमयः समाजगाम । तस्मिन्नतिरमणीये कालेऽवन्तिसुन्दरी नाम मानसारनन्दिनी प्रियवयस्यया बालचन्द्रिकया सह नगरोपान्तरम्योद्याने विहारोत्कण्ठया पौरसुन्दरीसमवायसमन्विता कस्यचिच्चूतपोतकस्य छायाशीतले सैकततले गन्धकुसुमहरिद्राक्षतचीनाम्बरादिनानाविधेन परिमलद्रव्यनिकरेण मनोभवमर्चयन्ती रेमे । तत्र रतिप्रतिकृतिं अवन्तिसुन्दरीं द्रष्टुकामः काम इव वसन्तसहायः पुष्पोद्भवसमन्वितो राजवाहनस्तदुपवनं प्रविश्य तत्र तत्र मलयमारुतान्दोलितशाखानिरन्तरसमुद्भिन्नकिसलयकुसुमफलसमुल्लसितेषु रसाल[1]तरुषु कोकिलकीरालिकुलमधुकराणामालापान् श्रावं श्रावं विकसदिन्दीवरकह्लारकैरवराजीवराजिकेलिलोलकलहंससारसकारण्डवचक्रवाकचक्रवालकलरवव्याकुलविमलशीतलसलिलललि-

---

[1] Rasála is a name of various trees, but may be understood here of the Mango, which blossoms in spring.

तानि सरांसि दर्शं दर्शममन्दलीलया ललनासमीपमवाप। बालचन्द्रिकया निःशङ्कमित आगम्यतामिति हस्तसञ्ज्ञया समाहूतो निजतेजोजितपुरुहूतो राजवाहनो ऽवन्तिसुन्दर्य्या अन्तिकं जगाम। या वसन्तसहायेन समुत्सुकतया रतेः केलीशालभञ्जिकाविधित्सया काञ्चननारीविशेषं विरच्य[1]आत्मनः क्रीडाकासारशा[2]रारविन्दसौन्दर्य्येण पादद्वयमुद्यानवनदीर्घिकामत्तमरालिकागमनरीत्या लोलालसगतिविलासं तूणीरलावण्येन जङ्घे कन्दलीलालित्येन मनोज्ञमूरुयुगं जैत्र[3]रथचक्रचातुर्य्येण घनं जघनं किञ्चिद्विकसल्लीलावतंसकह्लारकोरककोटरानुवृत्या गङ्गावर्त्तसनाभिनाभिं सौधारोहणपरिपाट्या[4]वलित्रयमौर्व्वीकं मधुकरपंक्तिनीलिमलीलया रोमावलिं पूर्णसुवर्णकलशशोभया कुचद्वन्द्वं लतामण्डपसौकुमार्य्येण बाहू

---

[1] The following passsage presents some perplexity from peculiarities of construction—the long suspension of the connection between the governing pronoun and the verb, and between the participle and the agent, and by the use of the indefinite past participles. The sense will be rendered clear by taking as the leading phrases या राज वसन्तसहायेन निर्म्मितेव, "Who shone as if created by the friend of spring," *i.e.* Love: "He in his distress (for her absence), through a wish to possess an effigy of his bride Rati, having framed (विरच्य) (in Avanti Sundari) a certain female form." Then follows an enumeration of the objects of which he made the several members of the body, comprising those to which the female limbs are commonly compared when it is intended to describe their beauty: thus, (having made विधाय) "with the loveliness of the variegated lotus of the pleasure pond her feet; with the gait of the inebriate swan having formed her sportive motion;" and so on.

[2] B. has शारदारविन्द, "autumnal lotus;" A. has शारविन्द: but it should probably be शारारविन्द, "the variegated lotus;" or, कासारसारारविन्द, "the lotus the essence or pride of the pool."

[3] जैत्ररथ, "the victorious car;" here means, "the car of Káma."

[4] "With the series of the steps of a palace (he formed) the three lines above the thigh:" or, perhaps, a better reading would be, अवलित्रयमौदरिकं; for the त्रिवली, which is considered a beauty, is usually applied to lines on the abdomen.

जयशंखाभिख्यया कण्ठं कामिकर्णपूर्णसहकारपल्लवरागेण प्रतिबिम्बीकृतबिम्बरदनच्छदं बाणायमानपुष्पलावण्येन शुचिस्मितं अग्रदूतिकाकलकण्ठिका[1]कलालापमाधुर्य्येण वचनजातं सकलसैनिकनायकमलयमारुतसौरभ्येण निश्वासपवनं जयध्वजमीनदर्पेण लोचनयुगलं चापयष्टिश्रिया भ्रूलते प्रथमसुहृदः सुधाकरस्यापनीतकलङ्कया कान्त्या वदनं लीलामयूरबर्हिभंग्या केशपाशं च विधाय समस्तमकरन्दकस्तूरिकसमितेन मलयजरसेन प्रक्षाल्य कर्प्पूरपरागेण सम्मृज्य निर्म्मितेव रराज । मूर्त्तिमतीव लक्ष्मीर्मालवेश[2]कन्यकास्ते । सैवाराध्यमानं सङ्कल्पितवरप्रदानायाविर्भूतं मूर्त्तिमन्तं मन्मथमिव तमालोक्य मन्दमारुतान्दोलितलतेव मदनावेशवती चकम्पे । तदनु क्रीडाविश्रम्भान्निवृत्ता लज्जया कानि कान्यपि भावान्तराणि व्यधत्त । ललनाजनं सृजता विधात्रा नूनमेषा [3]घुणाक्षरन्यायेन निर्म्मिता नो चेदब्जभूरेवंविधनिर्म्माणनिपुणो यदि स्यात्तत्समानलावण्यामन्यां तरुणीं किं न करोतीति सविस्मयानुरागं विलोकयतस्तस्य समक्षं स्थातुं लज्जिता सा किञ्चित्सखीजनान्तरितगात्रा तन्नयनाभिमुखैः किञ्चिदाकुञ्चि-

---

[1] कलकण्ठी, "the Indian cuckoo," called in the Vikrama and Urvasi "Love's messenger."

[2] A. has मालवराजकन्यका स्वनैवाराध्यमानं ; B. कन्यकास्तेनैवाराध्यमानं. Neither can be correct. The sentence requires, apparently, the verb in आस्ते, by which it is closed; and then another begins with सा, एव, or सैव.

[3] An explanation of the term घुणाक्षर has not been met with: the sense is evidently "by singular accident or good luck," as the experiment had never again succeeded. घुण, the root, means, "to revolve," "a revolving letter," a sort of lottery perhaps.

तैरञ्चितभ्रूलतैरपाङ्गवीक्षितैरात्मनः कुरङ्गस्यानायमान[1]ला-वण्यं राजवाहनं विलोकयन्त्यतिष्ठत् । सोऽपि तस्यास्त दोत्पादितभावरसानां सामग्र्या लब्धबलस्येव विषमशरस्य शरव्यायमाणमानसो[2] बभूव। सा मनसीत्थमचिन्तयत् अनन्य-साधारणसौन्दर्य्येणानेन कस्यां पुरि भाग्यवतीनां तरुणीनां लोचनोत्सवः क्रियते। पुत्ररत्नेनामुना पुरन्ध्रीणां पुत्रवतीनां सीमन्तिनीनां का नाम सीमन्तमौक्तिकी क्रियते। कास्य देवी किमत्रागमनकारणमस्य। मन्मथो मामपहसितनिजलावण्य-मेनं विलोकयन्तीमसूययेवातिमात्रं मथ्नन्निजनामसान्वयं करोति। किं करोमिः कथमयं ज्ञातव्य इति। ततो बालच-न्द्रिका तयोरितरेतररागवृत्तिं भावविवेकैर्ज्ञात्वा कान्तासमा-जसन्निधौ राजनन्दनोदन्तस्य सम्यगाख्यानमनुचितमिति लोकसाधारणैर्वाक्यैरभाषत । भर्त्तृदारिकेऽयं सकलकला-प्रवीणो देवतासान्निध्यकरण आहवनिपुणो भूसुरकुमारो मणिमन्त्रौषधज्ञः परिचर्य्यार्हो भवत्या पूज्यतामिति। तदा-कर्ण्य निजमनोरथमनुवदन्त्या बालचन्द्रिकया सन्तुष्टान्त-रङ्गातरङ्गावली मन्दानिलेनेव सङ्कल्पजेनाकुलीकृता राज-कन्या जितमारं कुमारं समुचितासनासीनं विधाय सखीहस्तेन गन्धकुसुमाक्षतघनसारताम्बूलादिनानावस्तुनिचयेन पूजां तस्मै कारयामास ॥

---

[1] **आनायमान**, "acting as a net," nom. verb, from **आनाय**, "a net."

[2] Another nom. verb, from **शरव्य**, "a butt or mark," "having his heart a mark for the god with the unequal number (five) of arrows."

राजवाहनोऽप्येवमचिन्तयन् नूनमेषा पूर्व्वजन्मनि मे जाया यज्ञवती नो चेदेतस्यामेवंविधो ऽनुरागो मन्मनसि न जायेत। शापावसानसमये तपोनिधेर्जातिस्मरत्वमावयोः समानमेव तथापि कालजनितविशेषसूचकैर्वाक्यैरस्याः ज्ञानमुत्पादयिष्यामि । तस्मिन् समये कोऽपि मनोरमो राजहंसः केलीविधित्सया तदुपकण्ठमगमत् । समुत्सुकया राजकन्यया मरालग्रहणे नियुक्तां बालचन्द्रिकामवलोक्य समुचितो वाक्यावसर एष इति सम्भाषणनिपुणो राजवाहनः सलीलमलपत्। सखि पुरा शाम्बो नाम कश्चिन्महीवल्लभो मनोवल्लभया सह विहारवाञ्छया कमलाकरमाप्य तत्र कोकनदकदम्बसमीपनिद्राधीनमानसं राजहंसं गृहीत्वा विसगुणेन तस्य चरणयुगलं निगडयित्वा कान्तामुखं सानुरागं विलोकयन् मन्दस्मितविकसितैककपोलमण्डलस्तामभाषत । इन्दुमुखि मया बद्धो मरालः शान्तो मुनिवदास्ते स्वेच्छयानेन गम्यतामिति । सोऽपि राजहंसः शाम्बमशपत् । महीपाल यदस्मिनम्बुजखण्डे ऽनुष्ठानपरायणतया परमानन्देन तिष्ठन्तं नैष्ठिकं मामकारणं राज्यगर्व्वेणावमानितवानसि तदेतत्पाप्मना रमणीविरहसन्तापमनुभवेति विषण्णवदनो शाम्बो जीवितेश्वरीविरहमसहिष्णुर्भूमौ दण्डवत् प्रणम्य सविनयमभाषत । महाभाग यदज्ञानेनाकरवन् तत् क्षमस्वेति । स तापसः करुणाकृष्टचेतास्तमवदत्। राजन्निहजन्मनि भवतः शापफलाभावो भवतु। मद्वचनस्यामोघतया भाविनि जनने शरीरान्तरगताया अस्याः सरसिजाक्ष्याः रसेन रमणो भूत्वा मुहूर्त्तद्वयं मच्चरणयुगलबन्ध-

नकारितया मासद्वयं शृङ्खलनिगलितचरणो रमणीवियोगविषादमनुभूय पश्चादनेककालं वल्लभया सह राज्यसुखं लभस्वेति । तदनु जातिस्मरत्वमपि तयोरन्वगृह्णात्[1] । तस्मान्मरालबन्धनं न करणीयं त्वयेति । साऽपि भर्तृदारिका तद्वचनाकर्णनाभिज्ञातस्वपुरातनजननवृत्तान्ता नूनमयं मत्प्राण वल्लभ इति मनसि जानती रागपल्लवितमानसी समन्दहासमवोचत् । सौम्य पुरा शाम्बो यज्ञवतीसन्देशपरिपालनाय तथाविधं हंसबन्धनमकार्षीत् तथा हि लोके पण्डिता अपि दाक्षिण्येन कार्य्यं कुर्वन्तीति ॥

कन्याकुमारावेवमन्योन्यपुरातनजनननामधेये परिचिते परस्परज्ञानाय साभिज्ञमुक्त्वा मनोजरागपूर्णमानसौ बभूवतुः । तस्मिन्नवसाने मालवेन्द्रमहिषी परिजनपरिवृता दुहितृकेलीविलोकनाय तद्देशमवाप । बालचन्द्रिका तु तां दूरतो विलोक्य ससम्भ्रमं रहस्यनिर्भेदभिया हस्तसञ्ज्ञया पुष्पोद्भवसेव्यमानं राजवाहनं वृक्षवाटिकान्तरितगात्रमकरोत् । सा मानसारमहिषी सखीसमेताया दुहितुर्नानाविधां विहारलीलामनुभवन्ती क्षणं स्थित्वा दुहित्रासमन्विता निजागारगमनायोद्युक्ता बभूव । मातरमनुगच्छन्त्यवन्तिसुन्दरी राजहंसकुलतिलकवाञ्छया केलीवने मदन्तिकमागतं भवन्तमकाण्ड एव विसृज्य न मया समुचितमिति जनन्यनुगमनं क्रियते तदनेन भवन्मनोनुरागोऽन्यथा मा भूदिति मरालमिव

---

[1] ग्रह, with अनु prefixed, implies, "to favour," "to bestow as a favour;" as in the text, "he conferred upon them both the faculty of remembering their former existence."

कुमारमुद्दिश्य समुचितालापकलापं वदती पुनः पुनः परिवृत्त्य दीननयना वदनं विलोकयन्ती निजमन्दिरमगात्। तत्र हृदयवल्लभकथाप्रसङ्गे बालचन्द्रिकाकथिततदन्वयनामधेया मन्मथवाणपतनव्याकुलमानसा विरहवेदनया बहुलपक्षशशिकलेव क्षामक्षामाऽऽहारादिसकलव्यापारं परिहृत्य रहस्यमन्दिरे मलयजरसक्षालितपल्लवकुसमकल्पिततल्पतलायत्ततनुलता बभूव। तत्र तथाविधावस्थामनुभवन्तीं मन्मथानलसन्तप्तां सुकुमारीं कुमारीं निरीक्ष्य खिन्नो वयस्यागणः काञ्चनकलशसञ्चितानि हरिचन्दनोशीरघनसारमिलितानि तदभिषेककल्पितानि सलिलानि विसतन्तुमयानि वासांसि च नलिनीदलमयानि तालवृन्तानि च सन्तापहरणानि बहूनि सम्पाद्य तस्याः शरीरमशिशिरयत्[1]। तदपि शीतलोपचरणं सलिलमिव तप्ततैले तदङ्गे दहनमेव समन्तादाविश्चकार। किंकर्त्तव्यतामूढां विषण्णां बालचन्द्रिकामीषदुन्मीलितेन कटाक्षवीक्षितेन वाष्पकणाकुलेन विलोक्य विरहानलोष्णनिःश्वासग्लपिताधरया नताङ्ग्या शनैः सगद्गदं व्यालापि। प्रियसखि कामः कुसुमायुधः पञ्चवाण इति नूनमसत्यमुच्यते। इयमहमसङ्ख्यैरिषुभिरनेन हन्ये[2]। सखि चन्द्रमसं वडवानलादतितापकारं मन्ये। यदस्मिन्नतः प्रविशति शुष्यति पारावारं सति निर्गते तदेववर्द्धते। दोषाकरस्य दुष्कर्म्म किं वर्ण्यते मया यदनेन निजसहोदर्य्याः पद्मालयाया

[1] Nominal verb, from शिशिर, "cool," "cold," 3d pers. sing. 1st pret.

[2] First pers. sing. pres. of हन, "to kill," in the passive voice.

गेहभूतमपि कमलं हन्यते । विरहानलसन्तप्तहृदयस्पर्शेन नूनमुष्णीकृतः स्वल्पीभवति मलयानिलः नवपल्लवकल्पिततल्पमिदमनङ्गाग्निशिखापटलमिव सन्तापं तनोस्तनोति। हरिचन्दनमपि पुरा निजयष्टिसंश्लेषवदुरगरदनलिप्तोल्वणगरलसङ्कलितमिव तापयति शरीरं । तस्मादलमलमायासेन शीतलोपचारे लावण्यजितमारो राजकुमार एवागदङ्कारो मन्मथज्वरापहरणे सोऽपि लब्धुमशक्यो मया किं करोमीति। बालचन्द्रिका मनोजज्वरावस्थापरमकष्टाङ्गतां कोमलाङ्गीं तां राजवाहनलावण्याधीनमानसामनन्यशरणामवेक्ष्यात्मन्यचिन्तयत् । कुमारः सत्वरमानेतव्यो मया नो चेदेनां स्मरणीयां गतिं नयिष्यति मीनकेतनः । तत्रोद्याने कुमारयोरन्योन्यावलोकनवेलायामसमसायकः समं मुक्तसायकोऽभूत् तस्मात् कुमारानयनं सुकरं । ततोऽवन्तिसुन्दरीरक्षणाय समयोचितकरणीयचतुरं सखीगणं नियुज्य राजकुमारमन्दिरमवाप । पुष्पबाणबाणतूणीरायमाणमानसो ऽनङ्गतप्तावयवसम्पर्कपरिम्लानपल्लवशयनमधिष्ठितो राजवाहनः प्राणेश्वरीमुद्दिश्य सह पुष्पोद्भवेन संलपन्नागतां प्रियवयस्यामालोक्य पादपमूलमन्वेषणीया लतेव बालचन्द्रिकागतेति सन्तुष्टमनाःनिटिलतटमण्डनीभवदम्बुजकोरकाकृतिलसदञ्जलिपुटामितो निषीदेति निर्दिष्टसमुचितासनासीनामवन्तिसुन्दरीप्रेषितं सकर्प्पूरं ताम्बूलं विनयेन ददतीं तां क्रान्तवृत्तान्तमपृच्छत् । तया सविनयमभाणि । देव क्रीडाभवने भवदालोकनकालमारभ्य मन्मथमथ्यमाना पुष्पतल्पादिषु

तापशमनमलब्धवती वामनेवोन्नततरुफलमलभ्य त्वदुरः-स्थलालिङ्गनसौख्यं स्मरान्धतया लिप्सुः सा स्वयमेव पत्रि-कामालिख्य वल्लभायैनामर्पयेति मां नियुक्तवती । राजकु-मारः पत्रिकां तामादाय पपाठ । सुभग कुसुमसुकुमारं जगदनवद्यं विलोक्य ते रूपं मम मानसमभिलषति त्वं चित्तं कुरु तथामृदुलं । इति पठित्वा सादरमभाषत । सखि छाया-वन्मामनुवर्त्तमानस्य पुष्पोद्भवस्य वल्लभा त्वमेव तस्या मृगी-दृशो बहिश्चराः प्राणा इव वर्त्तसे त्वच्चातुर्य्यमस्या क्रियाया-मालवालमभूत् । तदखिलं करिष्यामि नताङ्ग्या मन्मनः काठिन्यमाख्यातं यदा केलीवने कुरङ्गनयनालोचनपथम-वर्त्तन् तदेवापहृतमदीयमानसा सा स्वं मन्दिरमगात् । सा स्वचेतसो माधुर्यकाठिन्ये स्वयमेव जानाति । दुःकरः कन्यान्तः पुरप्रवेशः तदनुरूपमुपायमुपपाद्य श्वः परश्वो वा नताङ्गीं सङ्गमिष्यामि । मदुदन्तमेवमाख्याय शिरीषकुसुम-सुकुमारायाः यथा शरीरबाधा न जायेत तथाविधमुपायमा-चरेति । बालचन्द्रिका तस्य प्रेमगर्भितवचनमाकर्ण्य सन्तुष्टा कन्यापुरमगच्छत् ॥

राजवाहनोऽपि यत्र वल्लभावलोकनसुखमलभत तदुद्यानं विरहविनोदाय पुष्पोद्भवसमन्वितो जगाम । तत्र चकोरलो-चनावचितपल्लवकुसुमनिकुरम्बमहीरुहसमूहं[1] शरदिन्दुमुख्या मन्मथाराधनस्थानं च नताङ्गीपदपङ्क्तिचिह्नितं शीतलसैक-

---

[1] निकुरम्ब, "a quantity or abundance."

ततलं च सुदतीभुक्तमुक्तं च माधवीलतामण्डपान्तरपल्लवतल्पं च विलोकयन् ललनातिलकविलोकनवेलाजनितशेषाणि स्मारं स्मारं मन्दमारुतकल्पितानि वननूतनपल्लवानि मदनाग्निशिख इव चकितो दर्शं दर्शं मनोजकर्णेजपानामिव कोकिलकीरमधुकराणां क्वणितानि श्रावं श्रावं मारविकारेण क्वचिदप्यवस्थातुमसहिष्णुः परिबभ्राम। तस्मिन्नवसरे धरणीसुर एक सूक्ष्मचित्रनिवसनः स्फुरन्मणिकुण्डलमण्डितो मुण्डितमस्तकमानवसमेतश्चतुरवेषमनोरमो यदृच्छया समागतः समन्ततोऽभ्युल्लसत्तेजोमण्डलं राजवाहनमाशीर्वादपूर्वकं ददर्श। राजा सादरं को भवान् कस्यां विद्यायां निपुण इति तं पप्रच्छ। स च विद्येश्वरनामधेयोहमैन्द्रजालिकविद्याकोविदो विविधदेशेषु राजमनोरञ्जनाय भ्रमन्नुज्जयिनीमद्यागतोऽस्मीति शशंस। पुनरपि राजवाहनं सम्यगालोक्याऽस्यां लीलावनौ पाण्डुरतानिमित्तं किमिति साभिप्रायं विहस्यापृच्छत्। पुष्पोद्भवश्चेन्द्रजालिके निजकार्य्यकरणं तर्कयन्नेवमादरेण बभाषे। ननु सतां सख्यस्याभाषणपूर्व्वतयाचिरं रुचिरभाषणो भवानस्माकं प्रियवयस्यो जातः सुहृदामकथ्यं किमस्ति। केलीवनेऽस्मिन् वसन्तमहोत्सवायागताया मालवेन्द्रसुताया राजनन्दनस्यास्य चाकस्मिकसन्दर्शनेऽन्योन्यानुरागातिरेकः समाजायत। सततसम्भोगसिद्ध्युपायाभावेनासावीदृशीमवस्थामनुभवतीति। विद्येश्वरो लज्जाभिरामं राजकुमारमुखमभिवीक्ष्य विरचितमन्दहासो व्याजहार। देव भवदनुचरे मयि तिष्ठति तव कार्य्यमसाध्यं किमस्ति। अहमिन्द्रजालविद्यया

मालवेन्द्रं मोहयन् पौरजनसमक्षमेव तत्तनयापरिणायं रचयित्वा कन्यान्तःपुरप्रवेशं करिष्यामीति । वृत्तान्त एष राजकन्यायै सखीमुखेन पूर्व्वमेव कथयितव्य इति । सन्तुष्टमना महीपतिरनिमित्तं मित्रं प्रकटीकृतकृत्रिमक्रियापाटवं विप्रलम्भकृत्रिमप्रेमसहजसौहार्द्दवेदिनं तं विद्येश्वरं सबहुमानं विससर्ज ॥

अथ राजवाहनो विद्येश्वरस्य क्रियापाटवेन फलितमिव मनोरथं मन्यमानः पुष्पोद्भवेन सह स्वमन्दिरमुपेत्य सादरं बालचन्द्रिकामुखेन निजवल्लभायै महीसुरक्रियमाणं सङ्गमोपायं वेदयित्वा कौतुकाकृष्टहृदयः कथमिमां क्षपां क्षपयामीति चिन्तयन्नतिष्ठत् । परेद्युः प्रभाते विद्येश्वरो रसभावगीतिरीतिगतिचतुरस्तादृशेन महता निजपरिजनेन सह राजभवनद्वारान्तिकमुपेत्य दौवारिकनिवेदितनिजवृत्तान्तः सहसोपगम्य सप्रमाणमैन्द्रजालिकः समागत इति द्वास्थैर्विज्ञापितेन तद्दर्शनकुतूहलाविष्टेन समुत्सुकावरोधसहितेन मालवेन्द्रेण समाहूयमानो विद्येश्वरः कक्ष्यान्तरं प्रविश्य सविनयमाशिषं दत्वा तदनुज्ञातः परिजनताड्यमानेषु वाद्येषु नदत्सु गायकीषु मदकलकोकिलामञ्जुलध्वनिषु समधिकरागरञ्जितसमाजिकमनोवृत्तिषु पिच्छिकाभ्रमणेषु[1] सपरिवारः परिवृढं[2]

---

[1] Jugglers and conjurors, especially if religious mendicants also, commonly carry a brush made of the tail feathers of the peacock, पिच्छिका.

[2] परिवृढं may mean "violently." Going round rapidly is a common practice with Indian conjurors.

भ्रामयन्मुकुलितनयनः क्षणमतिष्ठत् । तदनु विषमं विष-मुल्वणं वमन्तः फणालङ्करणा रत्नराजिनीराजितराजमन्दि-राभोगा भोगिनो भयं जनयन्तो निश्चेरुः । गृध्राश्च बहवस्तुण्डै-रहिपतीनादाय दिवि समाचरन् । ततो ऽग्रजन्मा नरसिंहस्य हिरण्यकशिपोर्दैत्येश्वरस्य विदारणमभिनीय महदाश्चर्य्यान्वितं राजानमभाषत । राजन्नवसानसमये भवता शुभसूचकं द्रष्टुमु-चितं । ततः कल्याणं परम्परावाप्तये भवदात्मजाकारायास्त-रुण्या निखिललक्षणोपेतस्य राजनन्दनस्य विवाहः कार्य्य इति तदवलोकनकुतूहलेन महीपालेनानुज्ञातः स सङ्कल्पि-तार्थसिद्धिसम्भावनसम्फुल्लवदनः सकलमोहजनकमञ्जनं लो-चनयोर्निक्षिप्य परितो व्यलोकयत् । सर्व्वेषु तदैन्द्रजालिक-मेवकर्म्मेति तदद्भुतं पश्यत्सु रागपल्लवितहृदयेन राजवाहनेन पूर्व्वसङ्केतसमागतामनेकभूषणभूषिताङ्गीमवन्तिसुन्दरीं वैवा-हिकमन्त्रतन्त्रनैपुण्येनाग्निं साक्षीकृत्य संयोजयामास । क्रिया-वसाने सतीन्द्रजालपुरुषाः सर्व्वे गच्छन्तु भवन्त इति द्विजन्म-नोच्चैरुच्यमाने सर्व्वे मायामानवा यथायथमन्तर्भावं गताः । राजवाहनो ऽपि पूर्व्वसङ्कल्पितेन गूढोपायचातुर्य्येणैन्द्रजालि-कपुरुषवत्कन्यापुरं प्रविवेश । मालवेन्द्रो ऽपि तदद्भुतं मन्य-मानस्तस्मै वाडवाय प्रचुरतरं धनं दत्वा विद्येश्वर त्वमिदानीं साधयेति तं विसृज्य स्वयमन्तर्मन्दिरं जगाम । ततो ऽवन्ति-सुन्दरी प्रियसहचरीपरिवारवल्लभोपेता सुन्दरीमन्दिरं ययौ । एवं दैवमानुषबलेन मनोरथसाफल्यमुपेतो राजवाहनः

सरसमधुरचेष्टाभिः शनैः शनैः हरिणलोचनाया लज्जामपनयन् रहो विस्रम्भमुपजनयन् संलापे तदनुलापपीयूषपानलोलुभश्चित्रचित्रं चित्तहारिणं चतुर्द्दशभुवनवृत्तान्तं श्रावयामास ॥

इति श्रीमदाचार्य्यमहाकविदण्डिनः कृतौ दशकुमारचरिते ऽवन्तिसुन्दरीपरिणयो नाम पञ्चम उच्छ्वासः ॥

॥ पूर्व्वपीठिकेयं समाप्ता ॥

दशकुमारचरिते राजवाहनचरितं नाम प्रथम उच्छ्वासः ॥

श्रीः ॥ श्रुत्वा तु भुवनवृत्तान्तमुत्तमाङ्गना विस्मयविकसिताक्षी सस्मितमिदमभाषत । दयित त्वत्प्रसादादद्य मे चरितार्था श्रोत्रवृत्तिरद्य मे मनसि तमोपहस्त्वया दत्तो ज्ञानप्रदीपः । पक्कमिदानीं त्वत्पादपद्मपरिचर्य्याफलं । अस्य च त्वत्प्रसादस्य किमुपकृत्य प्रत्युपकृतवती भवेयं । अभवदीयं हि नैव किञ्चिन्मत्सम्बद्धं[1] । अथ वास्त्येवास्यापि जनस्य क्वचित्प्रभुत्वं । अशक्यं हि मदिच्छया विना सरस्वतीमुखग्रहणोच्छेषणीकृतो दशनच्छद एष चुम्बयितुमम्बुजासनास्तनतटोपभुक्तमुरःस्थलं चैतदालिङ्गयितुमिति[2] ॥ ततः प्रियोरसि प्रावृडिव नभस्युपास्तीर्णगुरुपयोधरमण्डला प्रौढकन्दलीमुकुलमिव रूढरागरूषितं चक्षुरुल्लासयन्ती बर्हिबर्हावलीविडंबिना कुसुमचन्द्रकशोरेण[3] मधुकरकुलव्याकुलेन केशकलापेन

---

[1] "There is nothing belonging to me मत्सम्बद्धं which is not yours" अभवदीयं.

[2] दशनच्छद एष. "This lip," च्छद्, being in the nominative, rejecting य् substituted for Visarga, Gr. r. 41. उरःस्थलमेतद्, "that breast:" the infinitives चुम्बयितुं and आलिङ्गयितुं, under the influence of अशक्यं, have the sense of the passive. The whole passage, which is somewhat obscure, has this purport: "Without my consent, this lip, which is the relique of the salute of the mouth of Saraswati (the goddess of eloquence), can not be kissed, nor can that breast to which Lakshmí has been pressed, be embraced by any other." The commentator says this identifies Rájaváhana with Vishnu, agreeably to the verse वागीशा यस्य वदने लक्ष्मीर्यस्य च वक्षसि, "on whose countenance dwells Vágísá (Saraswati), and on whose bosom Lakshmí."

[3] "Decorated with crescents of flowers;" her hair: forming an additional analogy to the peacock's tail बर्हिबर्ह, which it surpasses in beauty.

स्फुरदरुणकिरणकेसरकरालं[1] कदम्बमुकुलमिव कान्तस्याधरम-णिमधीरमाचुचुम्ब । तदारम्भस्फुरितया च रागवृत्त्या भूयो भूयो प्रावर्त्ततातिमात्रचित्रोपचारशीफरो[2] रतिप्रबन्धः । प्रसुप्त-योस्तु तयोः स्वप्ने बिसगुणनिगडितपादो जरठः कश्चिज्जाल-पादः[3] प्रत्यदृश्यत प्रत्यबुध्येतां चोभौ । अथ तस्य राजकुमारस्य कमलमूढशशिकिरणरज्जुदामभिर्गृहीतमिव[4] रजतशृङ्खलोप-गूढं चरणयुगलमासीत् । उपलभ्यैव च किमेतदित्यतिपरित्रा-सविह्वला मुक्तकण्ठमाचक्रन्द[5] राजकन्या । येन तत्सकलमेव राजकन्यान्तःपुरमग्निपरीतमिव पिशाचोपहतमिव वेपमा-नमनिरूप्यमाणतदात्वायतिविभागं[6] मगण्यमानरहस्यरक्षास-मयमवनितलविप्रविध्यमानगात्रमाक्रन्द[7] विदीर्य्यमाणकण्ठ-मश्रुस्रोतोऽवगुण्ठितकपोलतलमाकुलीबभूव । तुमुले चास्मि-न्ननियन्त्रितप्रवेशाः किङ्किमिति सहसोपसृत्य विविशुरन्तर्वं-शिकाः[8] पुरुषा ददृशुश्च तदवस्थं राजकुमारं । तदनुभावनिरुद्ध-निग्रहेच्छास्तु ते सद्य एव तमर्थं चण्डवर्म्मणे निवेदयाञ्चक्रुः ॥

---

[1] The reddish अरुणकिरण filaments of the kadamba blossom (nauclea kadamba) denote the colour of the lip. C. substitutes बन्धूक, "pentapetes," which bears a red flower.

[2] शीफरः स्फीतरम्ययोः, "Ajayapála."

[3] "A swan." A. and C. have जरठजालपादः; the other two as in the text.

[4] "As if seized by chains of the beams of the moon, mistaking him (Rájaváhana) for the white lotus," कमलमूढशशिन्.

[5] "With loosened throat," "aloud."

[6] अनिरूप्यमाणतदात्वायतिविभागं. The distinction of present (तदात्व) and future (आयति) being disregarded (by them).

[7] Throwing themselves upon the ground.

[8] The attendants on the inner apartments.

सोऽपि कोपादागत्य निर्दहन्निव दहनगर्भया दृशा निशम्योत्पन्नप्रत्यभिज्ञः[1] कथं स एवैष मदनुजमरणनिमित्तभूतायाः पापाया बालचन्द्रिकायाः पत्युरत्यभिनिविष्टवित्तदर्पस्य वैदेशिकवणिक्पुत्रस्य पुष्पोद्भवस्य मित्रं। रूपमत्तः कलाभिमानी नैकविधविप्रलम्भोपायपाटवावर्ज्जितमूढपौरजनाध्यारोपितवितथदेवतानुभावः[2] कपटधर्म्मकञ्चुको निगूढपापशीलश्चपलो ब्राह्मणब्रुवः। कथमिवैनमनुरक्ता मादृशेष्वपि पुरुषसिंहेषु सावमाना पापेयमवन्तिसुन्दरी। पश्यतु पतिमद्यैव शूलावतंसितमियमनार्य्यशीला कुलपांसनी। इति निर्भर्त्सयन् भीषणभ्रुकुटिदूषितललाटः काल इव काललोहदण्डकर्कशेन बाहुदण्डेनावलंब्य हस्ताम्बुजे रेखाम्बुजरथाङ्गलाञ्छने[3] राजपुत्रं सरभसमाचकर्ष। स तु स्वभावधीरः सर्व्वपौरुषातिभूमिः सहिष्णुतैकप्रतिक्रियां देवीमेव तामापदमवधार्य्य स्मर तस्या हंसगामिनि हंसकथायाः सहस्व वासु[4] मासद्वयमिति प्राणपरित्यागरागिणीं प्राणसमां समाश्वास्य रिपुवश्यतामयासीत् ॥

अथ विदितवार्त्तावार्त्तौ[5] महादेवीमालवेन्द्रौ जामातर-

---

[1] उत्पन्नप्रत्यभिज्ञः, "recollection was produced in him:" he recognised Rajáváhana as the friend of Pushpodbhava.

[2] आवर्ज्जित is said to mean वशीकृतः; the whole compound implies, "One whose divine (or superior) nature is falsely ascribed to him by the foolish people of the city, overcome by his dexterity in contriving various kinds of deception."

[3] "Bearing the marks or lines of the swan and the lotus (his hands), fanciful lines indicative of good fortune."

[4] वासु, vocative of वासू, "a girl," "a young woman."

[5] विदितवार्त्तौ, "having heard the news, were आर्त्तौ grieved."

साकारपक्षपातिना[1]वात्मत्यागोपन्यासेनारिणा जिघांस्यमानं[2] ररक्षतुः । न शेकतुस्तु तमप्रभुत्वादुत्तारयितुमापदः । स किल चण्डशीलश्चण्डवर्म्मा सर्व्वमिदमुदन्तजातं राजराजगिरौ तपस्यते दर्पसाराय सन्दिश्य सर्व्वमेव पुष्पोद्भवकुटुम्बकं सर्व्वस्वहरणपूर्व्वकं सद्य एव बन्धने क्षिप्त्वा कृत्वा च राजवाहनं राजकेसरिकिशोरकमिव दारुपञ्जरनिबद्धमूर्द्धजजाललीनचूडामणिप्रभावविक्षिप्तक्षुत्पिपासादिखेदञ्च[3] तमवधूतदुहितृप्रार्थनस्याङ्गराजस्योद्धरणायाङ्गानभियास्यन्ननन्यविश्वासान्निनाय रुरोध च बलभरदत्तकम्पश्चम्पां[4] । चम्पेश्वरोऽपि सिंहवर्म्मा सिंह इवासह्यविक्रमः प्राकारं भेदयित्वा महता बलसमुदायेन निर्गत्य स्वप्रहितदूतव्राताहूतानां साहाय्यदानायातिसत्वरं प्रापततां धरापतीनामचिरकालभाविन्यपि सन्निधावदत्तापेक्षः साक्षादिवावलेपो वपुष्मानक्षमापरीतः प्रतिबलं प्रतिजग्राह । जगृहे[5] च महति सम्पराये क्षीणसकलसैन्यमण्डलः प्रचण्ड प्रहरणशतभिन्नमर्म्मा सिंहवर्म्मा करिणः करिणमवप्लुत्यातिमानुषप्राणबलेन चण्डवर्म्मणा । स च तद्दुहितर्य्यम्बालिकायामबलारत्नसमाख्यातायामतिमात्राभिलाषः प्राणैरेनं न

---

1 "Becoming his partisans through his beauty."

2 Part. of the passive of the desiderative form of हन्, "to kill."

3 "Protected from hunger and thirst by the power of the jewel of his crest hidden among his hair." See p. 22.

4 This is variously read: A. B. वलभरदन्तकम्पः, C. वलभरदत्तैकम्पः, and D. E. वलभरदत्तकम्पः. The last is perhaps the best, "by whom the trembling (of the earth) was occasioned by the multitude of his army."

5 Third pers. sing. redup. pret. pass. v. "he was taken."

व्ययूयुजत्[1]। अपि त्वनीनयदपनीताशेषशल्यमकल्पसन्धो[2] बन्धनगृहं। अजीगणच्च[3] गणकसङ्घैरद्यैव क्षपावसाने विवाहनीया राजदुहितेति। कृतकौतुकमङ्गले च तस्मिन्नेकपिङ्गाचलात्[4] प्रतिनिवृत्यैणजङ्घो नाम जङ्घाकरिकः[5] प्रभवतो दर्पसारस्य प्रतिसन्देशमावेदयत्। अयि मूढ किमस्ति कन्यापुरदूषकेऽपि कश्चित् कृपावसरः। स्थविरः स राजा जरावलुप्यमानावमानचित्तो दुश्चरितदुहितृपक्षपाती यदेव किञ्चित् प्रलपति त्वयापि किं तदनुमत्या स्थातव्यं। अविलंबितमेव तस्य कामोन्मत्तस्य चित्रवधवार्त्ताप्रेषणेन श्रवणोत्सवोऽस्माकं विधेयः सा च दुष्टकन्या सहानुजेन कीर्त्तिसारेण निगडितचरणचारके[6] निरोद्धव्येति। तच्चाकर्ण्य प्रातरेव राजभवनद्वारे स दुरात्मा कन्यापुरदूषकः सन्निधापयितव्यः चण्डपोतकश्च मातङ्गपतिरुचितकल्पनोपपन्नस्तत्रैव[7] समुपस्थापनीयः। कृतविवाहकृत्यश्चोत्थायाहमेव तमनार्य्यं तस्य हस्तिनः कृत्वा क्रीडनकं तदधिरूढ एव गत्वा शत्रुसाहाय्यकाय प्रत्यासीदतो

---

[1] The pret. indef. of the causal of युज्, "to join," with वि prefixed, "he did not cause him to be disjoined (from life) to be put to death:" so also णी, "to lead," is in the same tense, "he caused him to be taken," "he sent him."

[2] This is explained अचिन्त्यप्रतिज्ञः. It implies, apparently, "disregarding the will" either of the princess or her father.

[3] "He caused to be announced"—3d pers. sing. indef. pret. causal form of गण, to count; to compute the proper hour for any rite—to be proclaimed "by the Gaṅakas," astrologers.

[4] Kailása, the mountain of Ekapinga (Kuvera).

[5] "A runner," "a messenger."

[6] चारकं बन्धनालयः.

[7] कल्पना is here used in the sense of "elephant-trappings."

राजन्यकस्य सकोशवाहनस्यावग्रहणं करिष्यामीति पार्श्वचरानवेक्षाञ्चक्रे ॥

निन्ये[1] चासावहन्यन्यस्मिन्नुन्मिषत्येवोषोरागे राजपुत्रो राजाङ्गणं रक्षिभिरुपतस्थौ च क्षुरितगण्ड[2]श्चण्डपोतः । क्षणे च तस्मिन् मुमुचे तदङ्घ्रियुगलं रजतशृङ्खलया । सा चैनं चन्द्रलेखाछविः काचिदप्सरोरूपिणी भूत्वा प्रदक्षिणीकृत्य प्राञ्जलिर्व्यजिज्ञपत् । देव दीयतामनुग्रहार्द्रश्चित्तमहमस्मि सोमरश्मिसम्भवा सुरतमञ्जरी नाम सुरसुन्दरी । तस्या मे नभसि नलिनलुब्धमुग्धकलहंसानुबद्धवक्त्रायास्तन्निवारणक्षोभविच्छिन्नविगलिता हारयष्टिर्यदृच्छया जातु हैमवते सरसि मन्दोदके मग्नोन्मग्नस्य महर्षेर्मार्कण्डेयस्य मस्तके मणिकिरणद्विगुणितपलितमपतत् । पातितश्च कोपितेन तेन मयि शापः । पापे भजस्व लोहजातिमजातचैतन्या सतीति । स पुनः प्रसाद्यमानस्त्वत्पादपद्मद्वयस्य मासद्वयमात्रं सन्दानतामेत्य निस्तरणीयामिमामापदमपरिक्षीणशक्तित्वं च पञ्चेन्द्रियाणामकल्पयत् । अनल्पेन च पाप्मना रजतशृङ्खलीभूतां मामैक्ष्वाकस्य राज्ञो वेगवतः पौत्रः पुत्रो मानसवेगस्य वीरशेखरो नाम विद्याधरः शङ्करगिरौ समध्यगमत् । आत्मसात्कृता च तेनाहमासम् । अथासौ पितृप्रयुक्ते वैरे वर्त्तमाने विद्याधरचक्रवर्त्तिनि वत्सराजवंशवर्द्धने नरवाहनदत्ते

---

1 Third pers. sing. redup. pret. passive v. णी, "to lead," "he, the prince, was led."

2 "Having the ichor (indicative of his being savage or morose) dropping (क्षुरित) from his temples," गण्ड.

विरसाशयस्तदपकारक्षमोऽयमिति[1] तपस्यता दर्प्पसारेण सह समसृज्यत। प्रतिश्रुतं च तेनास्मै स्वस्वसुरवन्तिसुन्दर्य्याः प्रदानं। अन्यदा तु वियति व्यवदायमानचन्द्रिके[2] मनोरथप्रियतमामवन्तिसुन्दरीं दिदृक्षुरवशेन्द्रियस्तदिन्द्रमन्दिरद्युतिकुमारीपुरमुपासरत्। अन्तरितश्च तिरस्करिण्या विद्यया तां तदा त्वदङ्गोपाश्रयां सुप्तगात्रीं त्रिभुवनसर्गयात्रासंहारसंश्रिताभिः कथाभिरमृतस्यन्दनीभिः प्रत्यानीयमानरागपूरां न्यरूपयत्। स प्रकुपितोऽपि त्वदनुभावप्रतिबद्धनिग्रहान्तराध्यवसायः समालिङ्गितेतरेतरमत्यन्तसुखप्रसुप्तयोर्युवयो र्दैवदत्तोत्साहः पाण्डुलोहशृङ्खलात्मना मया पादपद्मयोर्युगलं तव निगडयित्वा सरोषरभसमपासरत्। अवसितश्च ममाद्य शापस्तच्च[3] मासद्वयं तव पारतन्त्र्यं। प्रसीदेदानीं किं करवाणीति प्रणिपतन्तीं वार्त्तयानया मत्प्राणसमानां समाश्वासयेति व्यादिश्य विससर्ज[4] ॥

तस्मिन्नेव क्षणान्तरे हतोहतश्चण्डवर्म्मा सिंहवर्म्मदुहितु-

---

[1] "Cherishing hatred विरसाशयः against Naraváhanadatta, the son of Vatsa." Both those princes are the chief persons in the collection of tales called the Kathá Sarit-ságara, of which the first part has been published by Professor Brockhaus, and must have been the heroes of popular narrative long before, if the Megha Dúta be a work of the age of Vikramáditya, as the story of Vatsa and the princess Vásavadattá is there alluded to.

[2] "In the sky bright with clear moonlight." व्यवदायमान is the pres. part. of the passive of दै, "to cleanse," with वि and अव prefixed.

[3] B. has मच्च, which is allowable, but the others agree in तच्च.

[4] The sentence seems to require one or two words to complete the sense; as, प्रणिपतन्ती उवाच, or प्रणिपतन्तीं तां राजपुत्रो विससर्ज: most of the copies agree in leaving प्रणिपतन्ती in the nominative without a verb, and all in omitting any specification of the speaker in the last clause. Such elliptical construction is not uncommon in Sanscrit composition.

रत्नालिकायाः पाणिस्पर्शरागप्रसारिते बाहुदण्ड एव बलवदवलंब्य सरभसमाकृष्य केनापि दुष्करकर्म्मकारिणा तस्करेणैकेनैव नखर[1]प्रहारेण राजमन्दिरोद्देशं च शवशतमयमापादयन्नचकितगतिरसौ विहरतीति वाचः समभवन् ॥ श्रुत्वा चैतत् तमेव मत्तहस्तिनमुदस्ता[2]धोरणो राजपुत्रो ऽधिरुह्य रंहसोत्तमेन राजभवनमभ्यवर्त्तत । स्तम्बेरमरयसावधूतपत्तिदत्तवर्त्मा च प्रविश्य वेश्माभ्यन्तरमदभ्रा[3]भ्रनिर्घोषगम्भीरेण स्वरेणाभ्यधात् । कः स महापुरुषो येनैतन्मानुषमात्रदुष्करं महत्कर्म्मानुष्ठितं । आगच्छतु स मया सहेमं मत्तहस्तिनमारोहतु । अभयमेव तस्य मदुपकण्ठवर्त्तिनो देवदानवैरपि विगृह्ला[4]नस्येत्यवदत् । निशम्यैवं स पुमानुपोढहर्षो निर्गत्य कृताञ्जलिराक्रम्य सज्ञाकुञ्चितं कुञ्जरगात्रमसक्तमध्यरुक्षत् । आरोहन्तमेवैनं निर्व्वर्ण्य हर्षोत्फुल्लदृष्टिरये प्रियसखो ऽयमपहारवर्म्मैवेति पश्चान्निसीदतो ऽस्य बाहुदण्डयुगलमुभयभुजमूलप्रवेशितमग्रे ऽवलंब्य स्वमङ्गमालिङ्गयामास स्वयं च पृष्ठतो वलिताभ्यां भुजाभ्यां पर्य्यवेष्टयत् । तत्क्षणोपसंहृतालिङ्गनव्यतिकरश्चापहारवर्म्मा चापचक्रकण[5]पकर्प्पण[6]प्रासपट्टिशमुश-

---

1 The Nakhara is said to be denominated Bánk in the vernacular dialect, नखरः वांक् इति भाषायां. *Bánk*, in Hindi and Mahratta, signifies "a crooked dagger."

2 उदस्ताधोरणः, "by whom the elephant driver was displaced."

3 अदभ्राभ्रः महामेघः.

4 विगृह्लान, "warring or contending with" ग्रह, with वि prefixed.

5 लोहस्तम्भस्तु कणपः, "Vaijayantí Kosha." A. has कणयः.

6 कर्प्पणः is said to be a lance or dart with a curved point कुटिलाग्रः, and पट्टिशः one with a broad blade, विशालाग्रः.

लतोमरादिप्रहरणजालमुपयुञ्जानो बलावलिप्तान् प्रतिबलवीरान् बहुप्रकारयोधिनः परिक्षिपतः क्षितौ विचिक्षेप । क्षणेन चाद्राक्षीत् तदपि सैन्यमन्येन समन्ततोऽभिमुखमभिधावता बलनिकायेन परिक्षिप्तं ॥

अनन्तरञ्च कश्चित् कर्णिकारगौरः कु[1]रुविन्दसवर्णकुन्तलः कमलकोमलपाणिपादः कर्णचुम्बिदुग्धधवलस्निग्धनीललोचनः कटितटनिविष्टरत्ननखरः पट्टनिवसनः कृशाकृशोदरोरःस्थलः कृतहस्ततया रिपुकुलमिषुवर्षेणाभिवर्षन् पादाङ्गुष्ठनिष्ठुरावघृष्टकर्णमूलेन प्रजविना गजेन सन्निकृष्य पूर्वोपदेशप्रत्ययादयमेव स देवो राजवाहन इति कृताञ्जलिः प्रणम्यापहारवर्म्मणि निविष्टदृष्टिराचष्ट । त्वदादिष्टेन मार्गेण सन्निपातितमेतदङ्गराजसाहाय्यदानायोपस्थितं राजन्यकं । अरिबलञ्च विहतवि[2]ध्वस्तं स्त्रीबालहार्य्यशस्त्रं वर्त्तते किमन्यत् कृत्यमिति । हृष्टस्तु व्याजहारापहारवर्म्मा देव दृष्टिदानेनानुगृह्यतामयमाज्ञाकरः सोऽयमप्यहमेवामुना रूपेण धनमित्राख्यया चान्तरितो मन्तव्यः स एवाद्य निर्गमय्य बन्धनादङ्गराजमपवर्ज्जितं कोशवाहनमेकीकृत्यास्म[3]द्गृह्येण चामुना

---

[1] The commentator seems to be at a loss how to explain कुरुविन्द. A. has कुरुविन्दो मेघनामेत्यमर। हववररणे सस्ये च कुरुविन्द इत्यनेकार्थध्वनिमञ्जरी. As the person Dhanamitra is of a fair complexion, with light blue eyes, he may be supposed to have light hair, that which is of the colour of the cyperus grass, or of corn, a sort of straw colour. In MSS. B. कुरुविन्द is explained नीलगुच्छः, "blue grass," "Cyperus," and नीलमणिः, "a blue gem," but no authority for the latter is cited.

[2] "Dispersed," "scattered," इतस्ततो गतं.

[3] "To be received by us (as friends the assembled kings)," राजन्यकं.

सह राजन्यकेनैकान्ते सुखोपविष्टमिह देवमपतिष्ठतु यदि न दोष इति। देवोऽपि यथा ते रोचत इति तमाभाष्य गत्वा च तन्निर्दिष्टेन मार्गेण नगराद्बहिरतिमहतो रोहिण[1]द्रुमस्य कस्यचिन्मूले क्षौमा[2]वदातसैकते गङ्गातरङ्गपवनपातशीतले तले द्विरदादवततार। प्रथमसमवतीर्णेनापहारवर्म्मणा च स्वहस्तसत्वरसमीकृते मातङ्ग इव स्फटिकमय इव भागीरथीपुलिनमण्डले सुखं निषसाद। तथा निषण्णञ्च तमुपहारवर्म्मार्थपालप्रमतिमित्रगुप्तमन्त्रगुप्तविश्रुतै मैथिलेन च प्रहारवर्म्मणा काशीभर्त्रा च कामपालेन चम्पेश्वरेण सिंहवर्म्मणा सहोपागत्य धनमित्रः प्रणिपपात। देवोऽपि हर्षाविद्धमभ्युत्थितः कथं समस्त एष मित्रगणः समागतः को नामायमभ्युदय इति कृतयथोचितोपचारानुत्पीडिततरं परिरेभे। काशीपतिमैथिलाङ्गराजांश्च सुहृन्निवेदितान् पितृवदपश्यत्। तैश्च हर्षकम्पित[3]पलितं सरभसोपगूढः परमभिननन्द। ततः प्रवृत्तासु प्रतिकथा[4]सु प्रियवयस्यगणानुयुक्तः स्वस्य च सोमदत्तपुष्पोद्भवयोश्चरितमनुवर्ण्य सुहृदामपि वृत्तान्तं क्रमेण श्रोतुं कृतप्रस्तावस्तांश्च तदुक्तावन्व[5]युक्त तेषु प्रथमः प्राहस्म किलापहारवर्म्मा॥

॥ इति दशकुमारचरिते प्रथम उच्छ्वासः ॥

---

[1] The Indian fig or banian-tree affording a characteristic and appropriate hall of audience among its many stems.

[2] "White or clear as silk."

[3] B. C. E. have हर्षनिर्भृततरं, "with exceeding delight."

[4] D. E. have प्रीतिसङ्कथासु.

[5] Third pers. indef. pret. atm. pada of युज, "to join," with अनु prefixed, "to direct or appoint."

॥ द्वितीय उच्छ्वासोऽपहारवर्म्मचरितं ॥

देव त्वयि तदावतीर्णे द्विजोपकारायासुरविवरं त्वद-
न्वेषणप्रसृते च मित्रगणेऽहमपि महीमटन्नङ्गेषु गङ्गातटे
वहिश्चम्पायाः कश्चिदस्तितपः प्रभावोत्पन्नदिव्यचक्षुर्मरीचि-
र्नाम महर्षिरिति कुतश्चित् संलपतो जनसमाजादुपलभ्या-
ऽमुतो बुभुत्सु[1]स्त्वद्गतिं तमुद्देशमगमम्। न्यशा[2]मयञ्च तस्मिन्ना-
श्रमे कस्यचिच्चूतपोतकस्यछायायां कमप्युद्विग्नवर्णं तापसं।
अमुना चातिथिवदुपचरितः क्षणं विश्रान्तः क्वासौ भगवा-
न्मरीचिस्तस्मादहमुपलि[3]प्सुः प्रसङ्गप्रोषितस्य सुहृदो गतिमा-
श्चर्य्यज्ञानविभवो हि स महर्षिर्मह्यां विश्रुत इत्यवादिषम्।
अथासावुष्णमायतञ्च निश्वस्याशशंसे। आसीत्तादृशो मुनि-
रस्मिन्नाश्रमे तमेकदा काममञ्जरी नामाङ्गपुर्य्यवतंसस्था-
नीया वारयुवतिरश्रुविन्दुतारकितपयोधरा सनिर्वेदमभ्येत्य
कीर्णशिखण्डास्तीर्णभूमिरभ्य[4]वन्दिष्ट। तस्मिन्नेव च क्षणे
मातृप्रमुखस्तद्दासीवर्गः सानुक्रोशमनुप्रधावितस्तत्रैवावि[5]छि-
न्नपातमपतत्। स किल कृपालुस्तञ्जनमार्द्रयागिराश्वास्या-

---

[1] "Desirous to know," derivative of the desiderative of बुध, "to know."

[2] First pers. sing. 1st pret. of शम, verb, 10th conj., with नि prefixed, "to see."

[3] Verbal derivative from the desiderative form of लभ, "to gain." Gr. 296, "Desirous to obtain," or, here, "to know."

[4] Third pers. sing. indef. pret. atm. pada of वदि, with अभि prefixed, "to salute with reverence."

[5] "Crowding, or coming in a confused heap or crowd." अविछिन्न, "indiscriminate," and पातं, "going," used adverbially.

न्निकारणं तां गणिकामपृच्छत् । सा तु सव्रीडेव सविषादेव
सगौरवेव चाब्रवीत् । भगवन्नैहिकस्य सुखस्य भाजनं जनो-
ऽयमामुष्मिकाय श्वोवसीयायार्त्ताभ्युपपत्तिवित्त[1]योर्भगवत्पा-
दयोर्मूलं शरणमभिप्रपन्न इति । तस्यास्तु जनन्युदञ्जलिः
पलितशारशिखण्डबन्धस्पृष्ट[2]मुक्तभूमिरभाषत । भगवन्नस्यां
मे दोष एषा वो दासी विज्ञापयति दोषश्च मम स्वाधिका-
रानु[3]ष्ठापनं । एष हि गणिकामातुरधिकारो दुहितुर्जन्मनः
प्रभृत्येवाङ्गक्रि[4]या तेजोबलवर्णमेधासंवर्द्धनेन दो[5]षाग्निधा-
तुसाम्यकृता मिताहारेण शरीरपोषणमापञ्चमाद्वर्षात् पि-
तुरप्यनतिदर्शनं जन्मदिनेषु पुण्यदिनेषुचोत्सवोत्तरोमङ्गलवि-
धिः अध्यापनमनङ्गविद्यानां साङ्गानां नृत्यगीतवाद्यनाट्य
चित्रास्वाद्यगन्धपुष्पकलासु लिपिज्ञानवचनकौशलेषु च
सम्यग्विनयनं शब्दहेतु[6]समयविद्यासु वार्त्तामात्रावबोधन-
माजीवज्ञाने क्रीडाकौशले सजीवनिर्जीवासु च द्यूतकलास्व-

---

[1] "Renowned (वित्त) for kindness (अभ्युपपत्ति) to those who are anxious for future felicity," श्वोवसीयाय आर्त्ता.

[2] From this and the preceding similar passage कीर्णशिखण्डास्तीर्णभूमिः, it appears that having a suit to prefer a woman let her hair loose, and that it was long enough even when tinted with grey पलितशार to reach the ground.

[3] The meaning is somewhat obscure here, but it seems to be "Holy Sir." "This your slave Kámamanjarí represents to you that I am to blame towards her: my fault is the discharge of my duty."

[4] Acts tending to promote bodily perfection, health, grace, beauty, and the like.

[5] दोष here means "the humors of the body," wind, bile, phlegm; अग्नि, "the digestive faculty;" धातु, "an element of the body," flesh, marrow, blood, &c.

[6] शब्द, "grammar," हेतु, "logic," समय, "philosophy:" "a superficial instruction in these," वार्त्तामात्रावबोधनं.

भ्यन्तरीकर[1]णमभ्यन्तर[2]कलासु वैश्वासिकजनात् प्रयत्नेन प्रयोगग्रहणं यात्रोत्सवादिष्वादरप्रसाधितायाः स्फीत[3]परिबर्हायाः प्रकाशनं प्रसङ्गवत्यां सङ्गीतादिक्रियायां पूर्वसङ्गृहीतैर्ग्राह्यवाग्भिः सिद्धिलम्भ[4]नं दिङ्मुखेषु तत्तच्छिल्पवि[5]त्तकैर्यशःप्रख्यापनं कार्त्तान्तिका[6]दिभिः कल्याणलक्षणोपघोषणं । पीठमर्द्दविटविदूषकैर्भिक्षुकीभिश्च नागरिकपुरुषसमवायेषु रूपशीलमाधुर्य्यप्रस्तावना । युवजनमनोरथलक्ष्यप्रभूतायाः प्रभूततमेन शुल्केनावस्थापनं । स्वतो रागान्धाय तद्भावदर्शनोन्मादिताय वा जातिरूपवयोऽर्थशक्तिशौचत्यागदाक्षिण्यशिल्पमाधुर्य्योपपन्नाय स्वतन्त्राय प्रदानमधिकगुणायास्वतन्त्राय प्राज्ञतमायाल्पेनापि बहुव्यपदेशेनार्प्पणं । अस्वतन्त्रेण वा गान्धर्व्वसमागमेन गुरुभ्यः शुल्कापहरणं । अलाभेऽर्थस्य कामस्वीकृते स्वामिन्यधिकरणे वा साध[7]नं । रक्तस्य हि दुहित्रैकचारिणीव्रतानुष्ठापनं । नित्यनैमित्तिकप्रीतिदाय-

---

[1] "Through knowledge."

[2] "Arts of wantonness."

[3] Exhibition of her at public festivals in handsome attire स्फीतपरिबर्हा रम्योत्तरीयः and well ornamented, आदरप्रसाधिता, स्वलङ्कृता.

[4] Securing success in the performance of songs and the like by the words or plaudits of partisans (ग्राह्य) previously agreed upon.

[5] Spreading of her fame by those celebrated in such arts; that is, by musicians and the like.

[6] "Palmists," "fortune tellers," and the like, कार्त्तान्तिकः सामुद्रिकज्ञः, "Vaijayantí," from कृतान्त, "the end of what is done," "fate," "fortune."

[7] The explanation given by the Commentator A. is, अलाभेऽर्थस्य धूर्त्तात् स्वशुल्कालाभे कामस्वीकृते मैत्र्यादङ्गीकृते नतु धनादिनाङ्गीकृते स्वामिनि प्रभौ मामाध्यक्षे अधिकरणे नागरिकसं सदिसाधनं उच्चावचवागादिभिः स्वोपयुक्तविधानं. It implies, apparently, compelling payment before a friendly magistrate or a court of libertines.

कतया हृतशिष्टानां गम्य[1]धनानां चित्रैरुपायैरपहरणं । अद-
दता लुब्धप्रायेण च विगृह्यासनं । प्रतिहस्तिप्रोत्साहनेन
लुब्धस्य रागिणस्त्यागशक्तिसन्धुक्षणं[2] । असारस्य वाक्सन्त-
क्षणैर्लोकोपक्रोशनैर्दुहितृनिरोधनैर्व्रीडोत्पादनैरन्याभियोगैरप-
मानैश्चापवाहनं । अर्थदैरनर्थप्रति[3]घातिभिश्चानिन्द्यैरन्यैरनु-
बद्धार्थान[4]नर्थसंशयान् विचार्य्य भूयो भूयः संयोजनमिति ।
गणिकायाश्च गम्यं प्रतिसज्जतैव न सङ्गः सत्यामपिप्रीतौ न
मातुर्मातृ[5]काया वा शासनातिवृत्तिः । एवं स्थितेऽनया
प्रजापतिविहितं स्वधर्म्ममुल्लङ्घ्य क्वचिदागन्तुके रूपमात्रधने
विप्रयूनि स्वेनैव धनव्ययेन रममाणया माससमात्रमत्यवाहि[6] ।
गम्यजनश्चभूयानर्थयोग्यः प्रत्याचक्षमाणयानया प्रकोपितः
स्वकु[7]टुंबकञ्चावसादितं । एषा कुमतिर्न्नकल्याणीति निवा-
रयन्त्यां मयि वनवासाय कोपात्प्रस्थिता सा चेदियमहार्य्य-
निश्च[8]या सर्व्व एष जनो ऽद्यैवानन्यगतिरनशनेन [9]संस्थास्यत

---

[1] गम्य here means, "a libertine." गम्यी विटः पाल्लविको भुजङ्ग इति भागुरिः.

[2] The words least usual in this passage are thus explained: आसनं क्षेपणं, प्रतिहस्तिन्, आसन्नगृहवेश्यापतिः, सन्धुक्षणं, उद्दीप्तीकरणं.

[3] उपद्रवनिवारकैः, "with those who keep off calamity," or राजवदाज्ञाशक्तिप्रधानैः, "chief persons, whose commands are like those of the king."

[4] "Having repeatedly weighed the certainty of their fulfilling their engagements." अनुबद्धोऽर्थो येषु तादृशाननर्थसंशयान् भूयो भूयो विचार्य्य; that is, अनुरक्तास्मत्कन्या तादृशेन स्वगृहे रुद्धा चेत् कथमस्माभिर्लभ्येति, "supposing the damsel being loved by any one should be detained in his house, how is she to be recovered?"

[5] मातृका, "maternal grandmother;" मातुर्माता तु मातृका, "Vaijayantí."

[6] Third pers. sing. indef. pret. passive verb of वह, "to bear," here with अति, "to be spent or passed."

[7] कुटुंबकं, अनुकम्पायां कन्, "her poor relations."

[8] अहार्य्यनिश्चया, "immoveably resolved."

[9] संस्थास्यते, मरिष्यति.

इत्यवादीत् । अथ सा वारयुवतिस्तेन तापसेन भद्रे ननु दुःखाकरो ऽयं वनवासस्तस्य फलमपवर्गः स्वर्गो वा प्रथमस्तु तयोः प्रकृष्टज्ञानसाध्यः प्रायो दुःसम्पाद एव द्वितीयस्तु सर्व्वस्यैव सुलभः कुलधर्म्मानुष्ठायिनस्तदशक्यारम्भादुपरम्य मातुर्मते वर्त्तस्वेति सानुकम्पमभिहिता । सा तु प्रत्यवादीत् । यदि भगवत्पादमूलमशरणं शरणमस्तु मम कृपणायाः[1] हिरण्यरेता[2] एव इत्युदमनायत[3] । स तु मुनिरनुविमृश्य गणिकामातरमवदत् सम्प्रति गच्छ गृहान् प्रतीक्षस्व कानिचिद्दिनानि यावदियं सुकुमारा सुखोपभोगसमुचिता सत्यरण्यवासोद्वेजिता भूयो भूयश्चास्माभिर्विबोध्यमाना प्रकृतावेव स्थास्यतीति । तथेति तस्याः प्रतियाते स्वजने सा गणिका तमृषिमलघुभक्तिर्धौतोज्ज्वलमनीयवासिनी नात्याहतशरीरसंस्कारा वनतरुपोतकालवालपूरणैर्देवतार्च्चनकुसुमोच्चया[4]वचयप्रयासैरनेकविकल्पोपहारकर्म्मभिः कामशासनार्थे च गन्धमाल्यधूपदीपनृत्यगीतवाद्यादिभिः क्रियाभिरेकान्ते च त्रिवर्ग[5]सम्बन्धिनीभिः कथाभिरध्यात्मवादैश्चानुरूपैरल्पीयसैव कालेनान्वरञ्जयत् । एकदा च रहसि रक्तं तमुपलक्ष्य मूढः खलु लोको यत् सहधर्म्मेणार्थकामावपि गणयतीति किञ्चिद-

---

[1] आ technically डाच् is inserted.

[2] A name of fire.

[3] "So distracted was she," a nominal verb, from उन्मनस्, "out of one's mind," 3d pers. sing. 1st pret.

[4] उच्चय, is said to be gathering fruit, flowers, &c. by climbing up a tree. अवचय, "is their collection near the ground."

[5] The three objects of life, passion, wealth, virtue.

स्मयत। कथय वासु केनांशेनार्थकामातिशायी धर्म्मस्तवाभिप्रेत इति प्रेरिता मरीचिना सलज्जा मन्थरमारभताभिधातुम्। इतः किल जनाद्भगवतस्त्रिवर्गबलाबलज्ञानं।[1] अथ वा तदपि प्रकारान्तरं दासजनानुग्रहस्य भवतु श्रूयतां। ननु धर्म्माहतेऽर्थकामयोरनुत्पत्तिरेव तदनपेक्ष्यैवधर्म्मो निवृत्तिसुखप्रसूतिहेतुरात्मनः समाधानमात्रसाध्यश्च सोऽर्थकामवद्बाह्यसाधनेषु नात्यायतते[2]। तत्त्वदर्शनोपवृंहितस्तु यथाकथञ्चिदनुष्ठीयमानाभ्यां नार्थकामाभ्यां बाध्यते बाधितोऽपि चाल्पायासप्रतिसमाहितस्तमपि दोषं निर्हृत्य श्रेयसेऽप्यनल्पाय कल्पते। तथा हि पितामहस्य तिलोत्तमायामभिलाषः भवानीपतेर्मुनिपत्नीसहस्रदूषणं पद्मनाभस्य षोडशसहस्रान्तःपुरविहारः प्रजापतेः स्वदुहितर्य्यतिप्रणयप्रवृत्तिः शचीपतेरहल्याजारता शशाङ्कस्य गुरुतल्पगमनमशुंमालिनो वडवालङ्घनमनिलस्य केसरिकलत्रसमागमः वृहस्पतेरुतथ्यभार्य्याभिसरणं पराशरस्य दासकन्यादूषणं पाराशर्य्यस्य भ्रातृदारसङ्गतिरत्रेर्मृगीसमागम इति। अमराणाञ्च तेषु तेषु कार्य्येष्वासुरविप्रलम्भनानि[3] ज्ञानबलान्नधर्म्मपीडामावहन्ति धर्म्मपूते च मनसि नभसीव न जातु रजोऽनुषज्यते। तन्मन्ये नार्थकामौ धर्म्मस्य शततमीमपि कलां स्पृशत इति। श्रुत्वैतदृषिरु

---

1 This is put interrogatively: "Is it from such a person that knowledge of the comparative force of the three objects can be expected by your reverence?"

2 Third pers sing. pres. of यत, "to make exertion," with अति and आ, intensitives, prefixed.

3 "Demoniacal misdoings," आसुरविप्रलम्भनानि, अकृत्यचरणानि.

दीर्णरागवृत्तिरभ्यधात् । अयि विलासिनि साधु पश्यसि न धर्म्मस्तत्त्वदर्शिनां विषयोपभोगेनोपरुध्यत इति किन्तु जन्मनः प्रभृत्यर्थकामवार्त्तानभिज्ञा वयं । ज्ञेयौ चेमौ किंरूपौ किंपरिवारौ किंफलौ वेति सा त्ववादीत् । अर्थस्तावदर्ज्जनवर्द्धनरक्षणात्मकः कृषिपाशुपाल्यवाणिज्यसन्धिविग्रहादिःपरिवारस्तीर्थप्रतिपादनं[1] फलञ्च कामस्तु विषयातिसक्तचेतसोः स्त्रीपुंसयोर्निरतिशयसुखस्पर्शविशेषः परिवारस्तु तस्य यावदिह रम्यमुज्ज्वलं वस्तु फलं पुनः परमाह्लादनं परस्परविमर्द्दजन्मस्मर्य्यमाणमधुरमुदीरताभिमानमनुत्तमसुखमपरोक्षं स्वसंवेद्यमेव । तस्यैव कृते विशिष्टस्थानवर्त्तिनः कष्टानि तपांसि महान्ति दानानि दारुणानि युद्धानि भीमानि समुद्रलङ्घनादीनि मानवाः समाचरन्तीति । निशम्यैतन्निमित्तबलान्नु तत्पाटवान्नु स्वबुद्धिमाद्यान्नु स्वनियममनादृत्य तस्यामसौ प्रासजत् । सा सुदूरं मूढात्मानं च तं प्रवहणेन नीत्वा पुरमुदारशोभया राजवीथ्या स्वभवनमनैषीत् । अभूच्च घोषणा श्वः कामोत्सव इति । उत्तरेद्युः स्नातानुलिप्तमारचितमुण्डमालमारब्धकामिजनवृत्तनिवृत्तस्ववृत्ताभिलाषं क्षणमात्रे गते तया विना दूयमानचित्तं तमृषिमृद्धिमता राजमार्गेणोत्सवसमाजे नीत्वा क्वचिदुपवनोद्देशे युवतिशतपरिवृतस्य राज्ञः सन्निधौ समासदत् तत्र स्मितमुखेन तेन भद्रे भगवता सह निषीदेत्यादिष्टा सविभ्रममकृतप्रणामा सस्मितं न्यषीदत् ॥

---

[1] "Spending on proper objects," तीर्थप्रतिपादनं, सत्पात्रदानं.

तत्र काचिदुत्थाय बद्धाञ्जलिरुत्तमाङ्गना देव जितानयाहं तद्दास्यमद्यप्रभृत्यभ्युपेतं मयेतिप्रभुं प्राणंसीत्[1] । विस्मयहर्षमूलश्च कोलाहलो लोकस्योदजिहीत[2] । हृष्टेन च राज्ञा महार्हैरलङ्कारैर्महता च परिबर्हेणानुगृह्य विसृष्टा वारमुख्याभिः पौरमुख्यैश्च गणशः प्रशस्यमाना स्वभवनमगत्वैव तमृषिमभाषत। भगवन्नयमञ्जलिश्चिरमनुगृहीतोऽयं दासजनः स्वार्थ इदानीमनुष्ठेय इति । स तु रागादर्शनिनिहत इवोद्भ्राम्याब्रवीत् प्रिये किमेतत् कुत इदमौदासीन्यं क्व गतस्तव मय्यसाधारणानुराग इति । अथ सा सस्मितमवादीद् भगवन् ययाद्य राजकुले मत्तः पराजयोऽभ्युपेतस्तस्याश्च मम च कस्मिन् सङ्घर्षे महर्षिं मरीचिमावर्ज्जितवतीव श्लाघस[3] इति तयाहमधिक्षिप्ता दास्यपणबन्धेन चास्मिन्नर्थे प्रावर्त्तिषि । सिद्धार्था चास्मि त्वत्प्रसादादिति । स तया तथावधूतो दुर्म्मतिः कृतानुशयः शून्यवन्न्यवर्त्तिष्ट । यस्त्वयैवं कृतस्तपस्वी तमेव माम् महाभाग मन्यस्व स्वशक्तिविषक्तं[4] रागमुद्धृत्य तयैव बन्धक्या महद्वैराग्यमर्प्पितं[5] । अचिरादेव शक्य आत्मा त्वदर्थसाधनक्षमः कर्त्तुं । अस्यामेव तावद् वसाङ्गपुर्य्यां चम्पायामिति । अथ तन्मनश्च्युततमःस्पर्शभियेवास्तं रविरगाहषि

---

[1] Third pers. sing. indef. præt. of णम, "to bow," with प्र prefixed.

[2] "Arose," 3d pers. 1st præt. atm. pada of हा, "to go," verb, 3d conjugation, with उद् prefixed, ई substituted for the radical vowel, Gr. p. 213.

[3] "Thou boastest; having kept clear of or avoided the sage Marichi."

[4] "United with its own faculty," that of beguiling प्रलोभनशक्तिः an epithet of राग passion.

[5] B. has अर्च्चितं, D. अर्थितं, the reading of A. seems preferable.

मुक्तश्चरागः सन्ध्यात्वे मास्फुरत् तत्कथादत्तवैराग्याणीव कमलवनानि समकुचन् । अनुमतमुनिशासनस्त्वहममुनैव सहोपास्य सन्ध्यामनुरूपाभिः कथाभिस्तम[1]नुशय्य। नीतरात्रिः प्रत्युन्मिषत्युदयप्रस्थदावकल्पे कल्पद्रुमकिशलयावधीरिण्यरुणार्च्चिषि तन्नमस्कृत्य नगरायोदचलम् । अदर्शञ्च मार्गाभ्याशवर्त्तिनः कस्यापि क्षपणकविहा[2]रस्य वहिर् विविक्ते रक्ताशोकखण्डे निषसमसृ[3]ष्टसमाधिमाधिक्षीणमग्रगण्यमनमाभिरूपाणां कृपणवर्णकमपि क्षपणकं । उरसि चास्य शिथिलितमलनिचयान्मुखान्निपतितानश्रुविन्दूनलक्षयम् । अप्राक्षञ्चान्तिकोपविष्टः क्व तपः क्व च रुदितं न चेद्रहस्यमिच्छामि श्रोतुं शोकहेतुमिति । सोऽब्रूत सौम्य श्रूयतामहमस्यामेव चम्पायां निधिपालितनाम्नः श्रेष्ठिनो ज्येष्ठसूनुर्वसुपालितो नाम वैरूप्यान्मम विरूपक इति प्रसिद्धिरासीत्। अन्यश्चात्र सुन्दरक इति यथार्थनामा कलागुणैः समृद्धो वसुना नातिपुष्टोऽभवत्। तस्य च मम च वपुर्वसुनी निमित्तीकृत्य वैरं वैरोपजीविभिः पौरधूर्त्तैरुदपाद्यत । त एव कदाचिदावयोरुत्सवसमाजे स्वयमुत्पादितमन्योन्यावमानमूलमधिक्षेपवचनव्यतिकरमुपशमय्य न वपुर्वसु वा पुंस्त्वमूलमपि

---

[1] तमनुशय्य, तेनसह शयित्वा, "having been made or invited to sleep in his hermitage."

[2] "A Buddhist monastery," an accuracy of specification corroborative of the affirmed date of the composition.

[3] A. has स्मृष्ट, the other copies have अस्पृष्टसमाधि; the first is an error, but it is difficult to attach any satisfactory sense to the second. असृष्ट, "undismissed," "uninterrupted," will agree better with समाधि, "religious or profound meditation."

त् प्रकृष्टगणिकाप्रार्थ्ययौवनो हि यः स पुमान्। अतो युव-
तिललामभूता काममञ्जरी यं कामयते स हरतु सुभगपता-
कामिति व्यवास्थापयन्नभ्युपेत्य[1]ावां प्राहिणुव[2] तस्यै दूतान्।
अहमेव किलामुष्या स्मरोन्मादहेतुरासम्। आसीनयो-
श्चावयोर्मामेवोपगम्य सा नीलोत्पलमयमिवापाङ्गदामाङ्गे
मम मुञ्चती तं जनमपत्रपयाधोमुखं व्यधत्त। सुभगेन च
मया स्वधनस्य स्वगृहस्य स्वगुणस्य स्वदेहस्य स्वजीवितस्य
च सैवेश्वरी कृता कृतश्चाहमनया मलमल्लक[3]शेषः हृतसर्वस्व-
स्तयापवाहितः प्रपद्य लोकोपहासलक्ष्यतां। अक्षमश्च धिक्कृ-
तानि पौरवृद्धानां षोढुमिहैव[4]ायतने मुनिनैकेनोपदिष्ट उत्त-
मो वर्त्मा सुकर एष वेषो वेशनिर्गतानामित्युद्दीर्णवैराग्यस्त-
दपि कौपीनमजहाम्[5]॥ अथ पुनः सङ्कीर्णमलपङ्कः प्रबलके-
शलुञ्चनव्यथः प्रकृष्टतमक्षुत्पिपासादिदुःखः स्थानासनशयन-
भोजनेषु द्विप इव नवग्रहो बलवतीभिर्यन्त्रणाभिरुद्वेजितः
प्रत्यवामृषम्[6]। अहमस्मि द्विजाति[7]रस्वधर्म्मो ममैष पाष-

---

[1] "Having agreed."

[2] First pers. dual, 1st præt. of हि, "to go," verb, 5th conjugation, with प्र prefixed, "to send for."

[3] मलमल्लकं, "the cloth worn round the loins," कौपीनं मलमल्लकमिति वैजयन्ती.

[4] The copies, except A., have इह जैनायतने; but that, there is little doubt, is an addition of the transcriber, unless it be considered synonymous with बौद्ध. The Jains do not live together in convents like the Buddhists.

[5] हा, meaning "to abandon," is regularly conjugated, Gr. 213,

[6] First pers. sing. 1st præt. of मृष, "to endure," with प्रति and अव prefixed, "to suffer beyond endurance." The MSS. have मृश, but unless considered, as it sometimes is, as synonymous with मृष, the context requires the latter: one verb is very commonly written for the other.

[7] "As a Vaisya," "he is one of the twice-born."

गडपथावतारः श्रुतिस्मृतिविहितेनेव वर्त्मना मम पूर्व्वजाः प्रावर्त्तन्त मम तु मन्दभाग्यस्य निन्द्यवेशममन्दुःखायतनं हरिहरहिरण्यगर्भादिदेवतापवादश्रवणनैरन्तर्य्यात् प्रेत्यापि निरय[1]फलमफलं विप्रलम्भप्रायमीदृशमिदमधर्म्मवर्त्म धर्म्मवत् समाचरणीयमासीदिति प्रत्याकलितस्वदुर्न्नयः पिण्डी[2]खण्डं विविक्तमेतदासाद्य पर्य्याप्तमश्रु मुञ्चामीति । श्रुत्वा चैतदनुकम्पमानोऽब्रुवम् । भद्र क्षमस्व कञ्चित्कालमत्रैव निवस निजेन द्युम्ने[3]नासावेव वेश्या यथा त्वां योजयिष्यति तथा यतिष्ये सन्त्युपायास्तादृशाः ॥

इत्याश्वास्य तमभ्युत्थितोऽहं नगरमाविशन्नेव चोपलभ्य लोकवादाल्लुब्धसमृद्धपूर्णं पुरमिति अर्थानां नश्वरत्वञ्च प्रदर्श्य प्रकृतिस्थानमून्विधास्यन् कर्णी[4]सुतप्रहिते पथि मतिमकरवम् । अनुप्रविश्य च द्यूतसमाजमक्षधूर्त्तैः समगंसि[5] । तेषां पञ्चविंशतिप्रकारासु सर्व्वासु द्यूताक्षाश्रयासु कलासु कौशलमक्षभूमिहस्तादिषु चात्यन्तदुरुपलक्षाणि कूटकर्म्माणि तन्मूलानि सावलेपान्यधिक्षेपवचनानि जीवितनिरपेक्षाणि संरम्भविचेष्टितानि सभिकप्रत्ययव्यवहारान् न्यायबलप्रताप प्रायानङ्गीकृतार्थसाधनक्षमान् बलिषु सान्त्वनानि दुर्बलेषु

---

[1] निरयो नरकः.

[2] A name of the A'soka.

[3] द्युम्नेन धनेन.

[4] Karṅísuta is said to be the author of the science of stealing, स्तेयशास्त्रप्रवर्त्तकः. The name is a synonym of Kansa, king of Mathurá, in the Trikáṅdu Sesta, 2. 8. 23. The commentator quotes the nameHáravalí, but erroneously.

[5] First pers. sing. indef. præt. atm. pada, Gr. p. 262.

भर्त्सितानि पक्ष[1]रचनानैपुण्यमुच्चाव[2]चान्युपप्रलोभनानि [3]ग्लह-प्रभेदवर्णनानि द्रव्यसंविभागौदार्य्यमन्तरान्तराश्[4]लीलप्रायान् कलकलानित्येतानि चान्यानि चानुभवन्नतृ[5]प्तिमध्यगच्छम् । अहमस्य किञ्चित्प्रमाद[6]दत्तशारे क्वचित् कितवे प्रतिकितवस्तु निर्दहन्निव क्रोधताम्रया दृशा मामभिवीक्ष्य शिक्षयसि रे द्यूतवर्त्म हासव्याजेनास्[7]तामयमशिक्षितो वराकस्त्वयैव ताव-द्विचक्षणेन देविष्यामीति । द्यूताध्यक्षानुमत्या व्यत्य[8]सजत् । मया जितश्चासौ षोडशसहस्राणि दीनाराणां । तदर्द्धं सभिकाय सभ्येभ्यश्च दत्वार्द्धं स्वीकृत्योदतिष्ठम् । उदतिष्ठंश्च तत्रगतानां हर्षगर्भाः प्रशंसालापाः प्रार्थयमानसभिकानुरोधाच्च तदगारे-ऽभ्य[9]वहारविधिमकरवम् । यन्मूलश्च मे दुरोदरावतारः स मे विमर्द्दको नाम विश्वास्यतरं द्वितीयं हृदयमासीत् ॥

तन्मुखेन च सारतः कर्म्मतः शीलतश्च सकलमेव नगरमव-धार्य्य धूर्ज्जटिकण्ठकल्मषकालतमे तमसि नीलवसनार्द्धो[10]रुक-

---

[1] Dexterity in securing the support (of those present).

[2] "Various," "deceptions," अनेकानि मोहनानि.

[3] "Gaming," "play," or "a stake," "a wager."

[4] अश्लील, "the unlucky."

[5] "I was never satiate," "I could never sufficiently admire."

[6] प्रमाददत्तशारे, "by whom a piece was carelessly or badly moved," referring no doubt to the common game of pachís, which is played something like draughts or backgammon.

[7] Third pers. sing. imper. of आस, "to sit," verb, 2d conjugation, "let this unskilful fellow sit out."

[8] Third pers. sing. 1st præt. of षञ्ज, "to embrace," with वि and अति prefixed, "he played or engaged in the game," व्यतिपञ्जोऽभवत्: all the other copies agree in the reading; or व्यत्यसजाव, or still preferably व्यत्यसजावहि, "we two played together," would seem to be more appropriate.

[9] अभ्यवहारो भोजनं.

[10] A short coat coming to the half अर्द्ध or middle of the thigh ऊरु.

परिहितो बहुतीक्ष्णकौक्षेयकः[1] फणिमुखकाकलीसन्दंशकपुरुषशीर्षकयोगचूर्णयोगवर्त्तिकामानसूत्रकर्कटकरज्जुदीपभाजनभ्रमरकरण्डकप्रभृत्यनेकोपकरणयुक्तो[2] गत्वा कस्यचिल्लुब्धेश्वरस्यगृहे सन्धिञ्छित्त्वा पटभाक्ष[3]सूक्ष्मछिद्रालक्षितान्तर्गृहप्रवृत्तिरव्यथो निजगृहमिवानुप्रविश्य नीविं[4] सारमहतीमादाय निरगाम् । नीलनीरदनिकरपीवरतिमिरनिविडपीडितायां राजवीथ्यां झटिति शतहृदासम्पातमिव क्षणमालोकमलक्षयम् । अथासौ नगरदेवतेव नगरमोषरोषिता निःसम्बाधवेलायां निःसृता सन्निकृष्टा काचिदुन्मिषद्भूषणा युवतिराविरासीत् । कासि वासु क्व यासीति सदयमुक्ता सगद्गदा मामवादीत् । आर्य्य पुर्य्यामस्यामर्य्यवर्य्यः[5] कुवेरवल्लभनामा

---

[1] A sword.

[2] Some of the Upakarañas or apparatus are sufficiently intelligible, others may require explanation. According to the commentary, the फणिमुख, "snake's head," is a sort of spade, commonly called सवरी; काकली, a sort of musical instrument with a low tone, the use of which is to discover if a person is asleep or awake; सन्दंशक is a pair of tongs or pincers, commonly सडसी; पुरुषशीर्षक is an artificial head of wood; योगचूर्णं is magic powder, possibly the योगरोचना of the Mrichchakati, of which Servillaka says, अनयाहि समालब्धं न मां द्रक्ष्यन्ति रक्षिणः शस्त्रञ्च पतितं गात्रे रुजं नोत्पादयिष्यति; so योगवर्त्तिका, a magic candle, which lights up every place; मानसूत्रं, a measuring line; कर्कटक, that which resembles a crab—a hook—is not explained, and it may be connected with रज्जु, a rope with a hook at the end, by which to climb up; भ्रमरकरण्ड is a box containing a bee or moth, which puts out a light that may be burning. Besides the magic powder, we have in the Mrichchakati also the प्रमाणसूत्रं, "the measuring line," and the प्रतिपुरुषः, which is perhaps the artificial head thrust forward to see if any one is about to seize the intruder, the दीप a lamp, and the आग्नेयः कीटः for extinguishing a light.—Mrich. Act 3. Scene 1.

[3] पटभाक्षः प्रेक्षणसाधनं, "means or instrument of seeing or espial."

[4] "The principal or most valuable treasure," मूलधनं.

[5] A chief Vaisya.

वसति। अस्यहं तस्य कन्या। मां जातमात्रां धनमित्रनाम्ने ऽत्यायैव कस्मैचिदिभ्य[1]कुमारायान्वजानाज्ञार्य्यां मे पिता। स पुनरमुष्मिन्नत्युदारतया पित्रोरन्ते वित्तैर्निजैः क्रीत्वैवार्थिवर्गा द्दारिद्र्यं दरिद्रति सति। अथ उदारक इति च प्रीतलोकाधिरोपितापरश्लाघ्यनाम। निवारयत्येव तस्मिन् मां तरुणीभूतामधन इत्यदत्वाऽर्थपतिनाम्ने कस्मैचिदितरस्मै यथार्थनाम्ने सार्थवाहाय दित्सति मे पिता। तदमङ्गलमद्य किल प्रभाते भावीति ज्ञात्वा प्रागेवप्रियतमदत्तसङ्केता वञ्चितस्वजना निर्गत्य बाल्याभ्यस्तेन वर्त्मना मन्मथाभिसरा[2] तदागारमभिसरामि। तन्मां मुञ्च गृहाणैतज्ञाण्डमित्युन्मुच्य मह्यमर्प्पितवती। दयमानश्चाहमब्रुवम् एहि साध्वि त्वां नये[3] त्वत्प्रियतममिति त्रिचतुराणि पदान्युदचलम्। आपतच्च दीपिका[4]लोकपरिलुप्यमानतिमिरभारं यष्टिकृपाणपाणिनागरिकबलमनल्पं। प्रवेपमानां कन्यकामवदम् भद्रे मा भैषीरस्त्यसिद्वितीयो मे बाहुरपितु मृदुरयमुपायस्त्वदपेक्षया चिन्तितः। शयेयं भावितविषवेगविक्रियस्त्वयाप्यमी वाच्याः निशि वयमिमां पुरीं प्रविष्टाः दष्टश्च ममैष नायको दर्वीकरे[5]णामुष्मिन् सभागृहकोण एव। यदि वः कश्चिन्मन्त्रवित्कृपालुः स एव तमनुजीवयेन्ममप्राणानाहरेदनाथाया इति। साऽपि

---

[1] इभ्य, "A wealthy man."

[2] "Having love for my associate," अभिसरः सहायः.

[3] First pers. sing. imper. atm. pada of णी, "to conduct," "let me conduct."

[4] The commentators say दीपिका means "a lamp or light borne in the hand," "a torch."

[5] दर्व्वीकरेण सर्प्पेण.

बाला गत्यन्तराभावाद् भयगद्गदस्वरा वाष्पदुर्दिनाक्षी बद्ध-वेपथुः कथङ्कथमपि गत्वा मदुक्तमन्वतिष्ठत्। अशयिषि चाहं भावितविषविक्रियस्तेषु कश्चिन्नरेन्द्राभिमानी[1] मां निवर्ण्य मुद्रातन्त्वमन्त्रध्यानादिभिश्चोपक्रम्या[2]कृतार्थो गत एवायं का-लदष्टस्तथाहि स्तब्धश्यावववर्णाङ्गं रुद्धादृष्टिः शान्त एवोष्मा। शुचा अलं वासु श्वोऽग्निसात्करिष्यामः कोऽतिवर्त्तते दैवमिति सहेतरैः प्रायात्॥

उत्थितश्चाहमुदारकाय तां नीत्वाऽब्रुवम्। अहमस्मि कोऽपि तस्करस्त्वद्गतेनैव चेतसा सहायभूतेन त्वामिमामभिस-रन्तीमन्तरोपलभ्य कृपया त्वत्समीपमनैषम्। भूषणमिदमस्या इत्यंशुपटलपाटितध्वान्तजालं तदर्प्पितवान्। उदारकस्तु तदादाय सलज्जं च सहर्षञ्च ससम्भ्रमञ्च मामभाषत। आर्य्य त्वयैवेयमस्यां निशि प्रिया मे दत्ता वाक् च पुनर्ममापहृता। तथा हि न जाने वक्तुं त्वत्कर्म्मैतदद्भुतमिति। ननु ते स्वशी-लमद्भुतवत्प्रतिभाति। नैवमन्येनापि कृतपूर्व्वमिति प्रतिनि-यतैव वस्तुशक्तिः। न हि त्वय्यन्यदीया लोभादयः। त्वयाद्य साधुतोन्मीलितेति तत्प्रायस्त्वत्पूर्व्वावदानेभ्यो न रोचते। दृष्टमिदानीमौदार्य्यस्य स्वरूपमिति। त्वदाशयमननुमान्य न युक्तो निश्चयः। त्वयामुना सुकृतेन क्रीतोऽयं दासजन इति।

---

[1] नरेन्द्र is here used for a doctor who administers antidotes, विषवैद्यः.

[2] "Having doctored उपक्रमश्चिकित्सा with solemn meditations, prayers, charms, and gesticulations:" the last मुद्रा is the mummery of modern mesmerism, of old familiar to the Hindus.

असारम् । अतिगरीयसा क्रीणासीति स ते प्रज्ञाधिक्षेपः । न प्रियादानस्य प्रतिदानमिदं शरीरमिति तदलाभे निधनोन्मुखमिदमपि त्वयैव दत्तं । अथ वैतावदत्रप्राप्तं रूपं । अद्यप्रभृति भर्त्तव्यो ऽयं दासजन इति मम पादयोरपतत् । उत्थाप्य चैनमुरसोपश्लिष्याभाषिषि । भद्र काद्य ते प्रतिपत्तिरिति[1] । सो ऽभ्यधत्त ॥

न शक्नोमि चैनामत्र पितुरनभ्यनुज्ञयोपयम्य जीवितुम् । अतो ऽस्यामेव यामिन्यां देशमिमं जिहासामि[2] । को वा ऽहं यथा त्वमाज्ञापयसीति । अथ मयोक्तमस्त्येतत्स्वदेशो देशान्तरमिति नेयं गणना विदग्धस्य पुरुषस्य किन्तु बालेयमनल्पसौकुमार्य्यकष्टाः प्रत्यवायभूयिष्ठाश्च कान्तारपथाः । शैथिल्यमिव किञ्चित्प्रज्ञासत्वयोरनर्थेनेदृशेन देशत्यागेन सम्भाव्यते तत्सहानया सुखमिहैव वस्तव्यमेहि नयावैनां स्वं वासमिति । अविचारानुमतेन तेन सद्यैवैनां तद्गृहमुपनीय तयैवापसर्प्पभूतया[3] तत्र मृद्भाण्डावशेषमचोरयाव । ततो निष्पत्य क्वचिन्मुषितकं निधाय[4] समुच्चलन्तौ नागरिकपुरुषसम्पाते मार्गपार्श्वशायिनम् कञ्चिन्मत्तवारणमुपरिपुरुषमाकृष्याध्यारोहाव । ग्रैवेयक[5]प्रतोदपादयुगलेन मयोत्था-

---

[1] प्रतिपत्ति is here explained by कर्त्तव्यं, "what must be done," what is your purpose?

[2] First pers. pres. desiderative form of हा, "to abandon."

[3] "A spy," "an agent or accessory."

[4] "Having concealed the stolen property."

[5] "A rope," ग्रैवेयको रज्जुः.

यमान एव पतिताधोरणः पृथुलोरःस्थलपरिणतः[1] पुरीतल्ल-
तापरीतदन्तकाण्डः स रक्षिकबलमक्षिणोत् । अध्वंसयाव
चामुनैवार्थपतिभवनं । अपवाह्य च क्वचन जीर्णोद्याने शाखा-
ग्रहिकयावातराव । स्वगृहं गतौ च स्नातौ शयनमध्यशि-
श्रियाव[2] ॥

तावदेवोदगादुदधेरुदयाचलेन्द्रपद्मरागशृङ्गकल्पं कल्पद्रुम-
हेमपल्लवापीडपाटलं पतङ्गमण्डलं उत्थाय च धौतवक्त्रौ
प्रगेतनानि मङ्गलान्यनुष्ठायास्मत्कर्म्मतुमुलं पुरमनुचरन्ता-
वशृणुव वरवधूगृहेषु कोलाहलं । अथार्थैरर्थपतिः कुबेर-
दत्तमाश्वास्य कुलपालिकाविवाहं मासावधिकमकल्पयत् ।
उपह्वरे पुनरशिक्षम् धनमित्रम् । उपतिष्ठ सखे । एकान्त एव
चर्म्मरत्नभस्त्रिकामिमां[3] पुरस्कृत्याङ्गराजमाचक्ष्व । जानात्येव
देवो नैककोटिसारस्य वसुमित्रस्य मां धनमित्रं नामैकपुत्रं ।
सोऽहं मूलहरत्वमेत्यार्थिवर्ग्गादस्यवज्ञातो मदर्थमेव संवर्द्धि-
तायां कुलपालिकायां मद्दारिद्र्यदोषात् पुनः कुबेरदत्तेन
दुहितर्य्यर्थपतये दित्सितायामुद्वेगादुज्झितुम्[4]असूनुपपौरिकं जर-
द्वनमवगाह्य कण्ठन्यस्तशस्त्रिकः केनापि जटाधरेण निवा-
र्य्यैवमुक्तः । किं ते साहसस्य मूलमिति । मयोक्तमवज्ञासौ-

---

[1] परिणतः, properly "bent," "bowed;" when applied to an elephant denotes, "one stooping to strike with his tusk," तिर्य्यग्दन्तप्रहारी.

[2] First pers. dual indef. pret. of श्रि, "to serve," with अधि prefixed, taking reduplication as well as the augment, Gr. 183.

[3] A leather bag or purse for holding jewels.

[4] Inf. of उज्झ्, "to abandon."

दर्य्यं दारिद्र्यमिति । स पुनरेवं कृपालुरन्वग्रहीत् । तात मूढोऽसि नान्यत्पापिष्ठतममात्मत्यागात् । आत्मानमात्मनानवसाद्यैवोद्धरन्ति सन्तः । सन्त्युपाया धनार्ज्जनस्य बहवो नैकश्छिन्नकण्ठप्रतिसन्धानपूर्व्वस्य प्राणलाभस्य । किमनेन सो ऽस्म्यहं मन्त्रसिद्धः साधितेयं लक्षग्राहिणी चर्म्मरत्नभस्त्रिका चिरमहमस्याः प्रसादात्कामरूपेषु कामप्रदः प्रजानामवात्स्तं मत्सखित्वयं जरसि भूमिस्वर्गमचोद्देशे प्रवेक्ष्यन्नागतस्त्वामिमां प्रतिगृहाण । मदन्यच चेयं बणिग्भ्यो वारयोषिन्मुख्याभ्यो वा दुग्धे इति हि तज्ज्ञतां[1]प्रतीतेःकिन्तु यत्सकाशादन्यायापहृतं तस्मै प्रत्यर्प्पणीयं न्यायार्जितं तु देवब्राह्मणेभ्यस्त्याज्यं । अथेयं देवतेव शुचौ देशे निवेश्याच्र्च्यमाना प्रातः प्रातः सुवर्णपूर्णैव दृश्यते स एष कल्पविधिः । इति बद्धाञ्जलिरहमतिष्ठम् । बद्धाञ्जलये मह्यमेनां दत्वा किमपि ग्रावच्छिद्रं प्राविशत् । इयं च रत्नभूता चर्म्मभस्त्रिका देवायानिवेद्य नोपजीव्येत्यानीता परं तु देवः प्रमाणमिति । राजा च नियतमेव वक्ष्यति । भद्र प्रीतो ऽस्मि गच्छ यथेच्छमेनामुपभुंक्ष्वेति । भूयश्च ब्रूहि यथा न कश्चिदेनाम् मुष्णाति तथानुगृह्यतामिति । तदप्यवश्यमसावभ्युपेष्यति । ततः स्वगृहमेत्य यथोक्तमर्थत्यागं कृत्वा दिने दिने वरिवस्यमानां स्तेयलब्धैरर्थैर्नक्तमापूर्य्य प्राह्णे लोकाय दर्शयिष्यसि । ततः कुवेरदत्तस्तृणाय मत्वार्थपतिम-

[1] The passage is somewhat obscure, but the sense is, "This bag, besides myself, is for merchants and courtesans, who shall with entire faith in it (say), 'I milk;'" that is, I take from it whatever I want.

र्थलुब्धःकन्यकया स्वयमेव त्वामुपस्थास्यति । अथ कुपितो ऽर्थपतिर्व्यवहर्त्तुमर्थगर्व्वादभियोक्ष्यते तं च भूयिष्ठैरुपायैः कौपीनावशेषं करिष्यावः स्वकं च चौर्य्यमतेनैवाभ्युपायेन सुप्रछन्नं भविष्यतीति । हृष्टश्च धनमित्रो यथोक्तमन्वतिष्ठत् । तदहरेव मन्नियोगाद्विमर्द्दको ऽर्थपतिसेवाभियुक्तस्तस्योदारके वैरमभ्यवर्द्धयत् । अर्थलुब्धश्च कुवेरदत्तो निवृत्त्यार्थपतेर्धनमित्रायैव तनयां सानुनयं प्रादित्सत[1] प्रत्यबध्नाच्चार्थपतिं ॥

एष्वेव दिवसेषु काममञ्जर्य्याः स्वसा यवीयसी रागमञ्जरी नाम पञ्चवीरगोष्ठे[2] सङ्गीतकमनुस्थास्यतीति सान्द्रादरः समागमन्नागरजनः स चाहं सह सख्या धनमित्रेण तत्र सन्न्यधिषि[3]। प्रवृत्तनृत्तायाञ्च तस्यां द्वितीयं रङ्गपीठं[4] ममाभून्मनस्तद्दृष्टिविभ्रमोत्पलवनसत्रापाश्रयश्च पञ्चशरो भावरसानां[5] सामग्र्यात्समुदितबल इव मामतिमात्रमव्यथयत् । अत्रासौ नगरदेवतेव नगरमोषरोषिता लीलाकटाक्षमालाशृङ्खलाभिर्नीलोत्पलपलाशश्यामलाभिर्मामबध्नात् । नृत्योत्थिता च सा सिद्धिलाभशोधिनी किं विलासात् किमभिलाषात्

---

[1] Third pers. sing. 1st præt. of the desiderative of दा, "wished to give."

[2] The only explanation given is, that it is a meeting of people, तत्पञ्चवीरगोष्ठं यज्जानपदंस्ततः.

[3] First pers. sing. indef. præt. atm. pada of धा, "to hold," but with सम् and नि prefixed, "to be near to," "to be present at."

[4] Some rather extravagant and not easily intelligible metaphors are here intended: "My mind (or heart) was her other stage floor रङ्गपीठं, and the awning covering सत्रापाश्रयः the lotus thicket of her glances." Performances of singing and dancing are usually exhibited in an open hall, the floor being covered by a cloth, and an awning being spread over head.

[5] Emotions and sentiments.

किमकस्मादेव न जानेऽसकृन्माम् सखीभिरप्यनुपलक्षितेनापाङ्गप्रेक्षितेन सविभ्रमोरेचितभ्रूलतामभिवीक्ष्य सापदेशञ्च किञ्चिदाविस्कृतदशनचन्द्रिकं स्मित्वा लोकलोचनमानसानुयाता प्रातिष्ठत ॥

सोऽहं स्वगृहमेत्य दुर्न्निवारयोत्कण्ठया दूरीकृताहारस्पृहः शिरःशूल[1]स्पर्शमपदिशन् विविक्ते तल्पे मुक्तैरवयवैरशयिषि। अतिनिष्णातश्च मदनतन्त्रैर्मामभ्युपेत्य धनमित्रो रहस्यकथयत्। सखे सा धन्या गणिका दारिका यामेवं भवन्मनोऽभिनिविशते तस्याश्च मया सुलक्षिता भाववृत्तिः। तामप्यचिरादयुग्मशरः शरशयने शाययि[2]ष्यति। स्थानाभिनिवेशिनोश्च वा[3]मयत्नसाध्यः समागमः। किन्तु सा किल वारकन्यका गणिका स्वधर्म्मप्रतीपगामिना भद्रोदारेणाशयेन समगिरत् गुणशुल्काहं न धनशुल्का न च पाणिग्रहणादृतेऽपि भोग्यं यौवनमिति। तच्च मुहुः प्रतिषिद्ध्याकृतार्था तज्जगिनी काममञ्जरी तन्माता च माधवसेनाराजानमश्रुकण्ठ्यौ व्यजि[4]ज्ञपतां। देव युष्मद्दासी रागमञ्जरी रूपानुरूपशीलशिल्पकौशला पूरयिष्यति मनोरथानित्यासीदस्माकं महत्याशा साद्य मूलच्छिन्ना। यदियमतिक्रम्य स्वकुलधर्म्मम् अर्थनिरपेक्षा

---

[1] Pretending a headache.

[2] Third pers. sing. fut. indef. causal of शी, "to sleep," "shall cause to repose," "shall put to rest."

[3] वाम्, "of you two," अभिनिवेशिनोः, "persevering," "resolved."

[4] Third pers. dual indef. præt. of the causal of ज्ञा, "to know," with वि prefixed, "to represent."

गुणेभ्य एव स्वं यौवनं विचिक्रीषते[1] कुलस्त्रीवृत्तमेवानुतिष्ठासति[2]। एवं सति सा चेदियं देवपाद आज्ञयाऽपि तावत्प्रकृतिमापद्येत तदा पेशलं भवेदिति । राज्ञा च तदनुरोधात्तथानुशिष्टा सत्यप्यनाश्रवैव[3] सा यदासीत्तदास्याः स्वसा माता च रुदितनिर्बन्धेन राज्ञे समगिरेतां यदि कश्चिद्भुजङ्गोऽस्मदिच्छया विनैनां बालां विलोभ्य नाशयिष्यति स तस्करवद्वध्य इति। तदेवं स्थिते धनाहृते न तत्स्वजनोऽनुमन्यते नतु धनदायासावभ्युपगच्छतीतिविचिन्त्योऽत्राभ्युपायः ॥

अथ मयोक्तं किमत्रचिन्त्यं गुणैस्तामावर्ज्य गूढमर्थैस्तत्स्वजनं तोषयिष्यामीति ततश्च काचित् काममञ्जर्य्याः प्रधानदूतीं धर्म्मरक्षितां नाम शाक्यभिक्षुकीं[4] चीवरपिण्डदानादिनोपसङ्गृह्य तन्मुखेन तया बन्धक्या पणबन्धमकरवम् । अजिनरत्नमुदारकान्मुषित्वा मया तुभ्यं देयं यदि प्रतिदानं रागमञ्जरीति सोऽहं प्रतिपन्नायाञ्च तस्यां तथा तमर्थं सम्पाद्य मद्गुणोन्मादिताया रागमञ्जर्य्याः करकिशलयमग्रहीषम् । यस्यां च निशि चर्म्मरत्नस्तेयवादस्तस्याः प्रारम्भे कार्य्यान्तरापदेशेन समाहूतेषु शृण्वत्स्वेव नागरमुख्येषु मत्प्रणिधिर्विमर्द्दकोऽर्थपतिगृह्यो नाम भूत्वा धनमित्रमुल्लङ्घ्य बह्वतर्ज्जयत् ।

---

[1] Third pers. sing. pres. desiderative form of क्री, "to buy," with वि prefixed, "to sell," "wishes to dispose of."

[2] Third pers. sing. present of the desiderative of स्था, with अनु prefixed, "to follow," "to conform to," "wishes to follow the practice of women of family."

[3] अनाश्रवा अनङ्गीकृताज्ञा ·

[4] A female Bauddha or female mendicant: the writers of this period are fond of attributing to these ladies the office described in the text.

उक्तञ्च धनमित्रेण भद्र कस्तवार्थो यत्परस्य हेतोर्मामाक्रोशसि न स्मरामि स्वल्पमपि तवापकारं मया कृतमिति । स भूयोऽपि तर्ज्जयन्निवाब्रवीत् स एष धनगर्व्वो नाम यत्परस्य भार्य्यां शुल्कक्रीतां पुनस्तत्पितरौ द्रव्येण विलोभ्य स्वां चिकीर्षसि। ब्रवीषि च स एष कस्तवापकारो मत्कृत इति। ननु प्रतीतमेवैतत् सार्थवाहस्यार्थपतेर्विमर्द्दको वहिश्चराः प्राणा इति सोऽहं तत्कृते प्राणानपि परित्यजामि ब्रह्महत्यामपि न परिहरामि। ममैकरात्रजागरप्रतीकारस्तवैषचर्म्मरत्नाहङ्कारदाहज्वरः इति । तथा ब्रुवाणश्च पौरमुख्यैः सामर्षनिषिद्धापवाहितो गतोऽभूत् । इयञ्च वार्त्ता कृत्रिमार्त्तिना धनमित्रेण चर्म्मरत्ननाशमादावुपक्षिप्य पार्थिवाय निवेदिता । स चार्थपतिमाहूयोपह्वरे पृष्टवान् । अङ्ग किमस्ति कश्चिद्विमर्द्दको नामात्रभवत इति । तेन च मूढात्मनास्ति देव परमं मित्रं कश्च तेनार्थ इति कथित राज्ञोक्तमपि शक्नोषि तमाह्वातुमिति वाढमस्मि शक्त इति निर्गत्य स्वगृहे वेशवाटे द्यूतसभायामापणे च निपुणमन्विषन् नोपलब्धवान् । कथञ्चोपलभेत स वराकः । स खलु विमर्द्दको मद्ग्राहितत्वदभिज्ञानचिह्नो मन्नियोगात्त्वदन्वेषणायोज्जयिनीं तदहरेव प्रातिष्ठत। अर्थपतिस्तु तमदृष्ट्वा तत्कृतमपराधं नाम मत्सम्बन्धीति मत्वा मोहाद्भयाद्वा प्रत्याख्याय पुनर्धनमित्रेण विभावितेन कुपितेन राज्ञा निगृह्य निगडबन्धनमनीयत ॥

तेष्वेव दिवसेषु विधिकल्पेन चर्म्मरत्नं दोग्धुंकामा काममञ्जरी पूर्व्वदुग्धं क्षपणीभूतविरूपकं रहस्युपसृत्य तदपहृतं

सर्व्वमर्थजातं तस्मै प्रत्यर्प्य सप्रत्ययञ्च बह्वनुनीय प्रत्यगमत् । सो ऽपि कथञ्चिन्निर्ग्रन्थिकग्रहान्मोचितात्मा[1] मदनुशिष्टो हृष्टतमः स्वधर्म्ममेवप्रत्यपद्यत । काममञ्जर्य्यपि कतिपयैरिवाहोभिरश्मन्तकशेषमजिनरत्नदोहाशया[2] स्वमभ्युदयमकरोत् । अथ मत्प्रयुक्तो धनमित्रः पार्थिवमिथो व्यज्ञापयत् । देव येयं गणिका काममञ्जरी लोभोत्कर्षाल्लोभमञ्जरीति लोकोपक्रोशपात्रमासीत् साद्य मुसलोलूखलान्यपि निरपेक्षं त्यजति । तन्मन्ये मच्चर्म्मरत्नलाभहेतुस्तस्याः खलु कल्पस्तादृशः । वणिग्भ्यो वारमुख्याभ्यश्च वा दुग्धे नान्येभ्य इति हि तज्ज्ञता प्रतीतिरतो ऽमुष्यामस्ति मे शङ्केति । सा सद्य एव राज्ञा सह जनन्या समाहूयत । व्यथितवर्णेनेव मयोपह्वरे कथितं नूनमार्य्ये सर्व्वस्य त्यागादितिप्रकाशादाशङ्कनीयश्चर्म्मरत्नलाभः[3] तदनुयोगायाङ्गराजेन समाहूयसे । भूयो भूयश्च निर्बद्धया त्वया नियतं निरपेक्षितो ऽस्मि तदागत्वेन नाहमपदेश्यः । ततश्च मे भावी चित्रबधः । मयि च मृते न जीविष्यत्येव ते भगिनी त्वञ्च निः स्वीभूता चर्म्मरत्नं च धनमित्रमेव प्रतिभजिष्यति । तदियमापत्समन्ततो ऽनर्थानुबन्धिनी तत्किमत्रप्रतिविधेयमिति । तया तज्जनन्या चाश्रूणि विसृज्योक्तं । अस्त्येवैतदस्मद्बालिश्यान्निर्भिन्नप्रायं रहस्यं । राज्ञश्च निर्बन्धाद् द्विचित्र-

---

[1] निर्ग्रन्थिकग्रहात्, from the doctrine of the Buddhists *Nir-granthika* may mean, "one who is freed from all restraint," or "one who denies the authority of books," that is, especially of the Vedas.

[2] "To the fire-place alone."

[3] The reading of B. and D.; A. has त्राशङ्कनीयासि चर्म्मरत्नलाभा; C. omits the verb.

तुरमतिनिह्नुत्यापि नियतमागतिरपदेश्यैवं चोरितस्य त्वयि। त्वयि च व्यपदिष्टे सर्व्वमस्मत्कुटुम्बमवसीदेत्। अर्थपतौ च तदयशो रूढं। अङ्गपुरप्रसिद्धं च तस्य कीनाशस्यास्माभिःसङ्गतम्। अमुनैतदस्मभ्यं दत्तमित्यपदिश्य वरमात्मा गोपायितुमिति[1] मामभ्युपगमय्य राजकुलमगमतां। राज्ञानुयुक्ते च नैष न्यायो वेशकुलस्य यद्दातुरपदेशः न ह्यर्थैर्न्यायार्ज्जितैरेव पुरुषा वेशमुपतिष्ठन्तीत्यसकृदतिप्रणुद्य कर्णनासाछेदोपक्षेपभीषिताभ्यां दग्धवन्धकीभ्यां स एव तपस्वी तस्करत्वेनार्थपतिरग्राह्यत[2]। कुपितेन च राज्ञा तस्य प्राणेषूद्यतदण्डः प्राञ्जलिना धममित्रेणैव प्रत्यषिध्यत। आर्य्य मौर्य्यदत्त[3] एष वरो वणिजामीदृशेष्वपराधेष्वसुभिरवियोगो यदि कुपितोऽसि हृतसर्व्वस्वो निर्वासनीयः पाप एष इति। तन्मूला धनमित्रस्य कीर्त्तिरप्रथत[4]। अप्रीयत च भर्त्ता। पटच्चरछंद[5]शेषोऽर्थपतिरर्थमत्तः सर्व्वपौरजनसमक्षं निरवास्यत। तस्य द्रव्याणां

---

[1] This is the reading of three manuscripts, A. B. D., as if the construction with वरम् were equivalent to that with शक्यं, "it is possible for our (self) to be preserved," C. has परमात्मा गोपयितव्यः.

[2] Third pers. sing. 1st præt. of the causal of the pass. of ग्रह, "to seize," "was charged with," "was made to be attacked by," "the character of a thief."

[3] We are not apprised what authority exists for this exemption from capital punishment having been granted to the mercantile class, but it is not impossible either that the exemption or the tradition of it prevailed at the date of the composition, having been accorded by the Maurya princes, whom the Puráñas consider to have been Sudras, and whom the Buddhists claim as their own, and who appear to have been hostile to the Brahmans. B. has सौर्य्यदत्त, but all the others agree in writing मौर्य्य, which is the more intelligible reading.

[4] Third pers. sing. 1st præt. of प्रथ 1st conjugation, "to be famous."

[5] C. is alone in reading छद, but it seems preferable to the छेद of the other three, "having nothing left but a covering of old cloth."

केनचिदवयवेन सा वराकी काममञ्जरी चर्म्मरत्नमृगतृष्णिकापविद्धसर्व्वस्वा सानुकम्पं धनमित्राभिचोदितेन भूपेनान्वगृह्यत । धनमित्रश्चाहनि गुणिनि[1] कुलपालिकामुपायंस्त । तदेवं सिद्धसंकल्पो रागमञ्जरीगृहं हेमरत्नपूर्णमकरवम् ॥

अस्मिंश्च पुरे लुब्धसमृद्धवर्गस्तथा मुषितः यथा कपालपाणिः स्वैरेव धनैर्मद्विश्राणितैः समृद्धीकृतस्यार्थिवर्गस्य गृहेषु भिक्षार्थमभ्रमत् । न ह्यलमतिनिपुणोऽपि पुरुषो नियतिलिखिते लेखामतिक्रमितुं । यतोऽहमेकदा रागमञ्जर्य्याः प्रणयकोपप्रशमनाय सानुनयं यापितायाः[2] प्रणयसमर्प्पितमुखमधुगण्डूषमास्वादमास्वादं मदेनास्पृश्ये । शीलं[3] हि मदोन्मादयोरमार्गेणाप्युचितकर्म्मस्वेव प्रवर्त्तनं । यदहमुपोढमदो नगरमिदमनयैकयैवशर्वर्य्या निर्द्धनीकृत्य त्वद्भवनं पूरयेयमिति प्रव्यथितप्रियतमाप्रणामाञ्जलिशपथशतातिवर्त्ती मत्तवारण इव रभसछिन्नशृङ्खलः कयाऽपि धात्र्या शृगालिकाख्ययानुगम्यमानो नातिपरिकरोऽसिद्वितीयो रंहसापरेणोदचलम् । अभिपततोऽपि नागरिकपुरुषानशङ्कमेवावगाह्य तस्कर इति तैरभिहन्यमानो नातिप्रकुपितः क्रीडन्निव मदावसन्नहस्तपातितेन निस्त्रिंशेन द्वित्रानेव हत्वा अवघूर्णमानताम्रदृष्टिरपतम् । अनन्तरमार्त्तरवान्विसृजन्ती शृगालिका

---

[1] "On a lucky day."

[2] A. and C. have **पायिता, पापिता.** The reading followed is that of B., from **या,** "to go," causal form, "soothed," "pacified," which, though not usually employed, is perhaps more intelligible than either of the other readings.

[3] **शीलं स्वभावः.** The sentence is a remark parenthetically put, "For the nature of drunkards and madmen is engaging in proper actions in an improper manner."

ममाभ्यासमगमत् । अबध्ये[1] चाहमरिभिरापदा तु मदापहारिण्या सद्य एव बोधितस्तत्क्षणोपजातया प्रतिभया व्यचीचरम्[2] । अहो ममेयं मोहमूला महत्यापदापतिता । प्रसृततरं च सख्यं मया सह धनमित्रस्य मत्परिग्रहत्वं[3] च रागमञ्जर्य्याः मदेनसा च तौ प्रोर्णुतौ[4] श्वो नियतं निग्राहयिष्येते[5] । तदियमिह प्रतिपत्तिर्ययानुष्ठीयमानया मन्नियोगतस्तौ परित्रास्येते मां च कदाचिदनर्थादितस्तारयिष्यतीति[6] । कमप्युपायमात्मनैव निर्णीय शृगालिकामवादिषम् । अपेहि जरतिके[7] या तामर्थलुब्धां दग्धगणिकां रागमञ्जरिकामजिनरत्नमत्तेन शत्रुणा मे मित्रछद्मना धनमित्रेण सङ्गमितवती सा हतासि । तस्य पापस्य चर्म्मरत्नमोषाद् दुहितुश्च ते साराभरणापहारादह मद्य निः शल्यमुत्सृजेयं[8] जीवितमिति । सा पुनरुद्घटितज्ञा परमधूर्त्ता साश्रुगद्गदमुदञ्जलिस्तान् पुरुषान् सप्रणाममासादितवती सामपूर्व्वं मम पुरस्तादयाचत । भद्रकाः प्रतीक्ष्यतां कञ्चित्कालं यावदस्मादस्मदीयं सर्व्वं मुषितमर्थजातमवगच्छे

---

[1] First pers. sing. 1st præt. pass. v. of बन्ध, "to bind," "I was bound:" the verb drops the nasal before य.

[2] First pers. sing. indef. præt. of the causal of चर, "to go;" with वि prefixed, "to consider," "I was made to reflect."

[3] "Marriage."

[4] "Overwhelmed—from ऊर्णु, "to cover," with प्र prefixed—by my fault," मद् एनसा.

[5] "Will certainly be arrested," (caused to be seized), 3d pers. dual indef. fut. of the passive of the causal of the passive of ग्रह, "to seize."

[6] "Therefore here is a contrivance (needed), by following which, through my direction, they shall be saved, and (which) in some way shall extricate me from this mishap."

[7] "Vile old woman," जरती कुत्सायां कन्.

[8] First pers. sing. pot. mood of सृज, "to relinquish," 6th conj. "I can lose my life without regret."

यमिति। तथेति तैः प्रतिपन्ने पुनर्मत्समीपमासाद्य सौम्य क्षमस्वास्य दासीजनस्यैकमपराधं। अस्तु सकामं त्वत्कलचाभिमर्शी वैरास्पदं धनमित्रः स्मरंस्तु चिरकृतां ते परिचर्य्यामनुग्रहीतुमर्हसि दासीं रागमञ्जरीं। आकल्पसारो[1] हि रूपाजीवो जनः तद् ब्रूहि क्व निहितमस्या भूषणमिति पादयोरपतत्। ततो दयामान इवाहमब्रुवम्। भवतु। मृत्युहस्तवर्त्तिनः किं ममामुष्या वैरानुबन्धेनेति। तद् ब्रुवन्निव कर्णे एवैनामशिक्षवमेवमेवं[2] प्रतिपत्तव्यमिति। सा तु प्रतिपन्नार्था जीव चिरं प्रसीदन्तु ते देवता देवोऽप्यङ्गराजः पौरुषप्रीतो मोचयतु त्वामेतेऽपि भद्रमुखास्तव दयन्तामिति क्षणादपासरत्। आनीये चाहमारक्षिकनायकस्य शासनाच्चारकम्॥

अथोत्तरेद्युरागत्य दृप्ततरः सुभगमानी सुन्दरम्मन्यः पितुरत्ययादचिराधिष्ठिताधिकारस्तारुण्यमदादनतिपक्वः कान्तको नाम नागरिकः। किञ्चिदिव भर्त्सयित्वा स मामभ्यधत्त न चेद्धनमित्रस्याजिनरत्नं प्रतिप्रयच्छसि न चेद्वा नागरिकेभ्यश्चोरितकानि प्रत्यर्प्पयसि द्रक्ष्यसि पारमष्टादशानां कारणानां[3]मन्ते च मृत्युमुखमिति। मया तु स्मयमानेनाभिहितं। सौम्य यद्यपि दद्यामाजन्मनो मुषितं धनं न त्वर्थपतिदारापहारिणः शत्रोर्मे मित्रमुखस्य धनमित्रस्य चर्म्मरत्नप्रत्याशां पूरयेयं। अदत्त्वैवैतदयुतमपि यातनानामनुभवेयमियं मे साधीयसी

[1] आकल्पसारः, "dependent on dress and decoration."

[2] First pers. sing. 1st præt. of शिक्ष, "to teach," here treated as a verb of the 8th conj.

[3] कारणं here means, "pain," "torture," of which, it appears from this passage, eighteen kinds were imposed by the former criminal code of the Hindus.

सन्धेति[1]। तेन च क्रमेण वर्त्तमाने सान्त्वनतर्ज्जनप्राये प्रतिदिनमनुयोगव्यतिकरेऽनुगुणान्न[2]पानलाभात् कतिपयैरेवाहोभिर्विरोपितव्रणः प्रकृतिस्थोऽहमासम्।

अथ कदाचिदच्युताम्बरपीतातपत्विषि क्षयिणि वासरे हृष्टवर्णा शृगालिकोज्ज्वलेन वेषेणोपसृत्य दूरस्थानुचरा मामुपश्लिष्याब्रवीत्। आर्य्य दिष्ट्या वर्द्धसे। फलिता तव सुनीतिः। यथा त्वयादिश्ये तथा धनमित्रमेत्याब्रुवम्। आर्य्य तवैवमापन्नसुहृदामुना चैवमादिष्टोऽसि। अहमद्य वेशसंसर्गसुलभात् पानदोषाद्बद्धः। त्वया पुनरपि विशङ्कमद्यैव राजा विज्ञापनीयो देव देवप्रसादादेव पुरापि तदजिनरत्नमर्थपतिमुषितमासादितं। अथ तु भर्त्ता रागमञ्जर्य्याः कश्चिदक्षधूर्त्तः कलासु कवित्वेषु लोकवार्त्तासु चातिवैचक्षण्यान्मया समसृज्यत तत्सम्बन्धाच्च वस्त्राभरणप्रेषणादिना तद्भार्य्यां प्रतिदिनमन्ववर्त्ते[3]। तदसावशङ्किष्ट[4] निकृष्टाशयतया[5] कितवः। तेन च कुपितेन हृतं तच्चर्म्मरत्नमाभरणसमुद्गकः च तस्याः। स
य तु भूयः स्तेयाय भ्रमन्नगृह्यत नागरिकपुरुषैः। आपन्नेन चामुनानुसृत्य रुदन्त्यै रागमञ्जरीपरिचारिकायै पूर्व्वप्रणयानुवर्त्तिना तद्भाण्डनिधानोद्देशः कथितः ममापि चर्म्मरत्नमुपायोपक्रा[6]-

---

[1] सन्धा प्रतिज्ञा मर्य्यादेत्यमरः.

[2] "Proper food and drink," अनुगुण, अन्न, पान.

[3] First pers. sing. 1st præt. of वृत, "to be," with अनु prefixed, "to be kind or civil to."

[4] Third pers. sing. indef. præt. of शकि, "to doubt or suspect."

[5] निकृष्टाशयः, "vile disposition," here implying "jealousy."

[6] उपक्रान्तो वशीकृतः। उपक्रमो वशीकारे समारम्भे चिकित्सने इति वैजयन्ती.

न्तो यदि प्रयच्छेदिह देवपादैः प्रसादः कार्य्य इति। तथा निवेदितश्च नरपतिरसुभिर्मामवियोज्योपच्छन्दनैरेव[1] स्वं ते दापयितुं प्रयतिष्यते। तन्नः पथ्यमिति श्रुत्वैव च त्वदनुभावप्रत्ययादनतिचरस्तुना तेन तत्तथैव सम्पादितं। अथाहं त्वदभिज्ञानप्रत्यायितायाः[2] रागमञ्जर्य्याः सकाशाद्यथेप्सितानि वस्तूनि लभमाना राजदुहितुरम्बालिकाया धात्रीं माङ्गलिकां त्वदादिष्टेन मार्ग्गेणान्वरञ्जयम्। तामेव सङ्क्रमीकृत्य[3] रागमञ्जर्य्याश्चाम्बलिकायाः सख्यं परमवीवृधम्[4]। अहरहश्च नव नवानि प्राभृतान्युपहरन्ती कथाश्चित्राश्चित्तहारिणीः कथयन्ती तस्याः परं प्रसादपात्रमासम्। एकदा च हर्म्याङ्गणगतायास्तस्याः स्थानस्थितमपि कर्णकुवलयं स्रस्तमिति प्रतिसमादधती प्रमत्तेव प्रच्याव्य[5] पुनरुत्क्षिप्य भूमेस्तेनोपकन्यापुरं कारणेन केनापि भवनाङ्गणं प्रविष्टस्य कान्तकस्योपरि कुहर-[6]प्रसक्तपारावतत्रासनापदेशात् प्रहसन्ती प्राहार्षम्। सोऽपि धन्यम्मन्यः पुरा किञ्चिदुन्मुखः स्मयमानो मत्कर्म्मप्रहासितायाः राजदुहितुर्विलासप्रायमाकारमात्माभिलाषमूलमिव यथा सङ्कल्पयेत् तथा मयाऽपि संज्ञयैव किमपि चतुरमाचे-

---

[1] उपच्छन्दः सान्त्वनमिति केशवः, "will exert himself to cause your property to be restored by gentle means."

[2] प्रत्यायित, विश्वस्त.

[3] उपायीकृत्य, "having made her the means."

[4] First pers. sing. indef. præt. of the causal form of वृध, "to grow," "I made to grow or augmented."

[5] "Having thrown down," causal of च्यु, "to fall," part. passive indeclinable.

[6] "Intent on pairing," कुहरप्रसक्त.

ष्टितमाकृष्टधन्वना च मनसिजेन विद्धः सन्दिग्धफलेन पत्रिणातिमुग्धः कथं कथमप्यपासरत्। सायं च राजकन्यकाङ्गुलीयकमुद्रितां वासताम्बूल[2]वरांशुकयुगलभूषणावयवगर्भां पेटिकां कयाचिद्बालिकया ग्राहयित्वा रागमञ्जर्य्या इति नीत्वा कान्तकस्यागारमगाम्। अगाधे रागसागरे मग्नो नावमिव मामुपलभ्य परमहृष्यत्। अवस्थान्तराणि च राजदुहितुः सुदारुणानि व्यावर्त्तयन्त्या मया स दुर्म्मतिर्दूरमुदमाद्यत। तत्प्रार्थिता चाहं त्वत्प्रियाप्रहितमिति ममैव मुखताम्बूलोच्छिष्टानुलेपननिर्म्मात्यमलिनांशुकं चान्येद्युरुपाहरम्। तदीयानि च राजकन्यार्थमित्यादाय छन्नमेव प्राक्षिपम्॥

इत्थञ्च सन्धुक्षितमन्मथाग्निरेकान्ते मयोपमन्त्रितोऽभूत्। आर्य्य लक्षणान्येव तवाविसंवादीनि[3] तथा हि मत्प्रातिवेश्यः कश्चित्कार्त्तान्तिकः कान्तकस्य हस्ते राज्यमिदं पतिष्यति तादृशानि तस्य लक्षणानीत्यादिक्षत्। तदनुरूपमेव च त्वां राजकन्यका कामयते। तदेकापत्यश्च राजा तया त्वां समागतमुपलभ्य कुपितोऽपि दुहितुर्मरणभयान्नोच्छेत्स्यति प्रत्युत प्रापयिष्यत्येव यौवराज्यं। इत्थं चायमर्थोऽर्थानुबन्धी किमिति तात नाराध्यते। यदि कुमारीपुरप्रवेशाभ्युपायं नावबुध्यसे ननु बन्धनागारभित्तेर्व्यामत्रयमन्तरालमारामप्राकारस्य केनचित्तु

---

[1] "With an envenomed blade."

[2] वासताम्बूल is considered as one word. Betel, combined with cardamoms, cloves, camphor, and other aromatics.

[3] "Not deceptive," "not fallacious."

हस्तवतैकागारिकेण[1] तावतीं सुरुङ्गां कारयित्वा प्रविष्टस्योपवनं तवोपरिष्टादस्मदायत्तैव रक्षा। रक्ततरो हि तस्याः परिजनो न रहस्यं भेत्स्यन्तीति॥ सोऽब्रवीत् साधु भद्रे दर्शितं। अस्ति कश्चित्तस्करः खननकर्म्मणि सगरसुतानामिवान्यतमः[2] स चेल्लुब्धः क्षणेनैतत् कर्म्म साधयिष्यतीति। कतमोऽसौ किमिति न लभ्यत इति मयोक्ते येन तद्वनमित्रस्य चर्म्मरत्नं मुषितमिति त्वामेव निरदिक्षत्। यद्येवमेव त्वयास्मिन्कर्म्मणि साधिते चित्रैरुपायैस्त्वामहं मोचयिष्यामीति शपथपूर्व्वं तेन सन्धाय सिद्धेऽर्थे भूयोऽपि निगडयित्वा योऽसौ चौरः स सर्व्वथोपक्रान्तो न तु धृष्टतमः प्रकृष्टवैरस्तदजिनरत्नं दर्शयिष्यतीति राज्ञे विज्ञाप्य चित्रमेनं घातयिष्यसि तथा च सत्यर्थः सिध्यति रहस्यञ्च न स्रवतीति मयोक्ते। सोऽतिहृष्टः प्रतिपद्य मामेव त्वदुपप्रलोभने नियुज्य बहिरवस्थितः। प्राप्तरूपमितः परं चिन्त्यतामिति॥

प्रीतेन च मयोक्तं। मदुक्तमल्पं त्वन्नय एवात्र भूयान्। आनयैनमिति। अथानीतेनामुना मन्मोचनाय शपथः कृतो मया च रहस्यानिर्भेदाय। विनिगडीकृतश्च स्नानभोजनविलेपनान्यनुभूय नित्यान्धकारात्कारभित्तिकोणादारभ्य उरगास्येन[3] सुरुङ्गामकरवम्। अचिन्तयञ्चैवं हन्तुमनसैवा-

---

[1] "By some dextrous (हस्तवत्) thief," एकागारिकः.

[2] "As if he were another of the sons of Sagara," who, in their search after the sacred horse which had been stolen from their father, dug down to the centre of the earth, and formed what was afterwards the bed of the ocean. See Rámáyaña.

[3] The implement formerly termed फणिमुखः, "a sort of spade."

मुना मन्मोचनाय शपथः कृतः तदमुं हत्वापि नासत्यवाददोषेण स्पृश्य इति। निष्पततश्च मे निगडनाय प्रसार्य्यमाणपाणेस्तस्य पादेनोरसि निहत्य पतितस्य तस्यैवासिधेन्वा शिरो न्यकृन्तम्[2]। अकथयञ्च शृगालिकां भण भद्रे कथम्भूतः कन्यापुरसन्निवेशो महानयं प्रयासो मा वृथैव भूत्। अमुत्र किञ्चिच्चोरयित्वा निवर्त्तिष्ये इति। तदुपदर्शितविभागश्चावगाह्य कन्यान्तःपुरं प्रज्वलत्सु मणिदीपेषु नैकक्रीडाखेदसुप्तस्य परिजनस्य मध्ये महार्हरत्नप्रत्युप्तसिंहाकारदन्तपादे हंसतूलगर्भकोमलशय्योपधान[3]शालिनि कुसुमलव[4]च्छुरितपर्य्यन्ते पर्य्यङ्कतले दक्षिणपादपार्ष्ण्यधोभागानु[5]वेल्लितेतरचरणाग्रपृष्ठमीषद्विवृतमधुरगुल्फसन्धिपरस्परश्लिष्टजङ्घाकाण्डमाकुञ्चितोभयजानु किञ्चिद्वेल्लितोरुदण्डयुगलमधिनितम्बस्रस्तमुक्तैकभुजलताग्रपेशलमपाश्रयान्त[6]निहिताकुञ्चितेतरभुजलतोत्तानतलकरकिशलयमाभुग्नश्रोणिमण्डलमतिश्लिष्टचीनांशुकान्तरीयमनतिवलिततनुतरोदरमणुतर[7]निःश्वासारम्भकम्पमानकठोरकुचकुड्मलमातिरश्चीनबन्धुरशिरोद्देशदृश्यमाननिष्टप्ततप-

---

[1] "A crooked knife."

[2] First pers. sing. 1st præt. of कृत, "to cut," with नि prefixed, "I cut off."

[3] "Pillow and bed stuffed with swan's down," "a feather bed," articles of furniture very unusual in India among the natives, the Hindus especially, who would now consider, in most cases probably, feathers as impure.

[4] "The borders carved with flowers."

[5] "Doubled or turned under." In this and the following description the compounds are used adverbially in the accusative neuter.

[6] अपाश्रयान्ते, मस्तकान्ते, "at the end (or by the side) of the head," is the explanation of the commentary.

[7] "Very gently," from अणु, "minute," "little."

नीयसूत्रपर्य्यस्तपद्मरागरूचक[1]मण्डलक्ष्याधर[2]कर्णपाशनिभृत[3]कु-
ण्डलमुपरिपरावृत्त[4]श्रवणपाशरत्नकर्णिकाकिरणं मञ्जरीपिञ्ज-
रितविषमव्यविद्धशिथिलशिखण्डबन्धमात्मप्रभापटलदुर्ल्लक्ष्य-
पाटलोत्तराधरविवरम् गण्डस्थलीसङ्क्रान्तहस्तपल्लवदर्शितक-
र्णावतंसकृत्यमुपरिकपोलदेशतलनिषक्तचित्रवितान[5]पत्रजा-
तिजनितविशेषकक्रियमामीलितलोचनेन्दीवरमविभ्रान्तभ्रू-
पताकमुद्भिद्यमानश्रमजलपुलकभिन्नशिथिलचन्दनतिलक-
माननेन्दुसम्मुखालककलतं च विश्रब्धप्रसुप्तामतिधवलोत्तरच्छद-
निमग्नां प्रायैकपार्श्वतया चिरविलसनखेदनिश्चलां शरदम्भो-
धरोत्सङ्गशयिनीमिव सौदामिनीं राजकन्यामपश्यम्। दृष्ट्वैव
स्फुरदनङ्गरागश्चकितश्चोरयितव्यनिः स्पृहस्तयैव तावच्चौर्य्य-
माणहृदयः किङ्कर्त्तव्यतामूढः क्षणमतिष्ठम्। अतर्क्कयञ्च न
चेदिमां वामलोचनामाप्नुयां न मृष्यति मां जीवितुं वसन्त-
बन्धुः। असङ्केतितपरामृष्टा चेयमतिबाला व्यक्तमार्त्तरवेण
निहन्यान्मे मनोरथं ततोऽहमेवाघ्नीय[6] इति। तदियमत्र प्रति-
पत्तिरिति नागदन्तलग्ननिर्य्यासबालुकाकल्कवर्णितफलक[7]-

---

1 "A necklace," रूचको ग्रीवाभरणं.

2 "The lower or under ear."

3 "Covered."

4 "Turned upwards."

5 This is not very intelligible, but it means, apparently, "that the flowers or pattern of the variegated hangings of the bed (वितान) were in a superior manner wrought upon (reflected by) her temples."

6 First pers. sing. potential átm. pada pass. v. of हन, "to kill or destroy," with आ prefixed, "I may be destroyed," "I may or must die."

7 A board (or pallet) coloured with the white sediment of a sandy extract (or paint) placed on a shelf.

मादाय मणिसमुद्गकाद्वर्णवर्त्तिकामुद्धृत्य तां तथाशयानां तस्याश्च मामाबद्धाञ्जलिं चरणलग्नमालिखम् आर्य्याञ्चैतां ।

त्वामयमाबद्धाञ्जलिदासजनस्तमिममर्थमर्थयते ।
स्वपिहि मया सह मदनव्यतिकरखिन्नैवमामेव ॥

हेमकरण्डकाच्च वासताम्बूलवीटिकां कर्पूरस्फुटिकां पारिजातकञ्चोपयुज्या[1]लक्तकपाटलेन तद्रसेन सुधाभित्तौ चक्रवाकमिथुनं निरष्ठीवम् । अङ्गुलीयकविनिमयञ्च कृत्वा कथंकथमपि निरगाम् । सुरुङ्गया च प्रत्येत्य बन्दनागारं तत्रबद्धस्य नागरिकवरस्य सिंहघोषनाम्नस्तेष्वेवदिनेषु मित्रत्वेनोपचरितस्यैवं मया हतस्तपस्वी कान्तकस्त्वयाप्रतिभिद्य रहस्यं लब्धव्यो मोक्ष इत्युपदिश्य सह शृगालिकया निरक्रामिषम् ॥

नृपतिपथे च समागत्य रक्षिकपुरुषैरगृह्ये । अचिन्तयञ्च । अलमस्मि जवेनापसर्त्तुमना[2]मृष्ट एवैभिरेषा पुनर्वराकी गृह्येत । तदिदमत्रप्राप्तरूपमिति । तानेव चपलमभिपत्य स्वपृष्ठसमर्प्पितकूर्परः पराङ्मुखः स्थित्वा यद्यहमस्मि तस्करो भद्रा बध्नीत माम् युष्माकमयमधिकारो न पुनरस्या वर्षीयस्या इत्यवादिषम् । सा तु तावतोन्नीतमदभिप्राया तान् सप्रणाममभिगत्य भद्रमुखा ममैष पुत्रो वायुग्रस्त[3]श्चिरञ्चिकित्सितः पूर्वेद्युः प्रसन्नकल्पः प्रकृतिस्थ एव जातो जातास्थया मया बन्धनान्निःक्रमय्य स्नापितोऽनुलेपितश्च परिधाप्य निष्प्र[4]वा-

---

1 "Lac," "the die."

2 "Unovertaken," "unapprehended," अनामृष्टोऽस्पृष्टः.

3 "Insane," "possessed by wind."

4 "New clothes."

णियुगलमभ्यवहार्य्य परमान्नमौशीरेऽद्य कामाचारः कृतोऽभूत्। अथ निशीथे भूय एव वायुनिघ्नो निहत्य कान्तकं नृपतिदुहिता रमेयमिति रंहसा परेण राजपथमभ्यपतत्। निरूप्य चाहं पुत्रमेवङ्गतमस्यां वेलायामनुधावामि। तत्प्रसीदत बध्वैनं मह्यमर्प्पयतेति यावदसौ क्रन्दति तावदहं स्थविरे केन देवो मातरिश्वा बद्धपूर्व्वः किमेते काकाः शौङ्गेयस्य मे निगृहीतारः शान्तं पापमित्यधावम्। असावप्यमीभिस्त्वमेवोन्मत्ता या अनुन्मत्त इत्युन्मत्तं मुक्तवती कस्तमिदानीं बध्नातीति निन्दिता कदर्थिता रुदत्येव मामन्वधावत्। गत्वा च रागमञ्जरीगृहं चिरवियोगविक्लवामिमां बहुविधं समाश्वास्य तं निशाशेषमनयम्। प्रभाते पुनरुदारकेण च समगच्छे॥

अथ भगवन्तं मरीचिं वेशकृच्छ्रादुत्थाय पुनः प्रतिपन्नतपःप्रभावप्रत्यापन्नदिव्यचक्षुषमुपसङ्क्रम्य तेनास्म्येवम्भूतवद्दर्शनमवगमितः। सिंहघोषश्च कान्तकापचारं निर्भिद्य तत्पदे प्रसन्नेन राज्ञा प्रतिष्ठापितस्तेनैव चारकसुरुङ्गापथेन कन्यापुरप्रवेशं भूयोऽपि मे समपादयत्। समगंसि चाहं शृगालिकामुखविसृतवार्त्तानुरक्तया राजदुहित्रा। तेष्वेव दिवसेषु चण्डवर्म्मा सिंहवर्म्मावधूतदुहितृप्रार्थनः कुपितोऽभियुज्य पुरमवारुणत्। अमर्षणश्चाङ्गराजो यावदरिः पारग्रामिकं

[1] औशीरं शयनासनं.

[2] A name of Garuda, or one having a dark garment, नीलछदस्तु विहङ्गारातिरित्यपीति वैजयन्ती.

विधिमाचिकीर्षति तावत्स्वयमेव सालं[1] निर्भिद्य प्रत्यासन्नानपि सहायानप्रतीक्षमाणो निर्गत्याभ्यधिकबलेन विद्विषा महति सम्पराये भिन्नमर्म्मा सिंहवर्म्मा बलादगृह्यत। अम्बालिका च बलवदभिगृह्य चण्डवर्म्मणा परिणेतुमात्मभवनमनीयत। कौतुकं[2] च स किल क्षपावसाने विवाह इत्यबध्नात्। अहञ्च धनमित्रगृहे तद्विवाहायैव पिनद्धमङ्गल[3]प्रतिसरस्तमेवावोचम्। सखे समापतितमेवाङ्गनायाभिसरं राजमण्डलं सुगूढमेव सम्भूय पौरवृद्धैस्तदुपावर्त्तय। उपावृत्तश्च कृतकृत्यः कृत्तशिरसमेव शत्रुं द्रक्ष्यसीति तथा च तेनाभ्युपगते गतायुषोऽमुष्य भवनमुत्सवाकुलमुपसमाधीयमानपरिणयोपकरणमितस्ततः प्रवेशनिर्गमप्रवृत्तलोकसम्पातमलक्ष्यशस्त्रिकःसह प्रविश्य मङ्गलपाठकैरम्बालिकापाणिपल्लवमग्नौ साक्षिण्याथर्व्वणेन[4] विधिनार्य्यमानमादित्समानस्यायामिनं बाहुदण्डमाकृष्य छुरिकयोरसि प्राहार्षम्[5]। स्फुरतश्च कतिपयानन्यानपि यमविषयमगमयम् हतविध्वस्तञ्च तद्गृहमनुविचरन्वेपमानमधुरगात्रीं विशाललोचनामभिनिशाम्य तदालिङ्गसुखमनुबुभूषुस्तामादाय गर्भगृहमविक्षम्। अस्मिन्नेव क्षणे तवास्मि नवाम्बुवाहगम्भीरेण स्वरेणानुगृहीतः॥

---

[1] प्राकारोऽवरणः साल इत्यमरः.

[2] "The marriage thread or ring," "he bound the ring at the marriage;" that is, he celebrated the ceremony at the end of the night.

[3] "Having put on the marriage-festival attire as one of the attendants."

[4] "By the officiating priest," celebrating the rite according to the ritual of the Atharva Veda.

[5] First pers. sing. indef. prεt. of हृ, "to take," with प्र prefixed, "to strike."

इति श्रुत्वा च स्मित्वा च देवोऽपि राजवाहनः कथमसि-कार्क्कश्येन कर्णीसुतमप्यतिक्रान्त इत्यभिधाय पुनर्निरीक्ष्योप-हारवर्म्माणमाचक्ष्व तवेदानीमवसर इत्यभाषत ॥

इति श्रीदण्डिकृते दशकुमारचरित अपहारवर्म्मचरितं
नाम द्वितीय उच्छ्वासः ॥

उपहारवर्म्मचरितं नाम तृतीय उच्छ्वासः ॥

सोऽपि सस्मितं प्रणम्यारभताभिधातुम्। एषोऽप्यहमस्मि पर्य्यटन्नेकदा गतो विदेहेषु। मिथिलामप्रविश्यैव क्वचिन्मठिकायां[1] विश्रमितुमेत्य कयाऽपि वृद्धतापस्या दत्तपाद्यः क्षणमलिन्द[2]भूमाववास्थिषि[3]। ततस्तस्यास्तु मद्दर्शनादेव किमपि बद्धधारमश्रु प्रावर्त्तत। किमेतदम्ब कथय कारणमिति पृष्टा सकरुणमाचष्ट। जैवातृक[4] ननु श्रूयते पतिरस्या मिथिलायाः प्रहारवर्म्मा नामासीत्। तस्य खलु मगधराजो राजहंसः परं मित्रमासीत्। तयोश्च वल्लभे बलशंवरयोरिव[5] वसुमतीप्रि-

---

[1] "A small temple."

[2] There is usually in front of temples a covered portico or verandah.

[3] First pers. 3d præt. atm. pada, from स्था with अव prefixed.

[4] Synonymous with आयुष्मत्, "long lived," a term of endearment.

[5] Bala and Śamvara are said to be the names of two asuras; the former was the brother of Hiranyakasipu, and was killed by Indra. Padma-P.; the latter is the hero of a legend in the Vishnu and Bhágavat Puránas, Harivansa, and other works, having

carried

यंवदे सख्यमप्रतिममददताम्। अथ प्रथमगर्भाभिनन्दितां तां च प्रियसखीं दिदृक्षुः प्रियंवदा वसुमतीं सह भर्त्रा पुष्पपुरमगमत्। अस्मिन्नेव च समये मालवेन मगधराजस्य महज्ज[1]न्यमजनि। तत्र लेशतोऽपि दुर्लक्षिताङ्गतिमगमन्मगधराजः। मैथिलस्तु मालवेन्द्रप्रयत्नप्रा[2]णितः स्वविषयं प्रतिनिवृत्तो ज्येष्ठस्य संहारवर्म्मणः सुतैर्विकटवर्म्मप्रभृतिभिर्व्याप्तं राष्ट्रमाकर्ण्य स्वस्रीयात् सुह्मपतेर्दण्डा[3]वयवमादित्सुरटवीपथमवगाह्य लुब्ध[4]कलुप्तसर्वस्वोऽभूत्। तत्सुतेन च कनीयसा हस्तवर्त्तिना सदैकाकिनी वनचरशरवर्षभयपलायिता वनमगाहि[5]षि। तत्र च मे शार्दूलनखाव[6]लीढनिपतितायाः पाणिभ्रष्टः स बालकः कस्यापि कपिलाशवस्य क्रोडमभ्यलीयत। तच्छवाकर्षिणो व्याघ्रस्यासूनिषुरिष्वासनयन्त्रमुक्तः क्षणादालि[7]क्षत्। भिल्लदारकैः स बालकोऽपा[8]हारि। सा त्वहं मोहसुप्ता केनापि

---

carried off Pradyumna, the son of Krishna, and been killed by him when arrived at maturity. The circumstance of the affection subsisting between the wives of these two asuras must be derived from some other source as it is not alluded to by the authorities specified, not even by the Harivansa, where the story is most fully detailed. See the translation of the Harivansa by M. Langlois, Vol. II. p. 159.

1 Here, as before, जन्यं means "war."

2 प्राणित, "preserved in life," "having his life spared."

3 दण्ड here means "an army," दण्डो दमसेनयोरिति भागुरिः.

4 "A forester," लुब्धको व्याधः.

5 First pers. sing. indef. præt. atm. pada of गाह, "to plunge into."

6 Part. past of लिह, "to lick," radical vowel made long, Gr. p. 204.

7 Third pers. sing. indef. præt. of लिह, as before.

8 Third pers. sing. indef. præt. pass. v. of हृ with अप prefixed, "to take away."

वृष्णिपालेनोपनीय[1] स्वकुटीरमावेश्य कृपयोपक्रान्तव्रणा[2] स्वस्थीभूय स्वभर्त्तुरन्तिकमुपतिष्ठासुरसहायतया यावद्व्याकुली भवामि तावन्ममैव दुहिता सह यूना केनापि तमुद्देशमागमत्। सा भृशं रुरोद। रुदितान्ते च सा सार्थघाते[3] स्वहस्तगतस्य राजपुत्रस्य किरातहस्तगमनमात्मनश्च केनापि वनचरेण व्रणविरोपणं स्वस्थायाश्च पुनस्तेनोपयन्तुं चिन्तिताया निकृष्टजातिसंसर्गवैक्लव्यात्प्रत्याख्यानपारुष्यं तदक्षमेण चामुना विविक्तविपिने स्वशिरःकर्त्तनोद्यमं तस्यानेन यूना यदृच्छया दृष्टेन दुरात्मनो हननमात्मनश्चोपयमनमित्यकथयत्। स च पृष्टो मिथिलेन्द्रस्य कोऽपि सेवकः कारणविलम्बी[4] तन्मार्गानुसारी बभूव। सह तेन स्वभर्त्तुरन्तिकमुपसृत्य पुत्र वृत्तान्तेन शोचतस्य देव्याः प्रियंवदायाश्चादहाव[5]॥

स च राजादिष्टदोषज्येष्ठपुत्रैश्चिरं विगृह्य[6] पुनरसहिष्णुतयातिमात्रं प्रयुध्य बद्धः देवी च बन्धनं गमिता दग्धा पुनरहमस्मिन्नपि वार्द्धके जीवितमपारयन्ती[7] हातुं प्रव्रज्यां[8] किलाग्रहीषम्। दुहिता तु मम हतजीविताकृष्टा विकटवर्म्ममहिषीं कल्पसुन्दरीं किलाशिश्रियत्[9]। तौ चेद्राजपुत्रौ निरुपद्रवाव-

---

[1] "A cow-herd, वृष्णिर्यदुषु गोषु चेत्यजयः.

[2] उपक्रान्तश्चिकित्सितः, "healed."

[3] "On the dispersion of the company or retinue of the king," सार्थघाते, सङ्घभ्रंशे.

[4] "Having been delayed by some cause."

[5] First pers. dual 1st præt. of दह, "to burn," "to afflict."

[6] "Having warred with."

[7] अपारयन्ती, अशक्नुवन्ती, from पार, verb, 10th conjugation, "to be able," पार, सामर्थ्ये.

[8] A mendicant and erratic life.

[9] Third pers. sing. indef. præt. of श्रि, "to serve," which takes the reduplicate form as well as the augment, Gr. p. 182.

वर्द्धिष्येताम्[1]अयता कालेन तवेमां वयोवस्थामस्प्रक्ष्येतां[2] । तयोश्च सतो दायादा नरेन्द्रस्य प्रसह्यकारिणो न भवेयुरिति प्रवृद्धमन्युर्[3]अभिरुरोद । श्रुत्वा च तां तापसीगिरमहमपि प्रवृद्ध-वाष्पो निगूढमभ्यधाम् । यद्येवमम्ब समाश्वसिहि । नन्वस्ति कश्चिन्मुनिस्त्वया पुत्राभ्युपपादनार्थं[4] याचितस्तेन स लब्धो वार्द्धितश्च । वार्त्तेयमतिमहती हि किमनया सोऽहमस्मि । शक्यश्च मयासौ विकटवर्म्मा यथाकथञ्चिदुपश्लिष्य व्यापाद-यितुम् । अनुजाः पुनरतिबहवस्तैरपि घटन्ते[5] पौरजानपदाः मां तु न कश्चिदिहत्य[6] ईदृक्तया जानाति । पितरावपि याव-न्मां न प्रतिसंविदाते[7] किमुतेतरौ । तदेनमर्थमुपायेन साध-यिष्यामीत्यगादिषम्[8] । सा तु वृद्धा सरुदितं परिष्वज्य मुहुर्मुहुः शिरस्युपाघ्राय प्रस्नुतस्तनी[9] सगद्गदमगदत् । वत्स चिरञ्जीव भद्र तव प्रसन्नोऽद्य भगवान्विधिः । अद्यैव प्रहारवर्म्मणोऽधि[10]

---

[1] Third pers. dual conditional mood atm. pada of वृद्ध, "to grow or increase."

[2] Third pers. dual conditional mood atm. pada of स्पृश, "to touch," "to attain." "If those two princes had grown up without misfortunes, they would have attained your age."

[3] "With enhanced sorrow."

[4] "Bringing up," "taking care of."

[5] Third pers. pl. pres. of घट, "to strive with or against."

[6] "Inhabitant of this place," derivative of इह, "here."

[7] Third pers. dual pres. of विद, "to know," verb, 2d conj., and with सम् prefixed conj. in the atm. pada.

[8] First pers. indef. præt. of गद, "to speak."

[9] A. B. C. have प्रस्तुतस्तनी, D. has प्रसुत, which is preferable.

[10] An unusual though regular construction of the preposition apart from the verb governing the locative case. The commentator explains जाता अधि to mean, subject to प्रहारवर्म्माधीना; but the sense should be rather, "have now prevailed or triumphed over," "have revolted from;" the reason of which is assigned, "since you have come to enable them to cross the sea of sorrow," &c.

विदेहा जाताः । यतः प्रलंबमानपीनबाहुर्भवानपारं वत शोकसागरमद्योत्तारायितुं स्थितः । अहो महद्भागधेयं देव्याः प्रियंवदाया इति हर्षनिर्भरा स्नानभोजनादिना मामुपाचरत् । अशिश्रियञ्चास्मिन्मठैकदेशे निशि कटशय्यां । अचिन्तयञ्च विनोपाधिनायमर्थो न साध्यः स्त्रियश्चोपाधीनामुद्भवक्षेत्रं । अतोऽन्तःपुरवृत्तान्तमस्या अवगम्य तद्द्वारेण किञ्चिज्जालमाचरेयमिति । चिन्तापन्न एवं मयि महार्णवोन्मग्नमार्त्तण्डतुरगनिःश्वासरयावधूतेव व्यावर्त्तत त्रियामा समुद्रगर्भवासजडीकृत इव मन्दप्रतापो दिवाकरः प्रादुरासीत् ॥

उत्थायावसायितदिनमुखनियमविधिस्तां मे मातरमवादिषम् । अम्ब जाल्मस्य विकटवर्म्मणः कच्चिदन्तःपुरवृत्तान्तमभिजानासीत्यनवसितवचन एव मयि काचिदङ्गना प्रत्यदृश्यत । तां चावेक्ष्य सा मे धात्री हर्षाश्रुकुञ्चितकण्ठमाचष्ट । पुत्रि पुष्करिके पश्य भर्त्तृदारकं । अयमसावकृपया मया वने परित्यक्तः पुनरप्येवमागतः । सा तु हर्षनिर्भरनिपीडिता चिरं प्ररुद्य बहुविलप्य शान्ता पुनः स्वमात्रा राजान्तःपुरवृत्तान्ताख्याने न्ययुज्यत । उक्तञ्च तया कुमारकामरूपेश्वरस्य कलिन्दवर्म्मनाम्नः कन्या कल्पसुन्दरी कलासु रूपे चाप्सरसोऽप्यतिक्रान्ती पतिमभिभूय वर्त्तते । तदेकवल्लभः स तु बह्ववरोध-

---

[1] An interjection, "alas!"

[2] "Deception," "device." The subsequent reflection bears hard upon the female sex.

[3] "A net;" literally or figuratively, "a device."

[4] Third pers. sing. 1st præt. pass. v. of युज, with नि prefixed, "to employ or instigate."

[5] C. has अतिभूय, in either it implies "despising or disregarding."

[6] "He is her only lord;" that is, she is faithful to him, but he has a numerous harem.

नोऽति विकटवर्म्मेति। तामवोचम्। उपसर्प्यैनां मत्प्रयुक्तैर्गन्धमाल्यैरुपजनय चासमानदोषनिन्दादिना स्वभर्त्तरि द्वेषं। अनुरूपभर्त्तृगामिनीनां वासवदत्तादीनां[1] वर्णनेन ग्राहयानुशयं। अवरोधनान्तरेषु चामुष्य विलसितानि सुगूढान्यपि प्रयत्नेनान्विष्य प्रकाशयन्ती मानमस्या वर्द्धयेति। पुनरहमम्बामवोचम्। इत्थमेव त्वयाप्यनन्यव्यापारया नृपाङ्गनासावुपस्थातव्या। प्रत्यहञ्च यद्यत्तत्र वृत्तान्तं जातं तदस्मि त्वयावबोध्यः। मदुक्ता पुनरियं। उदर्क[2]स्वादुनोऽस्मत्कर्म्मणः प्रसाधनाय छायेवानपायिनी[3] कल्पसुन्दरीमनुवर्त्ततां[4]। ते च तमर्थं तथैवान्वतिष्ठतां। केषुचिद्दिनेषु गतेष्वाचष्ट मां मदम्बा वत्स माधवीव पिचुमर्द[5]ाश्लेषिणी यथासौ शोच्यमात्मानं मन्यते तथोपपाद्य स्थापिता किं भूयः कृत्यमिति। पुनरहमभिलिख्यात्मनः प्रतिकृतिमस्मत्प्रतिकृतिरियममुष्यै नेया। नीता चैनां निर्व्वर्ण्य सा नियतमेवं वक्ष्यति। नन्वस्ति कश्चिदीदृशाकारः पुमानिति। प्रतिब्रूह्येनां यदि स्यात्ततः किमिति। यदुत्तरं सा दास्यति तदहमस्मि प्रतिबोधनीय इति। सा तथेति राजकुलमुपसङ्क्रम्य प्रतिनिवृत्ता मामेकान्ते न्यवेदयत्।

---

1 The story of Vásavadatta seems to have been very popular in the middle ages. It is given in the Sarit-Ságara, and is alluded to in the Megha Dúta and in the Málatí and Mádhava.

2 "Result," "success."

3 "Constantly attending or adhering to."

4 Third pers. sing. imper. atm. pada of वृत, "to be;" with अनु prefixed, "let her accompany."

5 The nimb tree.

वत्स दर्शितो ऽसौ चित्रपटस्तस्यै मत्तकाशिन्यै[1] चित्रीयमाणा चासौ भुवनमिदं सनाथीकृतं येन देवे ऽपि कुसुमधन्वनि नेदृशी वपुःश्री सन्निधत्ते। चित्रमेतच्चित्रतमं। न च तमवैमि य ईदृशमिदमिहत्यो निर्मिमीते[2]। केनेदमालिखितमित्याहतवती व्याहृतवती च। मया च स्मेरयोदीरितं। देवि सदृशमाज्ञापयसि भगवानपि मकरकेतुरेव सुन्दर इति न शक्यमेवं[3] सम्भावयितुम्। अथ च विस्तीर्णेयमर्णवनेमिः क्वचिदीदृशमपिरूपं दैवशक्त्या सम्भवेत। अथ तु यद्येवंरूपो रूपानुरूपशिल्पशीलविद्याज्ञानकौशलो युवा महाकुलीनश्च कश्चित् सन्निहितः स्यात् स किं लप्स्यत[4] इति। तयोक्तमेव किं ब्रवीषि शरीरं हृदयं जीवितमिति सर्व्वमिदमल्पमनर्हञ्च ततो न किञ्चिल्लप्स्यते न चेदयं विप्रलम्भः स्यात्। तस्या अमुष्यदर्शनानुभवेन यथेदं चक्षुश्चरितार्थं भवेत् तथानुग्रहः कार्य्य इति। भूयो ऽपि मया दृढतरीकर्त्तुमुपन्यस्तमस्ति को ऽपि राजसूनुरवरुद्धश्चरन्नमुष्य[5] वसन्तोत्सवे सहसखीभि र्नगरोपवनविहारिणी रतिरिव विग्रहिणी यदृच्छया दर्शनपथङ्गतासि गतश्चासौ कामशरैरेकलक्ष्यतां मामन्ववर्त्तिष्ट। मया च वामन्यो-

---

[1] "Shining or seeming like one insane."

[2] Third pers. sing. pres. of मा, "to measure," with निर् prefixed, "to make," verb, 3d conjugation, Gr. p. 212.

[3] शक्यं सम्भावयितुम्, "cannot be compared with."

[4] Third pers. sing. indef. fut. atm. pada of लभ, "to gain."

[5] अवरुद्धः, "private," "incognito."

न्यानुरूपैरन्यदुर्लभैराकारादिभिर्गुणातिशयैश्चप्रेर्य्यमाणया तद्र-चितैरेव कुसुमशेखरस्रगनुलेपनादिभिश्च चिरमुपासितासि साहश्यञ्च स्वमनेन स्वयमेवाभिलिख्य त्वत्समाधिगाढत्वद-र्शनाय[1] प्रेषितं। एष चेदर्थो निश्चितो तस्यामुष्यातिमानुष-प्राणसत्वप्रज्ञाप्रकर्षस्य न किञ्चन दुःकरं नाम। तमद्यैव दर्शयेयं सङ्केतो देय इति। तया तु किञ्चिदिव ध्यात्वा पुनर-भिहितं। अम्ब नैतदिदानीं गोप्यमतः कथयामि। मम तातस्य राज्ञा प्रहारवर्म्मणा सह महती प्रीतिरासीन्मातुश्च मे मान-वत्याः प्रियवस्यायाः प्रियंवदायाश्च देव्याः। ताभ्यां पुनरजा-तापत्याभ्यामेव कृतः समयोऽभूत्। आवयोः पुत्रवत्याः पुत्राय दुहितृवत्या दुहिता देया इति। तातस्तु मां जातां प्रनष्टापत्यां प्रियंवदेति प्रार्थयमानाय विकटवर्म्मणे दैवाद्दत्तवान्। अयञ्च निष्ठुरः पितृद्रोही नात्युपपन्नसंस्थानः[2] कामोपचारेष्वलब्धवै-चक्षण्यः कलासु काव्यनाटकादिषु मन्दाभिनिवेशः शौर्य्यो-न्मादी दुर्विकत्थनो[3]ऽनृतवादी चास्थानवर्षी[4] नातिरोचते ममैष भर्त्ता। विशेषतश्चैषु वासरेषु यदयमुद्याने मदन्तरङ्गभूतां पुष्करिकामप्युपान्तवर्त्तिनीमनाहत्य मय्याबद्धसापत्न्यमत्सरा-मनात्मज्ञामात्मनाटकीयां रमयन्तिकां नामापत्यनिर्विशेषं मत्संवर्द्धितायाश्चम्पकलतायाः स्वयमवचिताभिः सुमनो-

---

[1] "To show the intensity of his passion for you."

[2] "Not of a very pleasing or graceful form, or presence," उपपन्नसंस्थानोऽनुगुणावयवः.

[3] "Wickedly or improperly boastful."

[4] "Having intercourse with unfit or low persons."

भिरलभकार्षीत्[1]। अयोग्यश्चपुमानवज्ञातुञ्चप्रवृत्तस्तत् किमित्यपेक्ष्यते। परलोकभयञ्चैहिकेन दुःखेनान्तरितं। अविषह्यं हि योषितामनङ्गशरनिषङ्गीभूतचेतसामनिष्टजनचिरसंवासयन्त्रणादुःखं। अतोऽमुना पुरुषेण मामद्योद्यानमाधवीगृहे समागमयेति। तद्वार्त्ताश्रवणमात्रेणैव हि ममातिमात्रं मनोऽनुरक्तं। अस्ति चायमर्थराशिरनेनामुं स्वपदे प्रतिष्ठाप्य तमेवमत्यन्तमुपचर्य्य जीविष्यामीति। मया तदभ्युपेत्य प्रत्यागतं। अतः परं भर्त्तृदारकः प्रमाणं॥

ततस्तस्या एव सकाशादन्तःपुरसन्निवेशमन्तर्वंशिकपुरुषस्थानानि प्रमदवनप्रदेशानपि विभागेनावगम्य अस्तगिरिशिखरपातक्षुभितशोणित इव शोणीभवति भानुविम्बे पश्चिमाम्भोधिपयः पातनिर्व्वापितपतङ्गाङ्गारधूमसम्भार इव भरितनभसि तमसि विजृम्भिते। परदारपरामर्शोन्मुखस्य ममाचार्य्यकमिव[2] कर्त्तुं समुत्थिते गुरुपरिग्रहग्रहणश्लाघिनि ग्रहाग्रेसरे क्षपाकरे कल्पसुन्दरीवदनपुण्डरीकेणेव मद्दर्शनातिरागप्रथमोपनतेन स्मयमानेन चन्द्रमण्डलेन सन्धुक्षमाणतेजसि भुवनविजिगीषोद्यते देवे पुष्पधन्वनि यथोचितं शयनीयमभजे व्यचीचरञ्च[3]। सिद्धप्राय एव अयमर्थः किन्तु परकलत्रलङ्घ-

---

[1] All but B., which omits the passage, add मदुपभुक्तमुक्ते चित्रकूटगर्भवेदिकागते रत्नतल्पे तया सह व्याहार्षीत्, but this is the evident addition of a coarser and less discriminating hand.

[2] "Was to place my rule of conduct (आचार्य्यकं) in the moon (kshapákare), who boasted of his carrying off the wife of (the Guru of the gods) Vrihaspati."

[3] First pers. sing. indef. præt. of चर, "to go," with वि prefixed, "to reflect," verb of the 10th conjugation.

नाद्धर्म्मपीडा भवेत्। सात्यर्थकामयोर्द्वयोरुपलम्भे शास्त्रकारैरनुमतैवेति। गुरुजनबन्धमोक्षोपायाभिसन्धिना[1] मया चैष व्यतिक्रमः कृतस्तदपि पापं निर्हृत्य कियत्यापि धर्म्मकलया मां समाश्रयेदिति। अपि त्वेतदाकर्ण्य देवो राजवाहनः सुहृदो वा किं वक्ष्यन्तीतिचिन्तापराधीन एव निद्रया परामृश्ये। अदृश्यत च स्वप्ने हस्तिवक्त्रो[2] भगवानाहस्म च सौम्य उपहारवर्म्मन् मास्म ते दुर्विकल्पो भूत्[3]। यतस्त्वमसि मदंशः मज्जटाभारलालनोचितामरसरिदसौ[4] वरवर्णिनी। तां कदाचिद् गजाननो जलक्रीडां कुर्वन्नतिव्यगाहत[5]। सा च सपत्नीतनयविहितां[6] विलोडनामसहमाना तमशपत्। एहि मर्त्त्यत्वमिति। सोऽप्यहेतुकशापप्रदानात् क्रुद्धस्तामशपत् यथेह बहुभोग्या तथापि प्राप्य मानुषकमनेकसाधारणी भवेति तदयमर्यो भव्यो भवता निराशङ्कं इति। प्रतिबुध्य च प्रीतियुक्तस्तदहरपि प्रियासङ्केतव्यतिकरादिस्मरणेनाहमनैषम्। अन्येद्युरनन्यव्यावृत्तिरनङ्गो मय्येव इषुवर्षमवर्षत्। अशुष्यच्च[7] ज्योतिष्मतः प्रभामयं सरः प्रासरच्च तिमिरमयः कर्द्दमोऽहश्च

---

1 "Making great effort," "striving for," अभिसन्धिः समुद्योग इति भागुरिः.

2 Gañesa, having an elephant's head.

3 Third pers. sing. indef. præt. of भू, used in the sense of the imperative with the negative मास्म.

4 It is also read शङ्करजटा; but Gañesa, as a portion of Śiva, may appropriate his attributes, and as he is speaking, the pronoun seems most correct.

5 Here is a confusion of things and persons, the river Gangá and the goddess.

6 Gañesa was the son of Párvatí, as well as Gangá the bride of Śiva: the rivalry of these two ladies is a frequent subject of poetical allusion.

7 Third pers. sing. 1st præt. of शुष, "to dry, or be dried up."

कार्द्दमिकनिर्वसनश्च[1] दृढतरपरिकरः[2] खड्गपाणिरुपसंवृत्तप्रस्तु-तोपस्करः स्मरन्मातृदत्तान्यभिज्ञानानि राजमन्दिरपरिखामुद म्भसमुपातिष्ठम् । अथोपखातं[3] मातृगृहद्वारे पुष्करिकया प्रथमसन्निधायितां वेणुयष्टिमादाय तच्छायितया[4] परिखायां स्थापितया च प्राकारमत्यलङ्घयम् । अधिरुह्य पक्वेष्टकचितेन गोपुरोपरितलाधिरोहेण[5] सोपानपथेन भुवमभ्यवातरम् । अवतीर्णश्च वकुलवीथिमतिक्रम्य चम्पकावलीवर्त्मना मना-गिवोपसृत्योत्तराहि करुणं चक्रवाकमिथुनरवमशृणवम् । पुनरुदीचा पाटलापथेन स्पर्शलभ्यविशालसौधतुल्योदरेण[6] शरक्षेपमिव गत्वा पुनः प्राचा पिण्डीभाण्डीरखण्डमण्डितोभ-यपार्श्वेन सैकतपथेन किञ्चिदन्तरमतिक्रम्य पुनरवाचीं चूत-वीथिमगाहिषि । ततश्च गहनतरमुदरोपरचितरत्नवेदिकं मा-धवीलतामण्डपमीषद्विवृतसम्पुटोन्मिषितभासा[7] दीपवर्त्या न्यरूपयम् । प्रविश्य चैकपार्श्वे फुल्लपुष्पनिरन्तरकुरण्टपोतप-ङ्क्तिभित्तिपरिगतं गर्भगृहमवनिपतितारुणाशोकशाखामयम-भिनवकुसुमकोमलमुकुलपुलकलांच्छितं प्रत्यग्रप्रवालपटल-

---

[1] "Dirt, or dark coloured."

[2] "The girdle, or waistband."

[3] "Near to the fosse," an indeclinable compound, used attributively.

[4] तत् शायिता, "by that laid down," part. of the causal of शी, "to sleep."

[5] "A gateway or tower."

[6] A. has विमलसौधकुड्मोदरेण, B. विशालसौधतुल्योदरेण, C. विमलसौधकुलोदरेण, D. विशालसौधकुल्योदरेण. As the path lies amongst trees and shrubs, a comparison to a building or wall on either hand, not its real presence, is most consistent.

[7] B. has समुद्गक, C. समुद्गसम्पुट, A. and D. agree: in either case, something like a lantern is intended.

पाटलं कपाटमुद्घाट्य प्राविक्षम्। तत्र चासीद्विस्तीर्णं कुसुमशयनं मदनोपकरणवस्तुगर्भाश्च कमलिनीपलाशसम्पुटाः[1] दन्तमयस्तालवृन्तः[2] सुरभिसलिलभरितश्च भृङ्गारकः[3]। समुपविश्य मुहूर्त्तं विश्रान्तः परिमलमतिशयवन्तमाघ्रासिषम्। अश्रौषञ्च मन्दमन्दं पदशब्दं श्रुत्वैव सङ्केतगृहान्निर्गत्य रक्ताशोकस्कन्धपार्श्वव्यवहिताङ्गः स्थितोऽस्मि। सा च सुभ्रूः सुशी[4]मकामा शनैरुपेत्य मामदृष्ट्वा बलवद्व्यथिष्ट व्यसृजच्च मत्तराजहंसीव कण्ठरागवल्गुगद्गदां गिरं व्यक्तमस्मि विप्रलब्धा नास्त्युपायः प्राणितुम्। अयि हृदय किमिदमकार्य्यं कार्य्यवदध्यवस्यापि[5] तदसम्भवेन किमेवमुत्ताम्यसि[6]। भगवन् पञ्चबाण कस्तवापराधः कृतो मया यदेवं दहसि न च भस्मीकरोषीति। अथाहमाविर्भूय विवृतदीपभाजनो भामिनि ननु बह्वपराद्धं भवत्या चित्तजन्मनो[7] यदमुष्य जीवितभूतां रतिमाकृत्या कदर्थितवती धनुर्यष्टिं भ्रूलताभ्यां भ्रमरमालामयीं

---

[1] "A tray or dish," or the leaf of the lotus serving the purpose of one; betel, aromatics, perfumes, and the like being placed upon the leaves.

[2] "An ivory fan."

[3] "A ewer."

[4] The usual sense of **सुशीम** is "cold," but here it means "intense," **तीव्रमन्मथा**, or it may signify "one whom desire wastes."

[5] A. **कार्य्यवदध्यवसायश्रेयसा तदसम्भव**, B. **कार्य्यवदध्यवस्यापि तदसम्भवे**, C. **वदध्यवसायश्रेयसापि तदसम्भवेन**, D. **वदध्यवस्यापि तदसम्भवे.** The copyists seem to have been perplexed by the indeclinable past part. of **षो**, which, with **य**, may be **स्य** or **साय**, with **अधि** and **अव** prefixed, "having entered upon, or engaged eagerly in, what was impracticable as if it was practicable."

[6] **तम**, "to be distressed," verb, 4th conjugation, making the radical vowel long.

[7] "Káma or love."

ज्यां नीलालकद्युतिभिरस्त्राण्यपाङ्गवीक्षितैर्महारजनध्वजपटांशुकं दशनच्छदमयूखजालैः प्रथमसुहृदं मलयमारुतं परिमलपटीयसा निःश्वासपवनेन परिभृतरुतमतिमञ्जुलप्रलापैः पुष्पमयीं पताकां भुजयष्टिभ्यां दिग्विजयारम्भपूर्णकुम्भमिथुनमुरोजयुगलेन क्रीडासरो नाभिमण्डलेन सन्नाह्यरथमण्डलं श्रोणिमण्डलेन भवनरत्नतोरणस्तम्भयुगलमूरुयुगलेन लीलाकर्णकिशलयं चरणतलप्रभाभिरतः स्थान एव त्वां दुनोति मकरकेतुः । माम् पुनरनपराधमधिकमायासयतीत्येष अस्य दोषः । तत्प्रसीद सुन्दरि जीवय मां जीवनौषधैरिवापाङ्गैरनङ्गभुजङ्गदष्टमित्याश्लिष्टवानरीरमं रागावेशपेशलां विशाललोचनां। तदनन्तरं चिरपरिचिताविवातिरूढविश्रम्भौ क्षणमवतिष्ठावहि । तदा तदा वियोगकाले समायाते अहमुष्णमायत्तं च निश्वस्य किञ्चिद्दीनदृष्टिस्तां दृढं परिष्वज्यापसर्त्तुं प्रवृत्तः। अश्रुमुखी तु सा यदि प्रयासि नाथ प्रयातमेव मे जीवितं गणय। नय मामपि न चेद्दासजनो निःप्रयोजन इत्यञ्जलिमवतंसतामनैषीत्। अवादिषञ्च तामपि मुग्धे कः सचेतनः स्त्रियमभि[2]कामयमानां नाभिनन्दति । यदि मदनुग्रहनिश्चलस्तवाभिसन्धिराचराविचारं मदुपदिष्टं । आदर्शय राज्ञे मत्सादृश्यगर्भं चित्रपटमाचक्ष्व च किमियमाकृतिः पुरुषसौन्दर्य्यस्य परमारूढा न वा वाढमारूढेति नूनमसौ वक्ष्यति । ब्रूहि भूयो यद्येवमस्ति कापि तापसी देशान्तरभ्रम-

[1] Safflower, bearing red blossoms.

[2] According to the commentator, this sentiment is in Sakontalá.

णलब्धप्रागल्भ्या मम च मातृभूता तयेदमालेख्य रूपं पुरस्कृत्याहमुक्ता । सो ऽस्ति तादृग्मन्त्रो येन त्वमुपोषिता पर्व्वणि विविक्तायां भूमौ पुरोहितैर्हुतमुक्ते सप्तार्च्चिषि नक्तमेकाकिनी शतचन्दनसमिधः शतमगुरुसमिधः कर्पूरमुष्टीः पट्टवस्त्राणि च प्रभूतानि हूत्वा भविष्यस्येवमाकृतिः अथ चालयिष्यसि घण्टां । घण्टापुटक्वणिताहूतश्च भर्त्ता भवत्यै सर्व्वं रहस्यजातमाख्याय निमीलिताक्षो यदि त्वामालिङ्गेदियमाकृतिरमुमुपसङ्क्रामेत् त्वं तु भविष्यसि यथा पुराकारैव । यदि भवत्यै भवत्प्रियाय च रोचते न चास्मिन्विधौ विसंवादः[1] शङ्क्य इति । वपुश्चेदिदं तवाभिमतं सह सुहृन्मन्त्रिभिरनुजैः पौरजानपदैश्च सम्मन्त्र्य तेषामप्यनुमतेन कर्म्मण्यभिमुखेन स्थेयमिति । स नियतमभ्युपेष्यति पुनरस्यामेव प्रमदवनवाटीशृङ्गाटिकायामाथर्वणिकेन[2] विधिना सञ्ज्ञपितपशुना[3] ऽभिहुत्य मुक्ते हिरण्यरेतसि तद्धूमशमनेन संप्रविष्टेन मया ऽस्मिन्नेव लतामण्डपे स्थातव्यं त्वं पुनः प्रगाढायां प्रदोषवेलायामालपयिष्यसि कर्णे कृतनर्म्मस्मिता विकटवर्म्माणं धूर्त्तो ऽसि त्वमकृतज्ञश्च मदनुग्रहलब्धेनापि रूपेण लोकलोचनोत्सवायमानेन मत्सपत्नीरभिरमयिष्यसि । नाहमात्मविनाशाय वेतालोत्थापनमाचरेयमिति । श्रुत्वेदं त्वद्वचः स यद्वदिष्यति तन्मह्यमेकाकिन्युपागत्य निवेदयिष्यसि । ततः परमहमेव ज्ञास्या-

---

1 "Deception or disappointment."

2 "An open place"—one where several walks meet.

3 Part. pass. of ज्ञा in the causal form with सम् prefixed, "to slay."

मि। मत्पदचिह्नानि चोपवने पुष्करिकया प्रमार्ज्जयेति। सा तथेति शास्त्रोपदेशमिव मदुक्तमाहत्य कथं कथमप्यगादन्तःपुरं। अहमपि यथाप्रवेशं निर्गत्य स्वमेवावासमयासिषम्॥

अथ सा मत्तकाशिनी तथा तमर्थमन्वतिष्ठत्। अतिष्ठच्च तन्मते स दुर्मतिः। अभ्रमच्च पौरजानपदेष्वियमद्भुतायमाना वार्त्ता राजा किल विकटवर्म्मा देवीमन्त्रबलेन देवयोग्यं वपुरासादयिष्यिति। नूनमेष न विप्रलम्भोऽतिकल्याणः कैव कथा प्रमादस्य स्वस्मिन्नेवान्तःपुरोपवने स्वाग्रमहिष्यैव सम्पाद्यः किलायमर्थः। तथापि वृहस्पतिप्रतिमबुद्धिभिर्मन्त्रिभिरप्यभूदनुमतः यद्येवम्भावि नान्यदतः परमस्ति किञ्चिदद्भुतमचिन्त्यो हि मणिमन्त्रौषधीनां प्रभाव इति। प्रसृततरेषु लोकवादेषु प्राप्ते पर्व्वदिवसे प्रगाढायां प्रौढतमसि[1] प्रदोषवेलायामन्तःपुरोद्यानादुदैरत धूर्ज्जटिकण्ठधूम्रोधूमोद्गमः क्षीराज्यदधितिलगौरसर्षपवसामांसरुधिराहुतीनाञ्च परिमलः पवनानुसारी च दिशि दिशि प्रावात्सीत्[2]। प्रशान्ते च सहसा धूपोद्गमे तस्मिन्नहमविशम् निशान्तोद्यान[3]मागमच्च गजगामिनी। आलिङ्ग्य च मां सस्मितमभ्यधात्। धूर्त्त सिद्धं ते समीहितमवसितश्च पशुरसौ। अमुष्य चोपप्रलोभनाय त्वदादिष्टयादिशा[4] मयोक्तं। कितव न साधयामि ते सौन्दर्य्यमेवं सुन्दरो हि त्वमप्सरसामपि स्पृहनीयो भविष्यसि किमुत मानु-

---

1 "Concealment," "obscurity."

2 3d pers. sing. indef. præt. of वस, "to dwell," with प्र prefixed, "to spread abroad."

3 "The garden of the palace;" निशान्त having one of its meanings, "a house."

4 आदिश्, indication of doubt or suspicion reproved.

षीणां मधुकर इव निसर्गचापलाद्यत्र क्वचिदासज्जति भवादृशो नृशंस इति। तेन तु मे पादयोर्निपत्याभिहितं। रम्भोरु सहस्व मत्कृतानि दुश्चरितानि मनसापि न चिन्तयेयमितः परमितरनारीं। त्वरस्व प्रकृते कर्म्मणीति तदहमीदृशेन वैवाहिकेन नेपथ्येन त्वामभिसृतवती। प्रागपि रागाग्निसाक्षिकमनङ्गेन गुरुणा दत्तैव तुभ्यं एषा जाया पुनरपीमं जातवेदसं साक्षीकृत्य स्वहृदयेन दत्तेति प्रपदेन च चरणपृष्ठे निष्पीड्य प्रोत्क्षिप्तपादपार्ष्णिरितरेतरव्यतिषक्तकोमलाङ्गुलितलेन भुजलताद्वयेन कन्धरां ममावेष्ट्य सलीलमाननमानमय्य स्वयमुन्नमितमुखकमला विभ्रान्तविशालदृष्टिरसकृदभ्यचुम्बत् ॥

अथैनामिहैव कुरुण्टगुल्मगर्भे तिष्ठ यावदहं निर्गत्य साध्येयं साध्यं सम्यगिति विसृज्य तामुपसृत्य होमानलप्रदेशमशोकशाखावलंबिनीं घण्टामचालयम्। अकूजच्च सा तं जनं कृतान्तदूतीवाह्वयन्ती। प्रावर्त्तिषि चाहमगुरुचन्दनप्रमुखानि होतुम्। आयासीच्च राजा यथोक्तं देशं। शङ्कापन्नमिव किञ्चित्सविस्मयं विचार्य्य तिष्ठन्तमब्रवम्[1]। ब्रूहि सत्यं भूयोऽपि मे भगवन्तं चित्रभानुमेव[2] साक्षीकृत्य न चेदनेन रूपेण मत्सपत्नी रमयिष्यसि ततस्त्वमिदं रूपं संक्रमयेयमिति[3] स तदैव देव्येवेयं नोपधिरिति स्फुटोपजातः सम्प्रत्ययः प्रावर्त्तत

---

[1] First pers. sing. 1st præt. of ब्रू, "to speak:" the indicatory प of the inflective termination prevents the substitution of उव्, as in the 3d pers. plural, which is अब्रुवन्.

[2] A name of fire.

[3] First pers. sing. pot. of the causal of क्रम, "to go;" the vowel remains short, Gr. p. 159.

शपथाय । स्मित्वा पुनर्मयोक्तं । किं वा शपथे न कैव हि मानुषी मां परिभविष्यति यद्यप्सरोभिः सङ्गच्छसे सङ्गच्छस्व कामं । कथय कानि ते रहस्यानि तत्कथनान्ते त्वत्स्वरूपभ्रंश इति । सोऽब्रवीत् । अस्ति बद्धो मत्पितुः कनीयान् भ्राता प्रहारवर्म्मा । तं विषान्नेन व्यापाद्याजीर्णदोषं ख्यापयेय[1]मिति मन्त्रिभिः सहाध्यवसितं । अनुजाय विशालवर्म्मणे दण्ड[2]चक्रं पुण्ड्राभियोगाय दित्सितं । पौरवृद्धश्च पाञ्चालिकः परित्रातश्च सार्थवाहः खनति नाम्नो यवनाद्वज्र[3]मेकं वसुन्धरामूल्यं लघीयसार्घेण लभ्यमिति ममैकान्तेऽमन्त्रयेताम् । गृहपति[4]श्च ममान्तरङ्गभूतो जनपदमहत्तरः शतहलिरलीकापवादशीलमवलेपवन्तं दुष्टग्रामण्यमनन्तसीरं[5] जनपदकोपेन घातयेय[6]मिति दण्डधरानुद्धारकर्म्मणि[7] मत्प्रयोगान्नियोक्तुमभ्युपागमत् । इत्थमिदमचिरप्रस्तुतं रहस्यमित्याकर्ण्य तमियत् तवायुरुपपद्यस्व स्वकर्म्मोचितां गतिमिति छुरिकया द्विधा कृत्य कृत्तगात्रं तस्मिन्नेव प्रवृत्तस्फीतसर्प्पिषि हिरण्यरेतस्यजुहवम् । अभूच्चासौ

---

[1] First pers. sing. pot. causal of ख्या, "to tell," "I will cause it to be reported."

[2] "An army," "a division or detachment."

[3] A. has लक्षम्, but this is clearly wrong: all the others have वज्रं, "a diamond." The name in A. and C. is स्वभीति, but neither is likely to be very correct. The mention of a Yavana as a diamond-dealer is noticeable.

[4] "A householder," but here said to mean ग्रामाध्यक्ष, "head of a village or district," जनपदमहत्तरः.

[5] A proper name, a great farmer, or one who has extensive ploughing.

[6] First pers. sing. pot. causal of हन, "to kill," "I will to have him killed by a (pretended) popular tumult.

[7] "Employed in his death or extinction, which was not to be entrusted to the magistrate (Dańdadhara)."

भस्मसात्। अथ स्त्रीस्वभावादीषद्विह्वलां हृदयवल्लभां समाश्वास्य हस्तकिशलयमवलंब्य गत्वा तद्गृहमनुज्ञयास्याः सर्व्वाण्यन्तःपुराण्याहूय सद्य एव सेवां दत्तवान् विस्मितविलासिनीसार्थमध्ये कञ्चिद्विहृत्य कालं विसृष्टावरोधमण्डलस्तदन्तःपुरे तया सह निशामनैषम्। अलभे च तन्मुखाद्राजकुलस्य शीलम्। उषसि स्नात्वा कृतमङ्गलो मन्त्रिभिः सह समगच्छे तांश्चाब्रवम्। आर्य्या रूपेणैव सह परिवृत्तो मम स्वभावो य एष विषान्नेन हन्तुं चिन्तितः पिता मे स मुक्त्वा स्वमेतद्राज्यं भूय एव ग्राहयितव्यः पितृवदमुष्मिन् वयं शुश्रूषयैव वर्त्तामहे। न ह्यस्ति पितृबधात्परं पातकमिति। भ्रातरञ्च विशालवर्म्माणमाहूयोक्तवान् वत्स न सुभिक्षाः साम्प्रतं पुण्ड्रास्ते दुःखमोहोपहतास्त्यक्तात्मानो राष्ट्रं नः सुभिक्षमभिद्रवेयुरतः मुष्टिबधः सस्यबधो[1] वा यदोत्पद्यते तदाभियास्यसि नाद्य यात्रा युक्तेति। नगरवृद्धानथलापिषमल्पीयसा मूल्येन महार्हं वस्तु न मे लभ्यं धर्म्मरक्षायै तदनुगुणेनैवमूल्येनादानं क्रियतामिति। शतहलिञ्च राष्ट्रमुख्यमाहूयाख्यातवान् योऽसावनन्तसीरः प्रहारवर्म्मणः पक्ष इति विनाशयिषितः[2] सोऽपि पितरि मे प्रकृतिस्थे किमिति नाश्येत[3] त्वयापि तस्मिन् संरम्भो न कार्य्य इति। त इमे सर्व्वमाभिज्ञानिकमुपलभ्य स एवायमितिनिश्चिन्वाना विस्मयमानाश्च

[1] "Affray, or devastation of crops."

[2] Past part. of the desiderative of the causal of णश, "to perish," with वि prefixed, "has been sought to be caused to perish."

[3] Third pers. sing. pot. pass. of the causal of णश.

मां महादेवीञ्च प्रशंसन्तो मन्त्वबलानि चोद्घोषयन्तो बन्धनात्पितरौ निःक्रमय्य[1] स्वं राज्यं प्रत्यपादयन् । अहञ्च तया मे धात्र्या सर्व्वमिदं समाचेष्टितं रहसि पित्रोरवगमय्य[2] प्रहर्षकाष्ठाधिरूढयोस्तयोः पादमूलमभजे । अभज्ये च यौवराज्यलक्ष्म्या तदनुज्ञातया[3] । प्रसाधितात्मा देवपादविरहदुःखदुर्भगान् भोगान्निर्विशम् । भूयोऽस्य पितृसखस्य सिंहवर्म्मणो लेख्याच्चण्डवर्म्मणश्चम्पाभियोगमभिगम्य शत्रुवधो मित्ररक्षा चोभयमपि करणीयमेवेत्यलघुना लघुसमुत्थानेन सैन्यचक्रेणाभ्यसरम् । अभूवञ्च भूमिस्त्वत्पादलक्ष्मीसाक्षात्क्रियामहोत्सवानन्दराशेरिति ॥

श्रुत्वैतद्देवो राजवाहनः सस्मितमवादीत् । पश्यत पारतल्पिकमुपधियुक्तमपि गुरुजनबन्धव्यसनमुक्तिहेतुतया दुष्टामित्रप्रमापणोपायतया राज्योपलब्धिमूलतया च पुष्कलावर्थधर्म्मावपरीरधत्[4] किं हि बुद्धिमद्भिः प्रयुक्तं नाभ्युपैति शोभामित्यर्थपालमुखे विधाय स्निग्धदीर्घां दृष्टिमाचष्ट । भवानात्मीयचरितमित्यादिदेश । सोऽपि बद्धाञ्जलिरभिदधे ॥

इति दशकुमारचरिते उपहारवर्म्मचरितं
नाम तृतीय उच्छ्वासः ॥

---

[1] Indeclinable past part. of the causal of क्रम, "to go," with निर् prefixed, "having taken out or liberated."

[2] The same of गम, "to go," with अव prefixed, "to make known."

[3] तदनुज्ञात refers to parents, "permitted or assented to by them," or it may be considered as referring to Kalpa-Sundarí, "permitted by her."

[4] Third pers. sing. indef. præt. of the causal of राध, "to be accomplished," "he has caused to be attained or effected entire (पुष्कलौ) wealth (or worldly success) and virtue." The moral of this story therefore is, that the end fully justifies the means.

अथ अर्थपालचरितं चतुर्थ उच्छ्वासः

देव सो ऽहमप्येभिरेव सुहृद्भिरेकशर्म्मोर्म्मिमालिनेमिभूमिवलयं परिभ्रमन्नुपासरम् कदाचित्काशिपुरीं वाराणसीमुपस्पृश्य[1] मणिभङ्गनिर्म्मलाम्भसि मणिकर्णिकायाम[2]विमुक्तेश्वरं[3] भगवन्तमन्धकमथनं[4] प्रणम्य प्रदक्षिणं परिभ्रमन् पुरुषमेकमायामवन्तमायसपरिघं[5] पीवराभ्यां भुजाभ्यामाबध्यमानपरिकरमनवरतरुदितोच्छूनताम्रदृष्टिमद्राक्षम् । अतर्कयञ्च कर्कशो ऽयं पुरुषः कार्पण्यमिव वर्षति म्लानतारं चक्षुरारम्भश्च साहसानुवादी[6] नूनमसौ प्राणनिःस्पृहः किमपि कृच्छ्रं प्रियजनव्यसनमूलं प्रपित्सते[7] । तत्पृच्छेयमेनमस्तिचेद्धमापि को ऽपि साहाय्यावकाशस्तमेनमभ्युपपद्य इत्यपृच्छम् । भद्र सन्नाहो[8] ऽयं साहसमवगमयति न चेद्गोप्यमिच्छामि श्रोतुं तु शोकहेतुमिति । स मां बहुमानं निर्वर्ण्य को दोषः श्रूयतामिति । ततः क्वचित् करवीरतले मया सह निषण्णः कथामकार्षीत् ।

---

[1] Benares or Kási: the former is correctly Varanásí, from its lying between two small feeders of the Ganges, the Varana and the Asi.

[2] The name of one of the principal landing places or gháts by the side of the Ganges at Benares.

[3] A name of Śiva, and the form under which he was worshipped at Benares, especially in the early ages of the Christian era, having been in some degree displaced by another denomination, that of Visveśvara.

[4] The destroyer of the daitya Andhaka.

[5] An iron club.

[6] "Has the semblance of oppression," अनुवादिन् सदृशः.

[7] Third pers. sing. pres. desiderative of पद, "to go," with प्र prefixed, "to engage in or perform," "he purposes to engage in some penance," कृच्छ्रं.

[8] "This undertaking."

महाभाग सोऽहमस्मि पूर्व्वेषु कामचरः पूर्णभद्रो नाम गृहपतिपुत्रः प्रयत्नसंवर्द्धितोऽपि पित्रा दैवच्छन्दानुवर्त्ती[1] तु चौरवृत्तिरासम् । अथास्यां काशिपुर्य्यामर्य्यवर्य्यस्य कस्यचिद्गृहे चोरयित्वा रूपाभिग्राहितो[2] बद्धः । बद्धे च मयि मत्तहस्ती मृत्युविजयो नाम हिंसाविहारी राजगोपुरोपरितलाधिरूढस्य पश्यतः कामपालनाम्नः उत्तमामात्यस्य शासनाज्जनकण्ठरवद्विगुणितघण्टारवो मण्डलित[3]हस्तकाण्डोऽभ्यधावत् । अभिपत्य च मया निर्भयेन निर्भर्त्सितः परिणाम[4]मन्दारुखण्डसुषिरानुप्रविष्टोभयभुजदण्डचण्डघटितप्रतिमानो[5] भीत इव न्यवर्त्तिष्ट । भूयश्च नेत्रा जातसंरम्भेण निकामदारुणैर्वागङ्कुशपादपातैरभिमुखीकृतो मयापि द्विगुणाबद्धमन्युना निर्भर्त्स्याभिहतो निवृत्त्यापाद्रवत् । अथ मयानुपत्य सरभससमाकृष्टः रुष्टश्च यन्ता हन्त मृतोऽसि क्व गच्छसि कुञ्जरापसदे[6]ति निशितेन वारणेन[7] वारणं मुहुर्मुहुरभिघ्नन्निर्याण[8]भागे कथमपि मदभिमुखमकरोत् । अथापसरतु द्विरदवराक एषोऽन्यः कश्चिन्मातङ्गपतिरानीयतां येनाहमिह मुहूर्त्तं विहृत्य गच्छामि गन्तव्यां

---

1 "Following the will of destiny."

2 "Apprehended or caused to be seized in the fact."

3 "Curling up his trunk."

4 "Bending the head so as to strike with the tusk."

5 The space between the tusks **प्रतिमानः** was violently struck with the wood, in the holes of which the culprit's arms were passed, a sort of stocks for the hands instead of the feet.

6 **कुञ्जरापसदः गजाधमः.**

7 The hook or goad used for driving elephants, the ankuśa.

8 **निर्य्याण,** the outer angle of the eye of an elephant or part next to it, the temples.

गतिमित्यवोचम्। हृष्टैव स मां रुष्टमुद्गर्ज्जन्तमुत्क्रामन्तं यन्तृनिष्ठुराङ्गः पलायिष्ट। मन्त्रिणा पुनरहमाहूयाभ्यभाषिषि[1]। भद्र मृत्युरिव एष मृत्युविजयो नाम हिंसाविहारी सोऽयमपि तावत्त्वयैवम्भूतः कृतः। तद्विरम कर्म्मणोऽस्मान्मलीमसात् किमलमसि प्रपद्यास्मानार्य्यवृत्त्या वर्त्तितुमिति। यथाज्ञापयति तथेति विज्ञापितोऽयं मया मित्रवन्मय्यवर्त्तिष्ट॥

मयैकदा रहसि जातविश्रम्भेण पृष्टः सोऽभाषत स्वचरितं। आसीत् कुसुमपुरे राज्ञो रिपुञ्जयस्य मन्त्री धर्म्मपालो नाम विश्रुतधीः श्रुतर्षिरमुष्य पुत्रः सुमित्रो नाम पित्रैव समः प्रज्ञागुणेषु तस्य द्वैमातुरः कनीयान् भ्राताहम्। वेशेषु विलसन्तं मामसौ विनयरुचिरवारयत्। अवार्य्यो दुर्न्नयश्चाहमुपसृत्य दिङ्मुखेषु भ्रमन्यदृच्छयास्यां वाराणस्यां प्रमदवने मदनदमनाराधनाय[2] निर्गत्य सहसखीभिः कन्दुकेनानुक्रीडमाना[3] काशीभर्त्तुश्चण्डसिंहस्य कन्या कान्तिमती नाम चक्रमे। कथमपि समगच्छे च। अथ छन्नं च विहरता कुमारीपुरे सा मयासीदापन्नसत्वा कञ्चित्सुतञ्च सूतवती मृतजात इति सोऽपविद्धस्तया रहस्यनिर्भेदभयात् परिजनेन क्रीडाशैले शवर्य्या[4] च श्मशानमानीतः। तयैव निवर्त्तमानया निशीथे राजवीथ्यामारक्षिकपुरुषैरभिगृह्य तर्ज्जितया दण्डपारुष्यभीतया नि-

---

[1] First pers. sing. indef. præt. passive of अभिभाष, "to speak to."

[2] The destroyer of Kámadeva, a name of Śiva.

[3] A light ball for playing with.

[4] A Savarí, a woman of a low caste, or one of a barbarous and forest tribe.

भिन्नप्रायं रहस्यं। राजाज्ञयाहमाक्रीडगिरिदरीगृहे विश्रब्धप्रसुप्तस्तयोपदर्शितो यथोपपन्नरज्जुबद्धः श्मशानमुपनीय मातङ्गोद्यतेन[1] कृपाणेन प्राजिहीर्षे[2]। नियतिबलाल्लूनबन्धस्तमसिमाछिद्या[3]न्त्यजं तमन्यांश्च कांश्चित् प्रहृत्यापासरम्। अशरणश्चभ्रमन्नटव्यामेकदाश्रुमुख्या कयापि दिव्याकारया सपरिवारया कन्यकयोपास्थापिषि[4] सा मामञ्जलिकिशलयोत्तंसितेन मुखविलोलकुन्तलेन मूर्ध्ना प्रणम्य मया सह महावनवटद्रुमस्य कस्यापि महतः प्रच्छायशीतले निषण्णा कासि वासु कुतोऽस्यागता कस्य हेतोरस्य मे प्रसीदसीति साभिलाषमाभाषिता मया वाङ्मयं मधुवर्षमवर्षत् ॥

आर्य्य नाथस्य यक्षाणां मणिभद्रस्यास्मि दुहिता तारावली नाम। साहं कदाचिदगस्त्यपत्नीं लोपमुद्रां नमस्कृत्यापवर्त्तमाना मलयगिरेः परेतावासे वाराणस्याः कमपिदारकं रुदन्तमद्राक्षम्। आदाय चैनं तीव्रस्नेहान्मम पित्रोः सन्निधिमनैषम्। अनैषीच्च तातो मे देवस्यालकेश्वर[5]स्यास्थानीं। अथाहमाहूयाज्ञप्ता हरसखेन बाले बालेऽस्मिन् कीदृशस्ते भाव इति। औरस इवास्मिन् वत्से वत्सलतेति मया विज्ञापितः।

---

[1] मातङ्ग here implies "an executioner," or a Chandála so employed.

[2] First pers. sing. 1st præt. of the passive of the desiderative form of हृ, "to take," with प्र prefixed, "to strike," "I was intended to be struck or killed."

[3] आछिद्य आहृत्य, "having seized."

[4] First pers. sing. 3d præt. passive of the causal of स्था, "to stay."

[5] Kuvera, sovereign of Alaká or Mount Kailása, the friend of Śiva, and supreme monarch of the Yakshas.

सत्यमाह वराकीति तन्मूलामतिमहतीं कथामकरोत् । तच्चैतावदवगतं मया त्वं किल शौनकः[1] शूद्रकः कामपालश्चाभिन्नः बन्धुमती विनयवती कान्तिमती चाभिन्ना वेदिमती यक्षदासी सोमदेवी चैकैव । हंसावती सुरसेना सुलोचना चानन्यानन्दिनी रङ्गपताका इन्द्रसेना चापृथग्भूता । या किल शौनकावस्थायामग्निसाक्षिकमात्मसात् कृता गोपकन्या सैव किलार्य्यदासी पुनश्चाद्य तारावलीत्यभूवम् । बालश्च किल शूद्रकावस्थे त्वयि आर्य्यदास्यवस्थायां मय्युदभूत् । अवर्द्धत च विनयवत्या स्नेहवासनया स तु तस्या कान्तिमत्यवस्थायामद्योदभूत् । एवमनेकमृत्युमुखपरिभ्रष्टं दैवान्मयोपलब्धं तमेकपिङ्गा[2]देशाद्वने तपस्यतो राजहंसस्य देव्यै वसुमत्यै तत्सुतस्य भाविचक्रवर्त्तिनो राजवाहनस्य परिचर्य्यार्थं समर्प्य गुरुभिरनुज्ञाता कृतान्तयोगात् कृतान्तमुखपरिभ्रष्टस्य ते पादपद्मशुश्रूषणार्थमागतास्मीति ॥

इति श्रुत्वा तामनेकजन्मरमणीमसकृदाश्लिष्य हर्षाश्रुमुखो मुहुर्मुहुः सान्त्वयित्वा तत्प्रभावदर्शिते महति मन्दिरे अहर्निशं भूमिदुर्लभान् भोगानन्वभूवम् । द्विचाणि दिनान्यतीत्य मत्त-

---

[1] In what follows we have three persons named, each with five wives; or Śaunaka with Bandhumatí, Vedimatí, Hansávatí, Ananyanandiní, and Gopakanyá; Śúdraka with Vinayavatí, Yakshadásí, Surasená, Rangapatáká, and A'ryadásí; and Kámapála with Kántimatí, Somadeví, Sulochaná, Indrasená, and Táravalí; who are declared to be respectively the same individual, that is, in different lives. Reference is here obviously intended to other narratives, of which Śaunaka and Śúdraka were respectively the heroes. The only Śúdraka of whom we know any thing is the one mentioned in the Introduction to the Mrichchakaltí, as the king of Magadha and author of the drama.

[2] A name of Kuvera.

काशिनीं तामवादिषम् । प्रिये प्रत्युपकृत्य मत्प्राणद्रोहिणश्चण्डसिंहस्य वैरनिर्यातनसुखमनुबुभूषामीति । तया सस्मितमभिहितमेहि कान्त कान्तिमतीदर्शनाय नयामि त्वामिति स्थितेऽर्द्धराचे राज्ञो वासगृहमनीये । ततस्तच्छिरोभागवर्त्तिनीमादायासियष्टिं प्रबोध्यैनं प्रस्फुरन्तमब्रवम् । अहमस्मि भवज्जामाता भवदनुमत्या विना तव कन्यकाभिमर्शी तमपराधमनुवृत्त्या प्रमार्ष्टुमागत इति । सोऽतिभीतो मामभिप्रणम्याह । अहमेव मूढापराद्धो यस्तव दुहितृसंसर्गानुग्राहिणो ग्रहग्रस्त[1] इवोत्क्रान्तसीमा स्वयं समादिष्टवान् त्वद्वधं । तदास्तां कान्तिमती राज्यमिदं मम च जीवितमद्यप्रभृति त्वदधीनमित्यवादीत् । अथापरेद्युः प्रकृतिमण्डलं सन्निधाप्य विधिवदात्मजायाः पाणिमग्राहयत् । अश्रावयच्च तनयवार्त्तां तारावली कान्तिमत्यै सोमदेवीसुलोचनेन्द्रसेनाभ्यश्च पूर्व्वजातिवृत्तान्तं । इत्थमहम् मन्त्रिपदादेशं यौवराज्यमनुभवन् विहरामि विलासिनीभिरिति ॥

स[3] एवं मादृशेऽपि जन्तौ परिचर्य्यानुबन्धी बन्धुरेकः सर्व्वभूतानामलसकेन[2] स्वर्गते श्वशुरे ज्यायसि च श्याले चण्डघोषनाम्नि स्त्रीष्वतिप्रसङ्गात् प्रागेव क्षयक्षीणायुषि पञ्चवर्षदे-[4]

---

[1] "Affected or seized by a planet," "affected with temporary insanity," "moonstruck."

[2] "By the destructibility or perishable nature of all beings," क्षयस्त्वलसकोमत इति वैजयन्ती.

[3] Kumárapála, the narrative being resumed by Purńabhadra.

[4] "Something less than five years' old," ईषदसमाप्तो कल्पदेश्यदेशीयः.

शीयं सिंहघोषनामानं कुमारमभ्यषेचयदवर्द्धयच्च विधिनैनं स साधुः । तस्याद्य यौवनोन्मादिनः पैशुन्यवादिनो दुर्म्मन्त्रिणः कतिचिदासन्नान्तरङ्गभूताः तैः किलासावित्थमग्राह्यत । प्रसह्यैव स्वसा तवामुना भुजङ्गेन सङ्गृहीता पुनः प्रसुप्ते राजनि प्रहर्त्तुमुद्यतासिरासीत् तेनैवास्मै दैवात्तत्क्षणप्रबुद्धेन भीत्यानुनीय कन्या दत्ता । तच्च देवज्येष्ठं चण्डघोषं विषेण हत्वा बालोऽयमसमर्थ इति त्वमद्यापि प्रकृतिविश्रम्भणायोपेक्षितः क्षिणोति[1] पुरा स कृतघ्नो भवन्तं । तमेवान्त[2]कपुरं गमयितुं यतस्वेति । स तथा दूषितोऽपि यक्षिणीप्रभावभयान्नामुष्मिन् पापमाचरितुमशकत् । एषु किल दिवसेष्वयथापूर्व्वमाकृतौ कान्तिमत्याः समुपलक्ष्य राजमहिषी सुल[3]क्षणा नाम सप्रणयमपृच्छद् देवि नाहमयाथातथ्येन विप्रलम्भनीया कथय तथ्यं केनेदमयथापूर्व्वमाननारविन्दे तवैषु वासरेष्विति । सा त्ववादीत् भद्रे स्मरसि किमद्याप्ययाथातथ्येन किञ्चिन्मयोक्तपूर्व्वं । सखी मे तारावली सपत्नी च किमपि कलुषिताशया रहसि भर्त्त्रा मन्नोचापदिष्टाप्रणयमभ्युपेक्ष्य प्रणम्यमानाप्यस्माभिरुपोढमत्सरा प्रावसत् अवसीदति च नः पतिरतोऽस्ति मे दौर्म्मनस्यमिति । तत्प्रायेणैकान्ते सुलक्षणया कान्ताय कथितं । अथासौ निर्भयोऽद्य[4]

---

[1] The present tense, with पुरा used in the sense of the future.

[2] "The city of the destroyer," "Yama the regent of the dead."

[3] The wife of Chaṇḍaghosha.

[4] A. C. D. have निर्भरोद्यत्, B. निर्भरोद्य, E. reads as in the text.

प्रियतमाविरहपाण्डुभिरवयवैर्धैर्य्यस्तम्भिताश्रुपर्य्याकुलेन चक्षुषोष्मश्वासशोषिताभिरिवानतिपेशलाभिर्वाग्भिर्वियोगं दर्शयन्तं कथमपि राजकुले कार्य्याणि कारयन्तं पूर्व्वसङ्केतितैः पुरुषैरभिग्राह्याबन्धयत्। तस्य किल स्थानस्थानेषु दोषमुद्धोष्य[1] तदुद्धरणीये चक्षुषी यथा तन्मूलमेवास्य मरणं भवेदिति। अतोऽचैकान्ते यथेष्टमश्रु मुक्त्वा तस्य साधोः पुरः प्राणान् मोक्तुकामो बध्नामि परिकरमिति ॥

मयापि तत्पितृव्यसनमाकर्ण्य पर्य्यश्रुणा सोऽभिहितः सौम्य किं तव गोपायित्वा यस्तस्य सुतो यक्षकन्यया देवस्य राजवाहनस्य पादशुश्रूषार्थं देव्या वसुमत्या हस्तन्यासः कृतः सोऽहमस्मि। शक्ष्यामि सहस्रमेव भटानामुदायुधानां हत्वा पितरं मोचयितुम्। अपि तु सङ्कुले यदि कश्चित् पातयेत्तदङ्गे शस्त्रिकां सर्व्व एव मे यत्नो भस्मनि हुतमिव भवेदित्यनवसितवचन एव मयि महानाशीविषः[2] प्राकाररन्ध्रेणोदैरयच्छिरस्तमहं[3] मन्त्रौषधबलेनाभिगृह्य पूर्णभद्रमब्रवम्। भद्र सिद्धं नः समीहितं। अनेन तातमलक्ष्यमाणः सङ्कुले यदृच्छया पातितेन नाम दंशयित्वा तथा विषं स्तम्भयेयं यथामृत इत्युदास्येत। त्वया तु मुक्तसाध्वसेन माता मे बोधयितव्या यो यक्ष्या वने देव्या वसुमत्या हस्तार्प्पितो युष्मत्सूनुः सोऽनुप्राप्तः पितुरवस्थां मत्त उपलभ्य बुद्धिबलादित्थमाचरिष्यति। त्वया मुक्तचासया

---

[1] B. reads उद्घाट्य, "having opened;" E. उद्बोध्य, "having made known."

[2] "A snake."

[3] Third pers. sing. 1st præt. of the causal of ईर, "to go," with उद् prefixed, "put forth."

राज्ञे प्रेषणीयं। एष खलु क्षत्रधर्म्मः यद्बन्धुरबन्धुर्वा दुष्टः स निरपेक्षं निग्राह्य इति। स्त्रीधर्म्मश्चैष यददुष्टस्य दुष्टस्य वा भर्त्तुर्गतिर्गन्तव्येति। तदहममुनैव सह चिताग्निमारोक्ष्यामि। अभिजनानुरूपः पश्चिमो विधिरनुज्ञातव्य इति। स एवं निवेदितो नियतमनुज्ञास्यति। ततः स्वमेवागारमानीय काण्डपट[2]परिक्षिप्ते विविक्तोद्देशे दर्भसंस्तर[3]मधिशाय्य स्वयंकृतानुमरणमण्डनया त्वया तत्र च सन्निधेयमिति। अहं तु वाह्यकक्ष्यागतस्त्वया प्रावेश[4]यिष्ये। ततः पितरमुज्जीव्य तदभिरुचितेनाभ्युपायेन चेष्टिष्यामह इति। स तथेति हृष्टतरस्तूर्णमभ्यगात्। अहं तु घोषणास्थाने चिञ्चावृक्षं घनतरविपुलशाखमारुह्य गूढतनुरतिष्ठम् ॥

आरूढश्च लोको यथायथमुच्चैःस्थानान्युच्चावचप्रलापः स्थितः तावन्मे पितरं तस्करमिव पश्चाद्बद्धभुजमुद्धुर[5]ध्वनिमहाजनानुयातमानीय मदभ्यास एव स्थापयित्वा मातङ्गस्त्रिरघोषयत्। एष मन्त्री कामपालो राज्यलोभाद्भर्त्तारं चण्डसिंहं

---

[1] A. has अपदिश्येत, B. D. उत्सृज्येत, C. E. उदास्येत; either this or the second reading is equally good; the latter is the 3d pers. sing. pot. of the passive of अस, "to throw," with उद prefixed, "shall be abandoned as if dead."

[2] "Inclosed with a screen," काण्डपटः.

[3] "Having caused to be placed (the body of Kámapála) upon (अधिशाय्य) a pile or bed of darbha-grass." All the copies read ततः स्वमेवागारम, understanding probably स्व, "himself," "his body;" but possibly a preferable reading were ततस्तमेव अधिशाय्य, as the causal participle requires a second accusative.

[4] First pers. sing. indef. future of the passive of the causal of विश, with प्र and आ prefixed, "to enter in," "I shall be made to be admitted."

[5] "Unrestrained," "unbounded," उद्धुरन्तु विशृंखलं.

युवराजं चण्डघोषञ्च विषान्नेनोपांशु हत्वा पुनर्देवोऽपि सिंहघोषः पूर्णयौवन इत्यमुष्मिन्पापमाचरिष्यन् विश्वासाद्रहस्य भूमौ पुनरमात्यं शिवनागमाहूय स्थूणमङ्गारवर्षञ्च[1] राजबधायोपजप्य तैः स्वामिभक्त्या विवृतगुह्यो[2] राज्यकामुकस्यास्य ब्राह्मणस्यान्धतमसप्रवेशो न्याय्य इति प्राड्विवाकवाक्यादक्ष्युद्धरणाय नीयते। पुनरन्योऽपि यदि स्यादन्यायवृत्तिस्तमप्येवमेव यथार्हेण दण्डेन योजयिष्यति देव इति। श्रुत्वैतद्व्द्वकलकले महाजने पितुरङ्गे प्रदीप्तशिरसमाशीविषं व्यक्षिपम्। अहञ्च भीतो नामावप्लुत्य तत्रैव जनानुलीनः क्रुद्धव्यालदष्टस्य तातस्य पिहितजीवरक्षो विषं क्षणादस्तम्भयम्। अपतच्च स भूमौ मृतकल्पः प्रालपच्च सत्यमिदं राजावमानिनो देवो दण्ड एव स्पृशतीति यदयं अक्षिभ्यां विनाऽवनिपतिना चिकीर्षितः प्राणैरेव वियोजितो विधिनेति मदुक्तं केचिदनुमन्यन्त अपरे तु पुनर्निनिन्दुः। दर्वीकरस्तु तमपि चण्डालं दृष्ट्वारूढत्रासद्रुतलोकदत्तमार्गः प्राद्रवत्। अथ मदम्बा पूर्णभद्रप्रबोधितार्था तादृशेऽपि व्यसने नातिविह्वला कुलपरिजनानुयाता[3] पद्भ्यां धीरमागत्य मत्पितुरुत्तमाङ्गमुत्सङ्गेन धारयन्ती स्थिता राज्ञे समादिशत्[4]। एष मे पतिस्तवापकर्त्ता नवेति दैवमेव जानाति न मेऽनयास्ति चिन्तया फलं। अस्य

---

[1] Sthúńa and Angáravarsha are proper names.

[2] "The secret was revealed."

[3] B. has अल्पपरिजन.

[4] Third pers. sing. 1st præt. of दिश, with सम and आ prefixed, "to apprise," see 48.

तु पाणिग्राहकस्य गतिमननुप्रपद्यमाना भवत्कुलं कलङ्कये[1]-यमतो ऽनुमन्तुमर्हसि भर्त्त्रा सह चिताधिरोहणाय मामिति। श्रुत्वा चैतत्प्रीतियुक्तः प्रतिसमादिक्षत्[2] क्षितीश्वरः। क्रियतां कुलोचितः संस्कारः। उत्सवोत्तरं[3] च पश्चिमं विधिसंस्कारमनुभवतु मे भगिनीपतिरिति। चण्डाले तु मत्प्रतिषिद्धसकलमन्त्रवादिप्रयासे[4] संस्थिते कामपालो ऽपि कालदष्ट एवेति स्वभवनोपनयनममुष्य स्वमाहात्म्यप्रकाशनाय महीपतिरन्वमंस्त। आनीतश्चपिता मे विविक्तायां भूमौ दर्भशय्यामधिशयानः स्थितो ऽभूत्। अथ मदम्बा मरणमण्डनमनुष्ठाय सकरुणं सखीरामन्त्र्य मुहुरभिप्रणम्य भवनदेवताः यत्ननिवारितपरिजनाक्रन्दिता पितुर्मे शयनस्थानमेकाकिनी प्राविक्षत्। तत्र पूर्वमेव पूर्णभद्रोपस्थापितेन च मया वैनतेयता[5]-गतेन निर्विषीकृतं भर्त्तारमैक्षत। हृष्टतमा पत्युः पादयोः पर्य्यश्रुमुखी प्रणिपत्य माञ्च मुहुर्मुहुः प्रस्तुतस्तनी परिष्वज्य

---

[1] First pers. sing. pot. mood of a nominal verb, formed from कलङ्क, "a mark or stain."

[2] Third pers. sing. indef. præt. of समादिश, as in 46, with प्रति prefixed, "to inform in return," "to reply to."

[3] B. and D. has उत्सवान्तरम्, A. C. and E. उत्सवोत्तरं, "the end or supplement of the festival;" but it is rather a questionable phrase. One sense of उत्सव is "anger;" so that it may mean, "the last obsequial rite, with which 'my' anger ceases." The commentary is silent.

[4] "The Chańdála having perished, and being a check to any report that all the effects of the venom had been prevented by my charms."

[5] All the copies, except A., have वैनतेयतां गतेन; but the reading of the latter seems preferable, "having come with the faculty," *i.e.* the speed of the son of Vinatá or Garuda; or, in the other case, it may mean, "by me who had obtained the faculty," &c. either in regard to speed, or hostility to serpents, preventing the action of their venom.

सहर्षवाष्पगद्गदमगदत् । पुत्र योऽसि जातमात्रः पापया मया परित्यक्तः स किमर्थमेव मामतिघृणामनुगृह्णासि । अथवैष निरपराध एव ते जनयिता युक्तमस्य प्रत्यानयनमन्तकाननात् । क्रूरा खलु तारावली या त्वामुपलभ्यापि तत्वतः कुवेरादसमर्थ मह्यमर्प्पितवती देव्यै वसुमत्यै । सैव वासदृशकारिणी । नहि तादृशाद्भाग्यराशेर्विना[1] मादृशो जनोऽल्पपुण्यस्तवार्हति कलप्रलापामृतानि कर्णाभ्यां पातुम् । एहि मां परिष्वजस्वेति भूयो भूयः शिरसि जिघ्रन्त्यङ्कमारोपयन्ती तारावलीं गर्हयन्त्यश्रुभिरभिषिञ्चन्त्युत्कम्पिताङ्गयष्टिरन्यादृशी क्षणमजनिष्ट । जनयिताऽपि मे नरकादिव स्वर्गं तादृशाद्व्यसनात्तथाभूतमभ्युदयमारूढः पूर्णभद्रेण विस्तरेण यथावृत्तमावेदितो भगवतो मघवतोऽपि भाग्यवन्तमात्मानमजीगणत्[2] । मनागेव च मत्सम्बन्धमाख्याय हर्षविस्मितात्मनोः पित्रोरकथयम् । आज्ञापयत काद्य नः प्रतिपत्तिरिति पिता मे प्राब्रवीत् । वत्स गृहमेवेदमस्मदीयमतिविशालशालवलयमक्षय्यायुधग्राममलङ्घ्यतमा च गुप्तिः । उपकृताश्च मया बहवः सन्ति सामन्ताः प्रकृतयश्च भूयस्यो न मे व्यसनमनुरुध्यन्ते । सुभटानाञ्चानेकसहस्रमस्त्येव ससुहृत्पुत्रदारमतोऽत्रैव कतिपयान्यहानि स्थित्वा वाह्याभ्यन्तरकोपानुत्पादयिष्यामः कुपितांश्चोपसंगृह्य प्रोत्साह्य ह्यस्य प्रकृ-

---

[1] "Without (undergoing) such a load (or heap) of (adverse) fortune, I should not have been worthy," &c.

[2] Third pers. sing. indef. præt. of गण, "to reckon," verb, 10th conjugation.

त्यमित्रानुत्थाप्य सहजांश्च द्विषो दुर्दान्तमेनमुच्छेत्स्याम इति। को दोषस्तथास्त्विति तातस्य मतमन्वमंसि ॥

तथास्मासु प्रतिविधाय तिष्ठत्सु राजाऽपि विज्ञापितोदन्तो जातानुतापः पारग्रामिकान्प्रयोगान् प्रायः प्रायुंक्त ते चास्माभिः प्रत्यहमहन्यन्त[1]। अस्मिन्नेवावसरे पूर्णभद्रमुखाच्च राज्ञः शय्यास्थानमवगम्य तदैव स्वोदवसित[2]भित्तिकोणादारभ्य सुरुङ्गामकार्षम्। गता च सा भूमिः स्वर्गकल्पमनल्पकन्यकाजनं कमप्युद्देशं। अव्यथिष्ट च दृष्ट्वैव मां स नारीजनः तत्र काचिदिन्दुलेखेव स्वलावण्येन रसातल[3]ान्धकारं निर्धूनाना[4] विग्रहिणीव देवी वसुन्धरा। हरगृहिणीवासुरविजया यावतीर्णा पातालमागता भूमिरिव विग्रहिणी गृहिणीव भगवतः कुसुमधन्वनो राज्यलक्ष्मीरिवानेककुनृपतिदर्शनपरिहाराय महीविवरं प्रविष्टा निष्टप्तकनकपुत्रिकेवावदातकान्तिः कन्यका चन्दनलतेव मलयमारुतेन मद्दर्शनेनोदकम्पत। तथाभूते च तस्मिन्नङ्गनासमाजे कुसुमितेव काशयष्टिः[5] पाण्डुशिरसिजा स्थविरा काचिच्चरणयोर्मे निपत्य चासदीनमब्रूत। दीयतामभयदानमस्मैऽनन्यशरणाय स्त्रीजनाय। किमसि देवकुमारो

---

[1] "Were defeated or repelled," 3d pers. plur. 1st præt. pass. voice of हन, "to strike or kill."

[2] "Our own dwelling," गृहं गेहोदवसितमित्यमरः.

[3] One of the regions under the earth.

[4] "Dissipating," "destroying." This is the reading of A.; the others have निह्नुवाना, "concealing," but this makes sense only by a strained metaphor.

[5] Like the flowering stalk of the kás-grass, andropogyon, bearing a cluster of white blossoms.

दनुजयुद्धतृष्णया रसातलं विविक्षुः आज्ञापय को ऽसि कस्य हेतोरागतो ऽसीति । सा तु मया प्रत्यवादि मास्म भवत्यो भैषुः । अहमस्मि द्विजातिवृषभात्कामपालाद्देव्यां कान्तिमत्यामुत्पन्नो ऽर्थपालो नाम । सत्यर्थे निजगृहान्नृपगृहं सुरुङ्गयोपसरन्निहान्तरे वो दृष्टवान् । कथयत काः स्थ यूयं कथमिह निवसथेति । सोदञ्जलिरुदीरतवती । भर्तृदारक भाग्यवत्यो वयम् यास्त्वामेभिरेव चक्षुर्भिरनघमद्राक्ष्म । श्रूयतां यस्तव मातामहश्चण्डसिंहस्तेनास्यां देव्यां लीलावत्यां चण्डघोषः कान्तिमतीत्यपत्यद्वयमुदपादि चण्डघोषस्तु युवराजो ऽत्यासङ्गादङ्गनासु राजयक्ष्मणा[1]सुक्षयमगादन्तर्वत्न्यां देव्यामाचारवत्यां । अमुया चेयं मणिकर्णिका नाम कन्या प्रसूता । अथ प्रसववेदनया मुक्तजीविताचारवती पत्युरन्तिकमगमत् । अथ देवश्चण्डसिंहो मामाहूयोपह्वरे समाज्ञापयत् । वृद्धिमति कन्यकेयं कल्याणलक्षणा तामिमां मालवेन्द्रनन्दनाय दर्पसाराय वर्द्धयित्वा दित्सामि । बिभेमि च कान्तिमतीवृत्तान्तादारभ्य कन्यकानां प्रकाशावस्थापनादत इयमरातिव्यसनापकारिते महति भूमिगृहे कृत्रिमशैलगर्भोत्कीर्णनानामण्डपप्रेक्षागृहे प्रचुरपरिवर्हया भवत्या संवर्द्ध्यतां । अस्त्यत्र भोग्यवस्तु वर्षशतोपभोगे ऽप्यक्षय्यमिति तथोक्त्वा निजवासगृहस्याङ्गण-

---

[1] A. has यक्ष्मणा सरक्षयम्, B. D. E. यक्ष्मणा सुरक्षयम्, C. णासुक्षयं. It should probably be either आशु, "quickly," or असु, "life," that precedes क्षय. सुरक्षय, or असुरक्षय, although perhaps not wholly inadmissible, have no particular propriety.

भित्तावर्द्धपादं किष्कुविष्कम्भमुद्धृत्य[1] तेनैव द्वारेण स्थानमिदम्-स्मानवीविशत्[2]। इह च नो वसन्तीनां द्वादशसमाः समत्ययुः। इयञ्च वत्सा तरुणीभूता न चाद्यापि स्मरति राजा। काम-मियं पितामहेन दर्पसाराय सङ्कल्पिता त्वदन्वया कान्ति मत्या चेयं गर्भस्थैव द्यूतजिता स्वमात्रा तवैव जायात्वेन समकल्प्यत। तदत्र प्राप्तरूपं चिन्त्यतां कुमारेणैवेति। तां पुनरवोचम्। अद्यैव राजगृहे किमपि कार्य्यं साधयित्वा प्रति-निवृत्तो युष्मासु यथार्हं प्रतिपत्स्य इति तेनैव दीपदर्शितेन विलपथेन गत्वा स्थितेऽर्द्धरात्रे तदर्द्धपादं प्रत्युद्धृत्य वासगृहं प्रविष्टो विश्रब्धप्रसुप्तं सिंहघोषं जीवग्राहमग्रहीषम्[3]। आकृष्य च तमहमिवाहिशत्रुः स्फुरन्तममुनैव भित्तिरन्ध्रपथेन स्त्रैण सन्निधिमनैषम्। आनीय च स्वभवनमायसनिगडसन्दा-नितचरणयुगलमवनमितमलिनवदनमश्रुवहल[4]रक्तचक्षुषमे-कान्ते जनयित्रोर्ममादर्शयम्। अकथयञ्च विलकथां। अथ पितरौ प्रहृष्टतरौ तं निकृष्टाशयं निशाम्य बन्धने नियम्य तस्या दारिकायाः यथार्हेण कर्म्मणा मां पाणिमग्राहयेतां। अनाथकञ्च तद्राज्यमस्मदायत्तमेव जातं। प्रकृतिकोपभयात्तु मन्मात्रा मुमुक्षितोऽपि न मुक्त एव सिंहघोषः। तथास्थि ताश्च वयमङ्गराजः सिंहवर्म्मा देवपादानां भक्तिमान् कृतव-

---

[1] A space of the breadth of a cubit. किष्कुर्हस्तेत्यमरः परिणाहो विष्कम्भ इति वैजयन्ती.

[2] Third pers. sing. indef. præt. causal of विश, "to enter," "he sent us or made us enter into."

[3] "Violently," "as if seizing the life."

[4] All the MSS. have वहल, which may mean, "suffused with."

र्म्मो चेत्यमित्राभियुक्तमेनमभ्यसराम । अभूवञ्च भवत्पादपद्मरजो ऽनुग्राह्यः । स चेदानीं भवच्चरणप्रणामप्रायश्चित्तमनुतिष्ठतु सर्व्वदुश्चरित्रक्षालनमनार्य्यः सिंहघोष इत्यर्थपालः प्राञ्जलिः प्रणनाम । देवो ऽपि राजवाहनो बहुपराक्रान्तं बहूपयुक्ता च बुद्धिर्मुक्तबन्धनस्ते श्वशुरः[1] पश्यतु मामित्यभिधाय भूयः प्रमतिमेव पश्यन् प्रीतिस्मेरः प्रस्तूयतां तावदात्मचरितमित्याज्ञापयत् सो ऽपि प्रणम्य विज्ञापयामास ॥

इति श्री दण्डिना कृते दशकुमारचरित अर्थपालचरितं नाम चतुर्थ उच्छ्वासः

पञ्चम उच्छ्वासः प्रमतिचरितं

देव देवस्यान्वेषणाय दिक्षु भ्रमन्नभ्रङ्कषस्यापि विन्ध्यपार्श्वारूढस्य वनस्पतेरधः परिणतपतङ्गबालपल्लवावतंसिते पश्चिमदिगङ्गनामुखे पल्वलाम्भस्युपस्पृश्योपास्य सन्ध्यां तमः समीकृतेषु निम्नोन्नतेषु गन्तुमक्षमः क्ष्मातले किसलयैरुपरचय्य शय्यां शिशयिषमाणः[2] शिरसि कुर्व्वन्नञ्जलिं यस्मिन् वनस्पतौ वसति देवता सैव मे शरणमस्तु शरारुचक्रचारभीषणायां[3] सर्व्वगलश्यामशार्व्वरान्धकारपूराध्मातगभीरगह्वरा-

---

[1] श्वशुरः is here used to denote "a wife's uncle," not "a father-in-law," its usual acceptation. Sinhaghosha being the brother of Chańdaghosha, whose daughter, Manikarńiká, is the wife of Arthapála.

[2] Part. pres. desiderative of शी, "to sleep," verb, 1st conjugation atm. pada.

[3] "Fearful as the haunt of numerous mischievous creatures."

यामस्यां महाटव्यामेकाकिनो मे प्रसुप्तस्येत्युपधाय वामभुजमशयिषि। ततः क्षणादेवावनिदुर्लभेन स्पर्शेनासुखायिषत किल मे गात्राण्यह्लादयिंषत[1]तेन्द्रियाण्यभ्यमनायिष्ट[2] चान्तरात्मा विशेषितश्च हर्षिंता[3]स्तनूरुहाः पर्य्यस्फुरन्मे दक्षिणभुजः कथं त्विदमिति मन्दमन्दमुन्मिषन्नुपर्य्यच्छचन्द्रातपच्छेदकल्पं शुक्लांशुकवितानमैक्षिषि। वामतो वलितदृष्टिः समया[4] सौधभित्तिं चित्रास्तरणशायिनमतिविश्रब्धप्रसुप्तमङ्गनाजनमलक्षयम्। दक्षिणतो दत्तचक्षुरागलितस्तनांशुकाममृतफेनपटलपाण्डुरशयनशायिनीमादिवराहदंष्ट्रांशुकजाललग्नामंसस्रस्तदुग्धसागरदुकूलोत्तरीयां भयसाध्वसमूर्च्छितामिव धरणीमरुणाधरमणिकिरणबालकिसलयलास्यहेतुभिराननारविन्दपरिमलोद्गाहिभिर्निश्वासमातरिश्वभिरीश्वरेक्षणदहनदग्धं स्फुलिङ्गशेषमनङ्गमिव सन्धुक्षयन्तीमन्तःसुप्तषट्पदमम्बुजमिव जातनिद्रामामीलितलोचनेन्दीवरमाननं दधानामैरावतमदावलेपलूनापविद्धामिव नन्दनवनकल्पवृक्षरत्नमञ्जरीं कामपि तरुणीमालोकयम्। अतर्कयच्च। क्व गता सा महाटवी कुत इदमूर्द्धाण्डकपाल[5]सम्पुटोल्लेखि शक्तिध्वंज[6]शि-

---

[1] We have here two nominal verbs, from सुख, "pleasure," and ह्लाद, "joy," 3d pers. plur. indef. præt. atm. pada.

[2] Nominal verb, from मनस्, "the mind," with अभि prefixed, "to be delighted," 3d pers. sing. indef. præt. atm. pada.

[3] In the sense of being elevated, as the down of the body through delight, हृष takes the augment इ; if simply "gladdened," "delighted," the form is हृष्ट.

[4] "Near to," used with the accusative case.

[5] "The upper half of the egg," *i.e.* the sky; alluding to Menu's description of the creation of the world.

[6] "The building lofty as the trident which tops (the temple of) Kumára (Śakti-dhwaja)."

खरशूलोत्सेधसौधमागतं । क्व च तदरण्यस्थलीसमास्तीर्णं पल्लवशयनं । कुतस्त्यञ्चेदमिन्दुगभस्तिसम्भारभासुरं हंसतूलदुकूलशयनं। एष च को नु शीतरश्मिकिरणरजतरज्जुदोलापरिभ्रष्टमूर्च्छित इवाप्सरोगणः स्वैरसुप्तः सुन्दरीजनः । का चेयं देवीवारविन्दहस्ता शारदशशाङ्कमण्डलामलदुकूलोत्तरच्छदमधिशेते शयनतलं । न तावदेषा देवयोषा यतो मन्दमन्दमिन्दुकिरणैः संवाह्यमाना कमलिनीव निद्राति । भग्नवृन्तश्च्युतरसविन्दुशवलितं पाकपाण्डुचूतफलमिवोद्भिन्नस्वेदरेखं गण्डस्थलमालक्ष्यते । अभिनवयौवनविदाहनिर्भरोष्मणि कुचतटे वैवर्ण्यमुपैति वर्णकः[1] । वाससी च परिभोगानुरूपं धूसरिमाणमादर्शयतः । तदेषा मानुष्येव[2] दिष्ट्या चानुच्छष्टयौवना यतः सौकुमार्य्यमागताः सन्तोऽपि संहता इवावयवाः । प्रस्निग्धतमापि पाण्डुतानुविद्धेव देहच्छविः । दन्तपीडानभिज्ञतया नातिविशदरागो मुखे विद्रुमद्युतिरधरमणिः । अनत्यापूर्णमारक्तमूलं चम्पकमुकुलमिव कठोरं कपोलतलं । अनङ्गवाणपातमुक्ताशङ्कञ्च विश्रब्धमधुरं सुप्यते । न चैतद्वक्षःस्थलं निर्दयविमर्द्दविस्तारितमुखस्तनयुगलं । अस्ति चानतिक्रान्तशिष्टमर्य्यादचेतसो ममास्यामासक्तिः । आसक्त्यनुरूपं पुनराश्लिष्टा यदि स्पृष्टमात्त्रैरवेणैव सह निद्रां मोक्ष्यति । अथाहं न शक्ष्यामि चानुपश्लिष्य शयितुम् । अतो यद्भावि तद्भवतु

---

[1] "Fragrant unguent," such as sandal paste and the like.

[2] "She is mortal, because she sleeps, because she perspires, because the unguent on her person dries up, and because there is dust upon her garments, accidents from which the goddesses are exempt."

भाग्यमत्र परीक्षिष्य इति स्पृष्टास्पृष्टमेव किमप्याविद्धरागसा-ध्वसं लक्ष्य सुप्तः स्थितो ऽस्मि। सापि किमप्युत्कम्पिना रो-मोद्भेदवता वामपार्श्वेन सुखायमानेन मन्दं मन्दं विजृम्भिका-रम्भमन्थराङ्गी त्वङ्गदग्रपक्ष्मणोश्चक्षुषोरलसतान्ततारकेणाति-पक्वनिद्राकषायितापाङ्गपरभागे नयुगलेनेषदुन्मिषन्ती चास-विस्मयहर्षरागशङ्काविलासविभ्रमव्यवहितानि व्रीडान्तराणि कानि कान्यपि कामेनाद्भुतानुभावेनावस्थान्तराणि कार्य्य-माणा परिजनप्रबोधनोद्यतां गिरं कामावेशपरवशं हृदयमङ्गा-नि च साध्वसायाससम्बद्धमानस्वेदपुलकानि कथं कथमपि निगृह्य सस्पृहेण मधुरकूणितत्रिभागेन मन्दमन्दप्रचारितेन चक्षुषा मदङ्गानि निर्वर्ण्य दूरोत्सर्पितपूर्व्वकायापि तस्मिन्नेव शयनतले सचकितमशयिष्ट। अजनिष्ट मे रागाविष्टचेतसो ऽपि किमपि निद्रा। पुनरननुकूलस्पर्शदुःखायमानगात्रः प्राबुध्ये। प्रबुद्धस्य च सैव मे महाटवी तदेव तरुतलं स एव पत्रास्तरो ममाभूत्। विभावरी च व्ययासीत्। अभूच्च मे मनसि किमयं स्वप्नः किं विप्रलम्भो वा किमियमासुरी दैवी वा कापि माया। यद्भावि तद्भवतु नाहमिदं तत्वतो ऽनावबुध्य मोक्ष्यामि भूमिशय्यां यावदायुरत्यायै देवतायै प्रतिशयिष्यामीति नि-श्चितमतिरतिष्ठम्॥

अथाविर्भूय कापि रविकराभितप्तकुवलयदामताम्तगात्र-यष्टिः क्लिष्टनिवसनोत्तरीया निरलक्तकरूक्षपाटलेन निःश्वा-

[1] त्वङ्गत् part. pres. tense crude form, from त्वगि, "to move," "moving or trembling."

सोष्मजर्जरितत्विषा दन्तच्छदेन वमन्तीव कपिलधूमधूम्रं विर-
हानलमनवरतसलिलधाराविसर्जनाद्रुधिरावशेषमिव लोहि-
ततरं द्वितयमक्ष्णोरुद्वहन्ती कुलचारित्रबन्धनपाशविभ्रमेणैक-
वेणीभूतेन केशकलापेन नीलांशुकरचितचीरचूलिकापरिवृता
पतिव्रतापताकेव सञ्चरन्ती क्षामक्षामापि देवतानुभावाद-
नतिक्षीणवर्णावकाशा सीमन्तिनी प्रणिपतन्तं मां प्रहर्षो-
त्कम्पितेन भुजलताद्वयेनोत्थाप्य पुत्रवत्परिष्वज्य शिरस्युपा-
घ्राय वात्सल्यमिव स्तनयुगलेन स्तन्यच्छलात् प्रक्षरन्ती शिशि-
रेणाश्रुणा निरुद्धकण्ठी स्नेहगद्गदं व्याहार्षीत् । वत्स यदि वः
कथितवती मगधराजमहिषी वसुमती मम हस्ते बालमर्थ-
पालं निधाय कथाञ्च काञ्चिदात्मभर्तृपुत्रसखीजनानुबद्धां
राजराज[1]प्रवर्त्तितां कृत्वान्तर्धानमगादात्मजा माणिभद्रस्येति
साहमस्मि वो जननी पितुर्वो धर्म्मपालसूनोः सुमित्रानु-
जस्य कामपालस्य पादमूलान्निष्कारणकोपकलुषिताशया
प्रोष्यानुशयविधुरा स्वप्ने केनापि रक्षोरूपेणोपेत्य शप्तास्मि
चण्डिकायां त्वयि वर्षमात्रं वसामि प्रवासदुःखायेति ब्रुवते-
वाहमाविष्टा प्राबुध्ये । गतञ्च तद्वर्षं वर्षसहस्रदीर्घं । अतीता-
यां तु यामिन्यां देवदेवस्य त्र्यम्बकस्य श्रावस्त्यामुत्सवसमाज-
मनुभूय बन्धुजनञ्च स्थानस्थानेभ्यः सन्निपतितं समीक्ष्य मुक्त-
शापा पत्युः पार्श्वमभिसरिष्यामीति प्रस्थितायामेव मयि त्वम-

---

[1] Related by the deity Kuvera.

चाभ्येत्य प्रतिपन्नोऽस्मि शरणमिहत्यां देवतामिति प्रसुप्तोऽसि। एवं शापदुःखाविष्टया मया तदा न तत्वतः परिच्छिन्नो भवान्। अपि तु शरणागतमविरतप्रमादायामस्यां महाटव्यामयुक्तं परित्यज्य गन्तुमिति मया त्वमपि स्वपन्नेवासि नीतः प्रत्यासन्ने च तस्मिन् देवगृहे पुनरचिन्तयम्। कथमिह तरुणेनानेन सह समाजं गमिष्यामीति। अथ राज्ञः श्रावस्तीश्वरस्य यथार्थनाम्नो धर्म्मवर्द्धनस्य कन्यां नवमालिकां धर्म्मकालसुभगे कन्यापुरविमानहर्म्म्यतले विशालकोमलतलं शय्यातलमधिशयानां यदृच्छयोपलभ्य दिष्ट्येयं सुप्ता परिजनश्च गाढनिद्रः शेतां[1] मयमत्र मुहूर्त्तमात्रं ब्राह्मणकुमारो यावत्कृतकृत्या निवर्त्तयेति त्वां तत्र शाययित्वा तमुद्देशमगमम् दृष्ट्वा चोत्सवश्रियं निर्विश्य च स्वजनदर्शनसुखमभिवाद्य च त्रिभुवनेश्वरमात्मालीकप्रत्याकलनोपारूढसाध्वसञ्च[2] नमस्कृत्य भक्तिप्रणतहृदयां भगवतीमम्बिकां। तया गिरिदुहित्रा देव्या सस्मितमयि भद्रे मा भैषीर्भवेदानीं भर्त्तृपार्श्वगामिनी गतस्ते शाप इत्यनुगृहीता सद्य एव प्रत्यापन्नमहिमा प्रतिनिवृत्य दृष्ट्वैव त्वां यथावदभ्यजानम्। कथं मत्सुत एवायं वत्सस्यार्थपालस्य प्राणभूतः सखा प्रमतिरिति पापया मयास्मिन्नज्ञानादौदासीन्यमाचरितं। अपि चायमस्यामासक्तभावः कन्या चैनं कामयते

---

[1] Third pers. sing. imperative of शी, "let (the train) sleep."

[2] "Who had brought violence upon himself by his simulated interposition;" referring, apparently, to Śiva's attempting to make peace between his rival brides, Párvatí and Gangá.

युवानमुभौ चेमौ लक्ष्यसुप्तौ त्रपया साध्वसेन वान्योन्यमात्मानं न विवृण्वाते[1] । गन्तव्यञ्च मया कामाघ्रातयाप्यनया कन्यया रहस्यरक्षणाय । न समाभाषितः सखीजनः परिजनो वा । नयामि तावत्कुमारं । पुनरपीममर्थं लब्धल[2]क्षणो यथोपपन्नैरुपायैः साधयिष्यतीति मत्प्रभावः स्वापितं भवन्तमेतदेव पत्रशयनमनैषम् । एवमिदं वृत्तं । एषा चाहं पितुस्ते पादमूलं प्रत्युपसर्पेयमिति प्राञ्जलिं मां भूयो भूयः परिरभ्य शिरस्युपाघ्राय कपोलयोश्चुम्बित्वा स्नेहविक्लवा गतासीत् ॥

अहञ्च पञ्चबाणवश्यः श्रावस्तीमभ्यवर्त्तिषि । मार्गे च महति निगमे नैगमानां[3] ताम्रचूडयुद्धकोलाहलो महानासीत् । अहञ्च तत्र सन्निहितः किञ्चिदस्मैषि । सन्निधिनिषण्णस्तु मे वृद्धविटः को ऽपि ब्राह्मणः शनकैः स्मितहेतुमपृच्छत् । अब्रवञ्च । कथमिव नारिकेल[4]जातेः प्राच्यवाट[5]कुक्कुटस्य प्रतीच्यवाटपुरुषैरसमीक्ष्य वलाका[6]जातिस्ताम्रचूडो बलप्रमाणाधिकस्यैवं प्रतिविसृष्ट इति । सो ऽपि तज्ज्ञः किमज्ञैरेभिर्व्युत्पादितैस्तूष्णीमास्स्वेत्युप[7]हस्तिकायास्ताम्बूलं कर्पूरसहितमुद्धृत्य

---

[1] Second person dual, present tense of वृ, "to choose," verb, 5th conjugation, with वि prefixed, "to explain," "to make known." "These two through modesty or fear do not make each other mutually understood."

[2] "A convenient opportunity."

[3] "In an assembly of tradespeople or merchants."

[4] A species of game-cock.

[5] वाट, "a company," "a party."

[6] Another kind of cock, inferior in spirit and strength to the other. This is described as having a long neck and white feathers, of good wind, but of uncertain courage.

[7] A small bag or box holding betel or spices.

मह्यं दत्वा चित्राः कथाः कथयन् क्षणमतिष्ठत् । प्रायुध्यत चातिसंरब्धमनुप्रहारप्रवृत्तस्वपक्षमुक्तकण्ठीरवरवं विहङ्गमद्वयम् । जितश्चासौ प्रतीच्यवाटकुक्कुटः सोऽपि विटः स्वकुक्कुटविजयप्रहृष्टो मयि वयोविरुद्धं सख्यमुपेत्य तदहरेव स्वगृहे स्नानभोजनादि कारयित्वोत्तरेद्युः श्रावस्तीं प्रयान्तं मामनुगम्य स्मर्त्तव्योऽस्मि सत्यर्थ इति मित्रवद्विसृज्य प्रत्ययासीत् । अहञ्च गत्वा श्रावस्तीमध्वश्रान्तो वाह्योद्यानलतामण्डपे शयितोऽस्मि । हंसरवप्रबोधितश्चोत्थाय काममपि क्वणितनूपुरमुखराभ्यां चरणाभ्यां मदन्तिकमुपसर्प्पन्तीं युवतीमद्राक्षम् । सा त्वागत्य स्वहस्तवर्त्तिनि चित्रपटे लिखितं मत्सदृशं कमपि पुरुषं माञ्च पर्य्यायेण निवर्ण्णयन्ती सविस्मयं सवितर्कं सहर्षञ्च क्षणमवातिष्ठत । मयापि तत्र चित्रपटे मत्सादृश्यं पश्यता तस्याश्च दृष्टिविचेष्टितमनाकस्मिकं मन्यमानेन ननु सर्व्वसाधारणोऽयं रमणीयः पुण्यारामभूमिभागः किमिति चिरस्थितिक्लेशोऽनुभूयते ननूपवेष्टव्यमित्यभिहिता सा सस्मितमनुगृहीतास्मीति न्यषीदत् सङ्कथा च देशवार्त्तानुविद्धा काचनावयोरभूत् । कथा संश्रिता च सा देशातिथिरसि दृश्यन्ते च ते ऽध्वश्रान्तानीव गात्राणि यदि न दोषो मम गृहेऽद्य विश्रमितुमनुग्रहः क्रियतामित्यशंसत् । अहञ्चायि मुग्धे नैष दोषो गुण एवेति तदनुमार्गगामी तद्गृहगतो राजार्हेण स्नानभोजनादिनोपचरितः सुखं निषण्णो रहसि पर्य्यपृच्छ्ये । महाभाग दिगन्तराणि भ्रमता कच्चिदस्ति किञ्चिदद्भुतं भवतोपलब्धमिति ममाभवन्मनसि महदिदमाशास्पदं।

एषा खलु निखिलपरिजनसम्बाधसंलक्षितायाः सखी राजदारिकायाश्चित्रपटे चास्मिन्नस्ति तदुपरि विरचितसितवितानं हर्म्म्यतलं तत्रतञ्च प्रकामविस्तीर्णं शरदभ्रपटलपाण्डुरं शयनं तदधिशायिनी च निद्रालीढलोचना ममैवेयं प्रतिकृतिरतो नूनमनङ्गेन सापि राजकन्या तावतीं भूमिमारोपिता यस्यामसह्यमदनज्वरव्यथितोन्मादिता सती सखीनिर्ब्बन्धपृष्टविक्रियानिमित्ता चातुर्य्येणैतद्रूपनिर्म्माणेनैव समर्थमुत्तरं दत्तवती रूपसंवादाच्च संशयादनया पृष्टो भिनद्म्यस्याः संशयं यथानुभवकथनेनेति जातनिश्चयोऽब्रवम्। भद्रे देहि चित्रपटमिति सा त्वर्प्पितवती मद्धस्ते। पुनस्तमादाय तामपि व्याजसुप्तामुल्लसन्मदनरागविह्वलां वल्लभां तत्रैवाभिलिख्य काचिदेवंभूता युवतिरीदृशस्य पुनः पार्श्वशायिन्यारण्यान्यां प्रसुप्तेन मयोपलब्धा किलैष स्वप्न इत्यालपञ्च। दृष्टया तु तया विस्तरतः पृष्टः सर्व्वमेव वृत्तान्तमकथयम्। असौ च सख्या मन्निमित्तान्यवस्थान्तराण्यवर्णयत्। तदाकर्ण्य च यदि तव सख्या मदनुग्रहोन्मुखं मनो गमय कानिचिदहानि कमपि कन्यापुरे निराशङ्कनिवासकरणमुपायमारचय्यागमिष्यामीति। कथञ्चिदेनामुपगमय्य गत्वा तदेव खर्व्वटं वृद्धविटेन समगंसि। ससम्भ्रममसौ विश्रमय्य तथैव स्नानभोजनादि कारयित्वा रहस्यपृच्छत्। आर्य्य कस्य हेतोरचिरात् प्रत्यागतोऽसि।

[1] Indeclinable past part. causal of रच, "to make," "having caused to be made;" so presently, उपगमय्य, "having caused to approach;" and विश्रमय्य, "having made to take rest;" from उपगम, "to approach," and विश्रम, "to rest."

प्रत्यवादिषमेनं स्थान एवाहमार्य्येण पृष्टः श्रूयतामस्ति हि श्रावस्तीनाम नगरी तस्याः पतिरपर इव धर्म्मपुत्रो धर्म्मवर्द्धनो नाम राजा तस्य दुहिता प्रत्यादेश[1] इव श्रियः प्राणा इव कुसुमधन्वनः सौकुमार्य्यविडंवितनवमालिका नवमालिका नाम कन्यका सा मया समापत्ति[2]दृष्टा कामनाराचपङ्क्तिमिव कटाक्षमालां मम मर्म्मणि व्यकिरत्। तच्छल्योद्धरणक्षमश्च धन्वन्तरिसदृशस्त्वदृते नेतरो ऽस्ति वैद्य इति प्रत्यागतो ऽस्मि। तत्प्रसीद कञ्चिदुपायमाचरितुम्। अयमहं परिवर्त्तितस्त्रीवेषस्ते कन्या नाम भवेयं। अनुगतश्च मया त्वमुपगम्य धर्म्मासनगतं धर्म्मवर्द्धनं वक्ष्यसि। ममेयमेकैव दुहिता। जातमात्रायां त्वस्यां जनन्यस्याः संस्थिता[3]। माता च पिता च भूत्वाहमेव व्यवर्द्धयम्। एतदर्थमेव विद्यामयं शुल्कमर्ज्जितुङ्गतो ऽभूदवन्तीनगरीमुज्जयिनीमस्मद्वैवाहिककुलजः को ऽपि विप्रदारकः। तस्मै चेयमनुमता दातुमितरस्मै न योग्या। तरुणीभूता चेयं स च विलंवितस्तेन तमानीय पाणिमस्या ग्राहयित्वा तस्मिन्न्यस्तभार सन्न्यसिष्ये[4]। दुरभिरक्षतया दुहितृणां मुक्तशैशवानां विशेषतश्चामातृकाणामिह देवं मातृपितृस्थानीयं प्रजानामापन्नशरणमागतो ऽस्मि। यदि वृद्धं

[1] The usual sense of this word is contradiction; here it means "humiliator," "rival;" so in the Vikramorvasí, Urvasí is called पच्चादेसो रूअगव्विदाए सिरि गौरीए, "the humbler of Gaurí, proud of her beauty," p. 3.

[2] "Accidental encounter."

[3] "Died."

[4] "I shall abandon worldly care," from अस, "to throw away," with सम् and नि prefixed, 1st pers. sing. indef. fut. atm. pada.

ब्राह्मणमधीतिमगतिमतिथिञ्च मामनुग्राह्य पक्षे गणपत्यादि राजचरितधुर्य्यो देवः सैषा भवद्भुजतरुच्छायायामखण्डितचारित्रा तावदध्यास्तां यावदस्याः पाणिग्राहकमानयेयमिति। स एवमुक्तो नियतमभिमनायमानः स्वदुहितृसन्निधौ मां वासयिष्यति। गतस्तु भवानागामिनि मासि फाल्गुने फाल्गुनीषूत्तरासु भाविनि[2] राजान्तःपुरजनस्य तीर्थयात्रोत्सवो भविष्यति। तीर्थस्थानात् प्राच्यां दिशि गोरुतान्तरमतिक्रम्य[3] वानीरवलयमध्यवर्त्तिनि कार्त्तिकेयगृहे करतलगतेन शुक्लांवरयुगलेन सह स्थास्यसि। स खल्वहमनभिशङ्क एवैतावन्तं कालं सह विहृत्य राजकन्यया भूयस्तस्मिन्नुत्सवे गङ्गाम्भसि विहरन् विहारव्याकुले कन्यकासमाजे मग्नोपसृतस्त्वदभ्याश एवोन्मंक्ष्यामि[4]। पुनस्त्वदुपहृते वाससी परिधायापनीतदारिकावेशो जामाता नाम भूत्वा त्वामेवानुगच्छेयम्। नृपात्मजा तु मामितस्ततोऽन्विष्यानासादयन्ती तया विना न भोक्ष्य इति रुदन्त्येव स्थास्यति तन्मूले च महति कोलाहले क्रन्दत्सु परिजनेषु रुदत्सु सखीजनेषु शोचत्सु पौरजनेषु किं कर्त्तव्य-

---

[1] C. and E. read गणयति, as if it were the locative case of the participle of गण, "to count or calculate," agreeing with पक्षे: the reading गणपति appears preferable, although Gañapati or Gañeśa is not usually held forth as a model for kings.

[2] A. C. and E. omit भाविनि: it is not necessary.

[3] "At the interval of a cow's lowing," गोरुतान्तरं, as far off as a cow may be heard.

[4] 1st pers. sing. indef. fut. of मस्ज, "to drown," with उत् prefixed, "to emerge." The verb substitutes ज for स, inserts a nasal before the non-conjugational terminations, and rejects one ज. The final palatal ज becomes क, which, with the स of the inflection, makes क्ष. See Gr. p. 235, r. 213. c. 1.

तामूढे सामात्ये पार्थिवे त्वमास्थानीमेत्य मां स्थापयित्वा वक्ष्यसि। देव स एष मे जामाता तवार्हति श्रीभुजाराधनं[1]मधीती चतुर्ष्वाम्नायेषु गृहीती षट्स्वङ्गेष्वान्वीक्षिकीविचक्षणश्चतुःषष्टिकलागमप्रयोगचतुरो विशेषेण गजरथतुरङ्गतत्त्वविदिष्वसनास्त्रकर्म्मणि गदायुद्धे च निरुपमः पुराणेतिहासकुशलः कर्त्ता काव्यनाटकाख्यायिकानां वेत्ता सोपनिषदोऽर्थशास्त्रस्य निर्म्मत्सरो गुणेषु विस्रम्भी सुहृत्सु शक्तः[2] संविभाग[3]शीलः श्रुत[4]धरो गतस्मय[5]श्च। नास्य दोषमणीयांसमप्युपलभे न च गुणेष्वविद्यमानं। तन्मादृशस्य ब्राह्मणमात्रस्य न लभ्य एष सम्बन्धी। दुहितरमस्मै समर्प्य वार्द्धकोचितमन्यमाश्रमं सङ्क्रमेयं यदि देवः साधु मन्यत इति। स इदमाकर्ण्य वैवर्ण्याक्रान्तवक्त्रः परमुपेतो वैलक्ष्यमारप्स्यतेऽनुनेतुमनित्यतादिसङ्कीर्त्तनेनात्रभवन्तं मन्त्रिभिः सह। त्वं तु तेषामदत्तश्रोत्रो मुक्तकण्ठं रुदित्वा चिरस्य वाष्पकुण्ठ[6]कण्ठः काष्ठान्याहृत्याग्निं सन्धुक्ष्य राजमन्दिरद्वारे चिताधिरोहणायोपक्रमिष्यसे। स तावदेव त्वत्पादयोर्निपत्य सामात्यो नरपतिरभिमतैरर्थैस्त्वामुपच्छन्द्य दुहितरं मह्यं दत्वा मद्योग्यतासमाराधितः समस्तमेव

---

1 "He is worthy of your veneration, such as is paid to Vishńu. श्रीभुज्, "the enjoyer or possessor of Śrí.

2 "Kindly speaking" The commentator quotes Amara. शक्तः प्रियंवदः, but it is a various reading of शक्लः. See Colebrooke's Am. Cosha, p. 258, l. 3, and note.

3 "Liberal in distributing gifts," &c.

4 "Of good memory," "retaining what is heard."

5 "Free from pride."

6 "As if choking (कुण्ठकण्ठः) with restrained tears after having long wept loudly."

राज्यभारं मयि समर्पयिष्यति। सोऽयमभ्युपायोऽनुष्ठेयो यदि तुभ्यं रोचत इति। सोऽपि पटुर्विटानामग्रणीरसकृदभ्यस्तकपटप्रपञ्चः पाञ्चालशर्म्मा यथोक्तमभ्यधिकञ्च निपुणमुपक्रान्तवान्। आसीच्च मम समीहितानामचिरकालसिद्धिः। अन्वभवञ्च मधुकर इव नवमालिकामार्द्रसुमनसम्। अस्य राज्ञः सिंहवर्म्मणः साहाय्यदानं सुहृत्सङ्केतभूमिगमनमित्युभयमपेक्ष्य सर्व्वबलसन्दोहेन चम्पामिमामुपगतो दैवाद्देवदर्शनसुखमनुभवामीति॥

श्रुत्वैतत्प्रमतिचरितं स्मितमुकुलितनयनो विलासप्रायमूर्ज्जितं मृदुप्रायं चेष्टितमिष्ट एष मार्गः प्रज्ञावतामथेदानीमत्रभवान् प्रविशत्विति मित्रगुप्तमैक्षत क्षितीशपुत्रः॥

इति श्री दण्डिना विरचिते दशकुमारचरिते प्रमतिचरितं नाम पञ्चम उच्छ्वासः॥

मित्रगुप्तचरितं नाम षष्ठ उच्छ्वासः

मित्रगुप्तश्चाचचक्षे देव सोऽहमपि सुहृत्साधारणभ्रमणकारणः सुह्मेषु दामलिप्ताह्वयस्य नगरस्य वाह्योद्याने महान्तमुत्सवसमाजमालोकयम्। तत्र क्वचिदतिमुक्तलतामण्डपे कम-

---

[1] Dámalipta is usually considered the same as Támalipta or Támralipta, the modern Tumlook, or somewhere in that situation: the commentator, however, follows the usual direction of placing Suhma in the Agni-koṅa or south east, whence I have conjectured it to be identifiable with Tipera or Aracan. See Vishnu Puráṅa.

पि वीणावादेनात्मानं विनोदयन्तं युवानमद्राक्षम् । अप्राक्षञ्च । भद्र को नामायमुत्सवः किमर्थं वा समारब्धः केन वा निमित्तेनोत्सवमनादृत्यैकान्ते भवानुत्कण्ठित इव परिवादिनीद्वितीयस्तिष्ठतीति । सोऽभ्यधत्त । सौम्य सुह्मपतिस्तुङ्गधन्वा नामानपत्यः प्रार्थितवानमुष्मिन्नायतने विस्मृतविन्ध्यवासरागं वसन्त्या विन्ध्यवासिन्याः[1] पादमूलादपत्यद्वयमनया च किलास्मै प्रतिशयिताय स्वप्ने समादिष्टं । उत्पत्स्यते तवैकः पुत्रो जनिष्यते चैका दुहिता स तु तस्याः पाणिग्राहकमनुजीविष्यति । सा तु सप्तमाद्वर्षादारभ्यापरिणयनात् प्रतिमासं कृत्तिकासु कन्दुकनृत्येन गुणवद्भर्तृलाभाय मां समाराधयतु । यञ्चाभिलषेत् सामुष्मै देया । स चोत्सवः कन्दुकोत्सवो नामास्त्विति । ततोऽल्पीयसा कालेन राज्ञः प्रियमहिषी मेदिनी नामैकं पुत्रमसूत । समुत्पन्ना चैका दुहिता । साद्य नाम कन्या कन्दुकवती सोमापीडां[2] देवीं कन्दुकविहारेणाराधयिष्यति । तस्यास्तु सखी चन्द्रसेना नाम धात्रेयिका मम प्रियासीत् सा चैषु दिवसेषु राजपुत्रेण भीमधन्वना बलवदनुरुद्धा । तदहमुत्कण्ठितो मन्मथशरशल्यदुःखोद्विग्नचेताः कलेन वीणारवेणात्मानं किञ्चिदाश्वासयन् विविक्तमध्यास इति ॥

अस्मिन्नेव च क्षणे किमपि नूपुरक्वणितमुपातिष्ठत । आगता च काचिदङ्गना दृष्ट्वैव स एनामुत्फुल्लदृष्टिरुत्थायो-

---

[1] A name of Durgá, as the goddess of the Vindhya mountains: a celebrated temple to her under this appellation is in the neighbourhood of Mirzapur.

[2] "Wearing the moon as her diadem."

पगूढस्तया तत्रैवोपाविशत् । अशंसच्च सैषा मे प्राणसमा यद्विरहो दहन इव दहति मामिदञ्च मे जीवितमपहरता राजपुत्रेण मृत्युनेव निरुष्णतां नीतोऽहं । न च शक्ष्यामि [1]राजसूनुरित्यमुष्मिन् न्यायमाचरितुं । अतोऽनयात्मानं सुहृष्टं कारयित्वा त्यक्ष्यामि निष्प्रतिक्रियान् प्राणानिति । सा तु पर्य्यश्रुमुखी समभ्यधात् । मा स्म नाथ मत्कृतेऽ[2]ध्यवस्यः साहसं । यस्त्वमुत्तमात् सार्थवाहादर्थदासादुत्पद्य कोशदास इति गुरुभिरभिहितनामधेयः पुनर्मदत्यासङ्गाद्वेशदास इति द्विषद्भिःप्रख्यापितोऽसि । तस्मिन्स्त्वय्युपरते यद्यहं जीवेयं नृशंसो वेश इति समर्थयेयं लोकवादं । अतोऽद्यैव नय मामीप्सितं देशमिति । स तु मामभ्यधत्त । भद्र भवद्दृष्टेषु राष्ट्रेषु कतमत्समृद्धं सम्पन्नशस्यं सत्पुरुषभूयिष्ठञ्चेति । तमहमीषद्विहस्याब्रवम् । भद्र विस्तीर्णेयमर्णवांवरा न पर्य्यन्तोऽस्ति स्थाने स्थाने रम्याणां जनपदानामपि तु न चेदिह युवयोः सुखनिवासकारणं कमप्युपायमुत्पादयितुं शक्नुयाम् ततोऽहमेव भवेयमध्वदर्शी । तावतोदैरत रणितानि मणिनूपुराणां । अथासौ जातसम्भ्रमा प्राप्तैवेयं भर्तृदारिका कन्दुकावती कन्दुकक्रीडितेन देवीं विन्ध्यवासिनीमाराधयितुं । अनिषिद्धदर्श-

---

[1] "I shall not be able to follow a proper conduct or loyalty to him (although he be) a prince."

[2] Second pers. sing. indef. præt. of षो, with अधि and अव prefixed, "to engage in or undertake;" used in the sense of the imperative with the particles मा स्म, and rejecting the augment.

[3] Third pers. plur. 1st præt. of ईर्, "to go," with उद् prefixed, "to go up," "sounds arose."

ना चेयमस्मिन् कन्दुकोत्सवे सफलमस्तु युष्मच्चक्षुरागच्छतां द्रष्टुम्। अहमस्याः सकाशवर्त्तिनी भवेयमित्ययासीत् तामन्वयाव चावां। महति रत्नरङ्गपीठे स्थितां प्रथमं ताम्रोष्ठीमपश्यम्। अतिष्ठच्च सा सद्य एव मे हृदये न मयान्येन चान्तराले दृष्टा[1] चित्रीयाविष्टचित्तश्चाचिन्तयम्। किमियं लक्ष्मीर्नहि नहि तस्याः किल हस्ते विन्यस्तकमलमस्यास्तु हस्त एव कमलं भुक्तपूर्व्वा चासौ[2] पुरातनेन पुंसा पूर्व्वराजैश्च। अस्यां पुनरनवद्यमयातयामं[3] च यौवनमिति चिन्तयत्येव मयि सा अनवद्यसर्व्वगात्री व्यत्यस्त[4]हस्तपल्लवाग्रस्पृष्टभूमिरालोलनीलकुटिलालका सविभ्रमं भगवतीमभिवन्द्य कन्दुकममन्दरागरूषिताक्षमनङ्ग[5]मिवालंबत[6]। लीलाशिथिलञ्च भूमौ मुक्तवती मन्दोत्थितञ्च किञ्चित्कुञ्चिताङ्गुष्ठेन प्रसृतकोमलाङ्गुलिना पाणिपल्लवेन समाहत्य हस्तपृष्ठेन चोन्नीय चटुलदृष्टिलाञ्छितं स्तवकमिव भ्रमरमालानुबद्धमवपतन्तमाकाश एवाग्रहीत्। अमुञ्चच्च मध्यविलंबित[7]लये द्रुतलये च मृदु मृदु

---

1 The passage is rather obscure, but it seems to imply, "although seen by me, a different person, and at a distance, she took her place immediately in my heart." E. has न मयान्येन वान्तराले दृष्टा.

2 "Lakshmí, who, as the bride of Vishńu, 'the Purátana-pumán,' and as the goddess of fortune, has been enjoyed by former sovereigns."

3 "Unenjoyed," "unpossessed."

4 "Extended." अस्त, "thrown," with वि and अति prefixed, "thrust forth."

5 The ball was of a red colour, whence it is compared to the eye of Ananga, or love glowing with passion.

6 "She held or balanced in her hand," 3d pers. sing. 1st præt. of लवि with आ prefixed, "to impend or hang upon."

7 "She cast the ball in musical time, mean, slow, and quick."

प्रहरन्ती तत्क्षणे चूर्णपदमदर्शयत् । प्रशान्तञ्च तं निर्दयप्र-
हारैरुदपातयत् । विपर्य्ययेण च प्राशमयत् । पक्षमृज्वागतञ्च
वामदक्षिणाभ्यां कराभ्यां पर्य्यायेणाभिघ्नती शकुन्तमिवोद-
स्थापयत् । दूरोत्थितञ्च प्रपतन्तमाहत्य गीतमार्ग[2]माचरत्
प्रतिदिशञ्च गमयित्वा प्रत्यागमयत् । एवमनेककरणमधुरं
विहरन्ती रङ्गगतस्य रक्तचेतसो जनस्य प्रतिक्षणमुच्चावचाः
प्रशंसावाचः प्रतिगृह्णन्ती तत्क्षणारूढविश्रम्भं कोशदासमंसे
ऽवलंब्य करटकतगण्डमुत्फुल्लेक्षणञ्च मय्यभिमुखीभूय तिष्ठ-
ति । तत्प्रथमावतीर्णकन्दर्पकारितकटाक्षदृष्टिस्तदनुमार्गवि-
लसितलीलाञ्चितभ्रूलता श्वासानिलवेगान्दोलितैर्दन्तच्छद-
रश्मिजालैर्लीलापल्लवैरिव मुखकमलपरिमलग्रहणलोलान-
लिनस्ताडयन्ती मण्डलभ्रमणेषु कन्दुकस्यातिशीघ्रप्रचारतया
प्रविशन्तीव मद्दर्शनलज्जया पुष्पमयं पञ्जरं पञ्चविन्दु[3]प्रसृतेषु
पञ्चापि पञ्चवाणवाणान् युगपदिवाभिपततस्त्रासेनावघट्ट-
यन्ती गोमूत्रिका[3]प्रचारेषु घनदर्शितरागविभ्रमा विद्युल्लता-
मिवविडंवयन्ती भूषणमणिरणितदत्तलयसंवादिपादचारम-
पदेशस्मितप्रभाभिषिक्तविम्बाधरमवस्रंसितप्रतिसमाहितशि-

---

[8] This is a term borrowed from the Sangíta, or art of music and dancing. According to the commentator, it is stepping backwards and forwards with differing degrees of rapidity.

[2] "Going round ten paces," दशपदचङ्क्रमणं तु गीतमार्गः.

[3] We have no help to the interpretation of this and several analogous forms in this passage, but they refer to modes of dancing or acting. The Gomútriká prachára is said to intend a movement like the undulating line of forked lightning, although the term is derived from a less poetical analogy.

खण्डभारं समाघट्टितक्वणितरत्नमेखलागुणमञ्चितोत्थितपृथुनितम्बविलंबितविचलदंशुकोज्ज्वलमाकुञ्चितप्रसृतवेल्लितभुजलताभिहतललितकन्दुकमावर्ज्जितबाहुपाशमुपरिपरिवर्त्तितत्रिकविलग्नलोलकुन्तलं[1]मवगलितकर्णपूरकनकपत्रप्रतिसमाधानशीघ्रतानतिक्रमितप्रकृतक्रीडनमसकृदुत्क्षिप्यमानहस्तपादबाह्याभ्यन्तरभ्रान्तकन्दुकमवनमनोन्नमननैरन्तर्य्येनष्टदृष्टमध्ययष्टिकमवपतनोत्पतननिर्व्यवस्थमुक्ताहारमङ्कुरितघर्म्मसलिलदूषितकपोलपत्रभङ्गशोषणाधिकृतश्रवणपल्लवानिलमागलितस्तनतटांशुकनियमनव्यापृतैकपाणिपल्लवञ्च निषद्योत्थाय निमील्योन्मील्य स्थित्वा गत्वा चैवातिचित्रं पर्य्यक्रीडत राजकन्या। अभिहत्य भूतलाकाशयोरपि क्रीडान्तराणि दर्शनीयान्येकेनैव वानेकेनैव कन्दुकेनादर्शयत्[2]। चन्द्रसेनादिभिश्च प्रियसखीभिः सह विहृत्य विहृतान्ते चाभिवन्द्य देवीं मनसा मे सानुरागेणेव परिजनेनानुगम्यमाना कुवलयशरमिव कुसुमशरस्य मय्यपाङ्गं समर्प्पयन्ती सापदेशमसकृदावर्त्त्यमानवदनचन्द्रमण्डलतया स्वहृदयमिव मत्समीपे प्रेषितं प्रतिनिवृत्तं नवेत्यालोकयन्ती सह सखीभिः कुमारीपुरमगमत्। अहञ्चानङ्गविह्वलः स्ववेश्म गत्वा कोशदासेन यत्नवदत्युदारं स्नानभोजनादिकमनुभावितोऽस्मि॥

सायञ्चोपसृत्य चन्द्रसेना रहसि मां प्रणिपत्य पत्युरंसमंसेन

---

1 "With her hair flowing down to the end of her back" (त्रिकं).

2 This description of the princess's sport is a celebrated passage, and presents in truth a great variety and choice of terms, many of which being of unfrequent occurrence, render it somewhat difficult of interpretation.

प्रणयपेशलयाघट्टयन्त्युपाविशत्। आचष्ट च हृष्टः कोशदासः। भूयासमेवं[1] यावदायुरायताक्षि त्वत्प्रसादस्यपात्रमिति। मया तु सस्मितमभिहितं सखे किमेतदाशास्यं। अस्ति किञ्चिद्-ञ्जनमनया तदक्तनेत्रया राजसूनुरुपस्थितो वानरीमिवैनां द्रक्ष्यति विरक्तश्चैनां पुनस्त्यक्ष्यतीति[2]। तया तु स्मेरयास्मि कथितः। सो ऽयमार्य्येणाज्ञाकरो जनो ऽत्यर्थमनुगृहीतो यद-स्मिन्नेव जन्मनि मानुषं वपुरपनीय वानरीकरिष्यते तदा-स्तामिदमन्यथापि सिद्धं नः समीहितं। अद्य खलु कन्दुकोत्सवे भवन्तमवहसितमनोभवाकारमभिलषन्ती रोषादिव हरद्वि-षातिमात्रमायास्यते राजपुत्री। सो ऽयमर्थो विदितभावया मया स्वमात्रे तया च तन्मात्रे महिष्या च मनुजेन्द्राय निवे-दयिष्यते। विदितार्थस्तु पार्थिवस्त्वया दुहितुः पाणिं ग्राह-यिष्यति। ततश्च त्वदनुजीविना राजपुत्रेण भवितव्यं। एष हि देवतासमादिष्टो विधिः। त्वदायत्ते च राज्ये नालमेव त्वामतिक्रम्य मामेवं रोद्धुं भीमधन्वा तत्सहतामयं त्रिचतु-राणि दिनानीति मामामन्त्र्य प्रियञ्चोपगूह्य प्रत्ययासीत्। मम च कोशदासस्य च तदुक्तानुसारेण बहुविकल्पयतोः कथ-ञ्चिदक्षीयत क्षपा। क्षपान्ते च कृतयथोचितनियमस्तमेव प्रियादर्शनसुभगमुद्यानोद्देशमुपागतो ऽस्मि। तत्रैव चोपसृत्य

---

[1] First pers. sing. benedictive mood of भू, "to be," "I wish I may be."

[2] The meaning of this is, apparently, "There is a (magic) unguent with which his eyes being anointed by her, the prince may look upon her as a female monkey, and so disgusted may leave her."

राजपुत्रो निरभिमानमभिमुखीभिः कथाभिर्मामनुवर्त्तमानो मुहूर्त्तमास्त नीत्वा चोपकार्य्यामात्मसमेन स्नानभोजनशयना-दिव्यतिकरेणोपाचरत्। तल्पगतञ्च स्वप्नेनानुभूयमानप्रिया-दर्शनसुखमायसेन निगडेनातिबलवद्बहुपुरुषैःपीवरभुजदण्डो-परुद्धमबन्धयन्[1] मां प्रतिबुद्धञ्च सहसा समभ्यधात्। अयि दुर्म्मते श्रुतमालपितं हतायाश्चन्द्रसेनाया जालरन्ध्रनिःसृतं तच्चेष्टावबोधप्रयुक्तयानया कुब्जया त्वं किलाभिलषितो वरा-क्या कन्दुकावत्या तव किलानुजीविना मया स्थेयं त्वद्वचः किलानतिक्रमता मया चन्द्रसेना कोशदासाय दास्यत इत्यु-क्त्वा पार्श्वचरं पुरुषमेकमालोक्याकथयत् प्रक्षिपैनं सागर इति। स तु लब्धराज्य इवातिहृष्टो देव यदाज्ञापयसीति यथा-दिष्टमकरोत्। अहन्तु निरालंबनो भुजाभ्यामितस्ततः स्यन्द-मानः किमपि काष्ठं दैवदत्तमुरसोपश्लिष्य तावदप्लोषि याव-दपासरद्वासरः शर्व्वरी च सर्व्वा प्रत्युषस्यदृश्यत किमपि वहित्रं। अमुत्रासन् यवनाः[2]। ते मामुद्धृत्य रामेषुनाम्ने नाविकना-यकाय कथितवन्तः कोप्ययमायसनिगडबद्ध एव जले लब्धः पुरुषः। सोऽयमपि सिञ्चेत् सहस्रं द्राक्षाणां[3] क्षणेनैकेन। अस्मिन्नेव क्षणेनैकनौकापरिवृतः कोपि मद्गुरभ्यधावत्[4]।

---

[1] Third pers. sing. 1st præt. causal of बन्ध, "to bind," "he (the prince) caused me to be bound."

[2] By Yavanas we are here probably to understand Arabs, who we know were at this period the chief traders and navigators in the Indian and China Seas.

[3] For "grapes," the usual sense of Drákshá, it may be allowable to substitute "raisins," which are articles of import into India from the Persian and Arabian gulphs.

[4] "A galley," "a vessel of war."

अबिभयुर्यवनास्तावदतिजवा नौकाः श्वान इव वराहमस्म-त्पोतं पर्य्यरुन्धन्। प्रावर्त्तत सम्प्रहारः। पराजयिषत[1] यवनाः। तानहमगतीनवसीदतः समाश्वास्यावादिषं। अपनयत मे निगडबन्धनं। अयमहमवसादयामि वः सपत्नानिति। अमी तथाकुर्वन् सर्व्वांश्च तान् प्रतिभटान् भल्लवर्षिणा भीमटङ्कृतेन शार्ङ्गेण लवलीकृताङ्गानकार्षम्। अवप्लुत्य हतविध्वस्तयोध-मस्मत्पोतसंसक्तपोतममुत्रनाविकनायकमनभिसरम्[2]अभिपत्य जीवग्राहमग्रहीषं। असौ चासीत् स एव भीमधन्वा। तत्र मामवबुध्य जातव्रीडमब्रवम्। तात किं दृष्टानि कृतान्तवि-लसितानीति। ते तु सांयात्रिका[3] मदीयेनैव शृङ्खलेन तम-तिगाढं बद्ध्वा हर्षकिलकिलारवमकुर्वन्माञ्चापूजयन्। दुर्वारा तु सा नौरननुकूलवातनुन्ना दूरमभिपत्य कमपि द्वीपं निवि-डमाश्लिष्टवती। तत्र च स्वादुपानीयमेधांसि कन्दमूलफ-लानि सञ्जिघृक्षवो[4] गाढपतितशिलावलयमवातराम। तत्र चासीन्महाशैलः। सोऽहमहो रमणीयोऽयं पर्व्वतनितम्बभागः कान्ततरेयं गन्धपाषाणवत्युपत्यका शिशिरमिदमिन्दीवरार-विन्दमकरन्दविन्दुचन्द्रकोत्तरङ्गोऽत्रवारि। रम्योऽयमनेकवर्ण-

---

[1] Third pers. plur. indef. præt. passive voice of जि, "to conquer," with पर prefixed, "were defeated."

[2] "Without a follower."

[3] Rendered usually "a voyaging merchant," पोतवणिक्, but here meaning "sailors."

[4] "Desirous of collecting," from सम्, "before," गृह, "to take," desiderative form, with उ aff.

कुसुममञ्जरीमञ्जुलतरस्तरुवनाभोग इत्यतृप्तया दृशा बहुबहु पश्यन्नलक्षिताध्यारूढक्षोणीधरशिखरः शोणीभूतमुत्प्रभाभिः पद्मरागसोपानशिलाभिः किमपि नालीकपरागधूसरं सरः समध्यगमम्। स्नातश्च कांश्चिदमृतस्वादून्बिसभङ्गानास्वाद्यांसलग्नकह्लारस्तीरवर्त्तिना केनापि भीमरूपेण ब्रह्मराक्षसेनाभिपत्य कोऽसि कुतस्त्योऽसीति निर्भर्त्सयताऽभ्यधीये[1]। निर्भयेन च मया सोऽभ्यधीयत। सौम्य सोऽहमस्मि द्विजन्मा। शत्रुहस्तादर्णवमर्णवाद्यवननावं यवननावश्चित्रग्रावाणमेनं पर्व्वतप्रदेशं गतो यदृच्छयास्मिन्सरसि विश्रान्तो भद्रं तवेति। सोऽब्रूत न चेद्ब्रवीषि प्रश्नानश्नामि त्वामिति। मयोक्तं पृच्छ तावद्भवत्विति। अथावयोरेकयार्य्ययासीत् संलापः।

किं क्रूरं स्त्रीहृदयं किं गृहिणः प्रियहिताय दारगुणाः
कः कामः सङ्कल्पः किं दुष्करसाधनं प्रज्ञा ॥

इत्युक्त्वा धूमिनीगोमिनीनिम्बवतीनितम्बवत्यः प्रमाणमित्युपदिष्टो मया सोऽब्रवीत् कथय कीदृश्यस्ता इति। अत्रोदाहरम् ॥

अस्ति त्रिगर्त्तो नाम जनपदस्तत्रासन् गृहपतयस्त्रयः स्फीतसाधनाः सोदर्य्याः धनकधान्यकधन्यकाख्यास्तेषु जीवत्सु न ववर्ष वर्षाणि द्वादश दशशताक्षः[2] क्षीणसारं सस्यमोषध्यो

---

[1] First pers. sing. 1st præt. passive voice of धा, "to have," with अधि prefixed, "to speak;" here, "to be spoken to:" so in the next sentence we have the 3d pers. sing. of the same tense, "he was spoken to or answered."

[2] "The thousand-eyed," Indra.

बन्ध्या न फलवन्तो वनस्पतयः क्लीवा मेघा क्षीणस्रोतसः स्रवन्त्यः पङ्कशेषाणि पल्वलानि निर्निःष्यन्दान्युत्[1]समण्डलानि विरलीभूतं कन्दमूलफलमवहीनाः कथा गलिताः कल्याणोत्सवक्रिया बहुलीभूतानि तस्करकुलान्यन्योन्यमभक्षयन् प्रजाः पर्य्यलुठन्[2]नितस्ततो बलाकापाण्डुराणि नरशिरःकपालानि पर्य्यहिण्डत[3] शुष्काः काकमण्डल्यः[4] शून्यीभूतानि नगरग्रामखर्व्वटपुटभेदनादीनि । त एते गृहपतयः सर्व्वधान्यनिचयमुपयुज्याजाविकटं गवल[5]गणं गवां यूथं दासीदासजनमपत्यानि ज्येष्ठमध्यमभार्य्ये च क्रमेण भक्षयित्वा कनिष्ठभार्य्या धूमिनी श्वो भक्षणीयेति समकल्पयन् । अथ कनीयान् धन्यकः प्रियां स्वामत्तुमक्षमस्तया सह तस्यामेव निश्यपासरत् मार्गक्लान्ताञ्चोवहन्[6] वनं जगाहे । स्वमांसासृगपनीतक्षुत्पिपासां तां नयन्नन्तरे कमपि निकृत्तपादपाणिकर्णनासिकमवनिपृष्ठे विचेष्टमानं पुरुषमद्राक्षीत् । तमप्यार्द्राशयः स्कन्धेनोद्वह्य कन्दमूलमृगबहुले गहनोद्देशे यत्नरचितपर्णशालश्चिरमवसत् । अमुञ्च रोपितव्रणमिङ्गुदातैलादिभिरामिषेण शाकेनात्मनि-

---

1 "Mountain water-courses, or springs," उत्सः प्रस्रवणं. See Amara Cosha.

2 Third pers. plur. 1st præt. of लुठ, verb, 6th conjugation, with परि prefixed, "the crania of men, white as the cranes, rolled about hither and thither."

3 "The dry crows' nests were deserted;" from हिडि, "to go," "to disrespect," with परि prefixed 3d pers. plur. 1st præt.

4 काकमण्डल्यः is the reading of A. B. and D.; C. has पक्षिमण्डल्यः; and E. कामं कण्डल्यः, which has no sense.

5 "Herd of buffaloes."

6 Indec. part. past of वह, "to bear:" the semi-vowel changed.

विशेषेण पुपोष। पुष्टञ्च तमुद्रिक्तधातुमेकदा मृगान्वेषणाय प्रयाते धन्यके सा धूमिनी रिरंसयोपातिष्ठत्[1]। भर्त्सितापि तेन बलात्कारमभ्यरीरमत्[2]। निवृत्तञ्च पतिमुदकाभ्यर्थिनमुद्धृत्य कूपात् पिब रुजति मे शिरः शिरोरोग इत्युदञ्चनं[3] सरज्जुं पुरश्चिक्षेपोदञ्चयन्तं तञ्च कूपादधः पृष्ठतो गत्वा प्रणुनोद। तञ्च विकलं स्कन्धेनोदूह्य देशाद्देशान्तरं परिभ्रमन्ती पतिव्रताप्रतीतिं लेभे बहुविधाश्च पूजाः। पुनरवन्तिराजानुग्रहान्महत्या भूत्या न्यवसत्। अथ पाणीयार्थिसार्थजनसमापत्तिदृष्टोद्धृतमवन्तिषु भ्रमन्तमाहारार्थिनं भर्त्तारमुपलभ्य सा धूमिनी येन मे पतिर्विकलीकृतः स दुरात्मायमिति तस्य साधोश्चित्रबधमज्ञेन राज्ञा समादेशयाञ्चकार[4]। धन्यकस्तु दत्तपश्चाद्बन्धो बध्यभूमिं नीयमानः सशेषत्वादायुषो यो मया विकलीकृतोऽभिमतो भिक्षुश्चेन्मे पापमाचक्षीत युक्तो मे दण्ड इत्यदीनमधिकृतमभिजगाद। को दोष इत्युपनीय दर्शितेऽमुष्मिन् स विकलः पर्य्यश्रुः पादपतितस्तस्य साधोस्तत्सुकृतमसत्याश्च तस्यास्तथाभूतं दुश्चरितमार्य्यबुद्धिराचचक्षे। कुपितेन राज्ञा विरूपितमुखी सा दुष्कृतकारिणी कृता श्वभ्य-

---

1 "Wish to sport," from रम, in the desiderative form.

2 Third pers. sing. indef. præt. of the causal of रम, "to sport," with अभि prefixed.

3 "A bucket or pail."

4 Second or compound præt. of the passive voice of आदिश, "to command," "was ordered." MSS. A. B. D. E. read चकार, but the form to be expected would have been चक्रे. This is one of the passages which C. has wholly altered. The verb must be in the passive voice; for although राज्ञा might have been written for राजा, yet the attributive अज्ञेन leaves no doubt of the case intended.

पाचिका[1]। कृतश्च धन्यकः प्रसादभूमिः। तद्ब्रवीमि स्त्रीहृदयं क्रूरमिति। पुनरनुयुक्तो गोमिनीवृत्तान्तमाख्यातवान् ॥

अस्ति द्रविडेषु काञ्ची नाम नगरी। तस्यामनेककोटिसारः श्रेष्ठिपुत्रः शक्तिकुमारो नामासीत्। सोऽष्टादशवर्षदेशीय[2]श्चिन्तामापेदे। नास्त्यदाराणामननुगुणदाराणां वा सुखं नाम। तत् कथन्नु गुणवद्विन्देयं कलत्रमिति। अथ परप्रत्ययाहृतेषु दारेषु यादृच्छिकीं सम्पत्तिमनभिसमीक्ष्य[3] कार्तान्तिको नाम भूत्वा वस्त्रान्तपिनद्धशालि[4]प्रस्थो भुवं बभ्राम। लक्षणज्ञोऽयमित्यमुष्याय कन्याः कन्यावन्तः प्रदर्शयाम्बभूवुः[5]। यां काञ्चिल्लक्षणवतीं सवर्णां कन्यां दृष्ट्वा स किल स्म ब्रवीति। भद्रे शक्नोषि किमनेन शालिप्रस्थेन गुणवदन्नमस्मानभ्यवहारयितुमिति। सहसितावधूतो गृहाद्गृहं प्रविश्याभ्रमत्। एकदा तु शिविषु[6] कावेरीदक्षिणतीरेषु पट्टने सहपितृभ्यामवसितमहर्द्धिमवशीर्णभवनसारां धात्र्या प्रदर्श्यमानां काञ्चनविरलभूषणां कुमारीं ददर्श। अस्यां संसक्तचक्षुश्चातर्कयत्। अस्याः खलु कन्यकायाः सर्व्व एवावयवा नातिस्थूला नातिकृशा नातिह्रस्वा नातिदीर्घा न विकटा मृजावन्तश्च। रक्त-

---

[1] Páchiká is properly "a ripening;" but it may mean that which is ripe or cooked, "meat," "food," in which sense it is used here.

[2] The affix देशीय implies, "about, or under, nearly eighteen years' old."

[3] "Not approving of accidental coming together in wives taken upon faith in others."

[4] Sáli is said to be the paddy or unthreshed rice of the cold-weather crop.

[5] In this place the compound præt. is used in the active voice, "those having daughters shewed their daughters to him."

[6] The Sivis, a people of the south, शिविर्मेरुद्रथायास्तुदक्षिणां वर्षमिष्यत इति वैजयन्ती.

तलाङ्गुली यवमत्स्यकमलकलशाद्यनेकपुण्यलेखालाञ्छितौ करौ समगुल्फसन्धी मांसलावशिरालौ चाङ्घ्री[1] जङ्घे चानुपूर्व्ववृत्ते पीवरोरुग्रस्त इव दुरुपलक्ष्ये जानुनी। सकृद्विभक्तचतुरस्रः ककुन्दरविभागशोभी रथाङ्गाकारसंस्थितश्च नितम्बभागः। तनुतरमीषन्निम्नगम्भीरनाभिमण्डलं वलिचयेण चालङ्कृतमुदरं। उरोविभागव्यापिनावुन्मुखमानचूचुकौ विशालारम्भशोभिनौ पयोधरौ। धनधान्यपुत्रभूयस्त्वचिह्नलेखालाञ्छिततले स्निग्धोदग्रकोमलनखमणी ऋज्वनुपूर्ववृत्तताम्राङ्गुली[2]। सन्नतांसदेशे सौकुमार्य्यवत्यौ निमग्नपर्व्वसन्धी च बाहुलते। तन्वीकंवु वृत्तबन्धुरा च कन्धरा। वृत्तमध्यविभक्तरागाधरमसंक्षिप्तचारुचिवुकमापूर्णकठिनगण्डमण्डलमसङ्गतानुवक्रनीलस्निग्धभ्रूलतमनतिप्रौढतिलकुसुमसदृशनासिकमत्यसितधवलरक्तत्रिभागभासुरमधुरधीरसञ्चारमन्थरायतेक्षणमिन्दुशकलसुन्दरललाटमिन्द्रनीलशिलाकाररम्यालकपङ्क्ति द्विगुणकुण्डलितम्लाननालीकनालललितलंवश्रवणपाशयुगलमाननकमलम्। अनतिभङ्गुरो बहुलः पर्य्यन्तेऽप्यकपिलच्छविरायामवानेकैकनिसर्गसमस्निग्धनीलो गन्धग्राही च मूर्द्धजकलापः। सेयमाकृतिर्न व्यभिचरति शीलमासज्जति च मे हृदयमस्यामेव। अथच परीक्ष्यैनामुद्वहेयमविमृश्यकारिणां[3]

---

[1] The two feet are fleshy, not tendinous.

[2] The description recurs to the feet, or the limbs, of which the nails are the ornaments, having well-rounded and ruddy toes, with the lower surfaces marked with lines, indicating abundance (भूयस्त्व) of corn, wealth, and children.

[3] Two copies, B. D., have, instead of the passage of the text, with which the other three concur, अविमृश्यकारिणां हि नियमेनोपतिष्ठन्त्युपर्य्यनुशयाः.

हि नियतमनेकाः पतन्त्यनुशयपरम्परा इति स्निग्धदृष्टिराचष्ट । भद्रे कच्चिदस्ति कौशलं शालिप्रस्थेन[1]अनेन सम्पन्नमाहारमस्मानभ्यवहारयितुमिति । ततस्तया वृद्धदासी साकूतमालोकिता । तस्य हस्तात्प्रस्थमा[2]त्राधान्यमादाय क्वचिदलिन्दोद्देशे सुसिक्तसम्मृष्टे दत्तपादशौचमुपावेशयत् । सा कन्या तान् गन्धशालीन् मात्रया विशोष्यातपे मुहुर्मुहुः परिवर्त्त्य स्थिरसमायां भूमौ नालीपृष्ठेन मृदुमृदु घर्षयन्ती[3] तुषैरखण्डैस्तण्डुलान् पृथक् [4]चकार । जगाद च धात्रीं मातरेभिस्तुषैरर्थिनो भूषणमृजाक्रियाक्षमैः स्वर्णकारास्तेभ्य इमान् दत्वा लब्धाभिः का[5]किणीभिः स्थिरतराण्यनत्यार्द्राणि नातिशुष्काणि काष्ठानि मितम्पचां स्थालीमुभे शरावे चाहरेति । तथाकृते तया तांस्तण्डुलाननतिनिम्नोत्तानविस्तीर्णकुक्षौ ककुभो[6]लूखले लोहपत्रवेष्टितमुखेन समशरीरेण विभाव्यमानमध्यता नवेन व्यायततमेन गुरुणा खादिरेण मुसलेन चतुरललितोत्क्षेपापक्षेपणायासितभुजमसकृदङ्गुलीभिरुद्धृत्योद्धृत्यावहत्योद्धृत्य शूर्प्पशोधितकणकिंशा[7]रुकादीनस्तण्डुलानसकृदद्भिः प्रक्षाल्य क्वथितपञ्चगुणे जले दत्तचुल्लीपूजा प्राक्षिपत् ।

---

[1] A Prastha is said to be forty-eight double handfuls. The commentator says, in common practice it intends a seer and a quarter, rather more than two pounds.

[2] This term occurs again, but it is doubtful in what sense. See मात्रया परिवर्त्त्य.

[3] It is also read घट्टयन्ती with the same meaning, "rubbing नालीपृष्ठेन with the back or the external part of the stalk."

[4] "Detached the grain from the unbroken chaff."

[5] A coin or measure of value of small amount, equal to twenty Cowri shells.

[6] A mortar of kakubha (pentaptera) wood.

[7] "Cleansed by the winnowing basket from the chaff and awn."

प्रश्लथावयवेषु प्रस्फुरत्सु तण्डुलेषु मुकुला[1]वस्थामतिवर्त्तमानेषु संक्षिप्यानलमुपहितमुखपिधानया स्थाल्यान्नमण्डमगा[2]लयत्। दर्व्व्या चावगाह्य मात्रया परिवर्त्त्य समपक्वेषु सिक्थेषु तां स्थालीमधोमुखीमवा[3]तिष्ठिपत्। इन्धनान्यन्तःसा[4]राण्यम्भसा समभ्युक्ष्य प्रशमिताग्नीन्निरुष्णाङ्गारीकृत्य तदर्थिभ्यः प्राहिणोत्। एभिर्लब्धाः काकिणीर्दत्त्वा शाकं घृतं दधि तैलमामलकं चिञ्चा[5]फलञ्च यथालाभमानयेति। तथानुष्ठिते च तया द्वित्रानु[6]पदंशानुपपाद्य तदन्नमण्डमार्द्रबालुकोपहितनवशरावगतमिति मृदुना तालवृन्तानिलेन शीतलीकृत्य सलवणसम्भारं दत्ताङ्गारधूपवासञ्च सम्पाद्य तदाप्यामलकं श्लक्ष्णपिष्टमुत्पलगन्धि कृत्वा धात्रीमुखेन स्नानाय तमचोदयत्। तया च स्नानशुद्धया दत्ततैलामलकः क्रमेण सस्नौ स्नातः सिक्तमृष्टे कुट्टिमे फलकमारुह्य पाण्डुहरितस्य त्रिभागशेषलूनस्याङ्गणकदलीपलाशस्योपरि शरावद्वयदत्तमार्द्रमभिमृशन्नतिष्ठत् सा तु तां पेयामेवाग्रे समुपाहरत्। पीत्वा

---

[1] "When the rice was passing the state of a full-blow bud;" that is, when it was swollen sufficiently.

[2] Third pers. sing. 1st præt. causal of गल, "to drop," "she caused to drop," "she poured off the scum or the superfluous water in which the rice had been boiled."

[3] Third person 3d præt. causal of ष्ठा with अधि prefixed, "she made the pot to stand with inverted mouth over the thoroughly boiled rice," thus leaving it to steam with the moisture it retains, a lid or platter, of course, covering the mouth of the vessel.

[4] "The fuel not quite consumed."

[5] The articles here enumerated to form an accompaniment to the rice are, vegetables, ghee, curds, oil, myrobalan, and tamarinds, to be mixed together, or used separately, as subsequently described.

[6] Spices and condiments, cloves, mace, cinnamon, cardamoms, and the like.

चापनीताध्वश्रमः प्रहृष्टः प्रक्लिन्नसकलगात्रः स्थितोऽभूत् । ततस्तस्य शाल्योदनस्य दर्व्वीद्वयं दत्वा सर्प्पिर्मात्रं सूपमुपदंशञ्चोपजहार । इमञ्च दध्ना च त्रिजातकावचूर्णितेन सुरभिशीतलाभ्याञ्च कालशेयकाञ्जिकाभ्यां[1] शेषमन्नमभोजयत् । सशेष एवान्धस्यसावतृप्यत । अयाचत च पानीयं । अथ नवभृङ्गारसम्भृतमगुरुधूपधूपितमभिनवपाटलाकुसुमवासितमुत्फुल्लोत्पलग्रथितसौरभं वारि नालीधारात्मना पातयाम्बभूव । सोऽपि मुखोपहितशरावेण हिमशिशिरकणकरालितारुणायमानाक्षिपक्ष्मा धाराखाभिनन्दितश्रवणः स्पर्शसुखोद्भिन्नरोमाञ्चकर्कशकपोलः परिमलप्रवालोत्पीडफुल्लघ्राणरन्ध्रो माधुर्य्यप्रकर्षावर्ज्जितरसनेन्द्रियस्तदच्छं[2] पानीयमाकण्ठं पपौ । शिरःकम्पसञ्ज्ञावारिता च पुनरपरकरकेणाचमनमदत्त[3] कन्या । वृद्धया तु तदुच्छिष्टमपोह्य हरितगोमयोपलिप्ते कुट्टिमे स्वमेवोत्तरीयकर्प्पटं व्यधाय क्षणमशेत । परितुष्टश्च विधिवदुपयम्य कन्यां निन्ये । नीत्वैतदनपेक्षः कामपि गणिकामवरोधमकरोत् । तामप्यसौ प्रियसखीमिवोपाचरत् । पतिञ्च दैवतमिव मुक्ततन्द्रा पर्य्यचरत् । गृहकार्य्याणि चाहीनमन्वतिष्ठत् परिजनञ्च दाक्षिण्यनिधिरात्माधीनमकरोत् । तद्गुणवशीकृतश्च भर्त्ता सर्व्वमेव कुटुम्बं तदायत्तमेवं कृत्वा तदेकाधीनजीवितश-

---

[1] Butter milk and rice water.

[2] All the senses were gratified, the eye by the condensed vapour on the pitcher, the ear by the sound of the drops, the touch by the cold feel, the nose by the fragrance, and the tongue by the sweetness.

[3] Third pers. sing. 1st præt. of दा, "to give," 3d conj. atm. pada.

रीरस्त्रिवर्गं निर्विवेश। तद्ब्रवीमि गृहिणः प्रियहिताय दारगुण इति। ततस्तेनानुयुक्तो निम्बवतीवृत्तान्तमाख्यातवान् ॥

अस्ति सौराष्ट्रेषु वलभी[1] नामनगरी तस्यां गृहगुप्तनाम्नो गुह्यकेन्द्रतुल्यविभवस्य नाविकपतेर्[2]दुहिता रत्नवती नाम ताङ्किल मधु[3]मत्याः समुपागम्य बलभद्रो नाम सार्थवाहपुत्रः पर्य्यणैषीत्। तयापि नववध्वा रहसि रभसविघ्नितसुखो झटिति द्वेषमल्पेतरं बबन्ध न तां पुनर्द्रष्टुमिष्टवान्। तद्गृहागमनमपि सुहृद्वाक्यातिवर्त्ती लज्जया परिजहार ताञ्च दुर्भगां तदाप्रभृत्येव नेयं रत्नवती निम्बवती चेयमिति स्वजनः परिजनश्च परिबभूव। गते च कस्मिंश्चित्कालान्तरे सानुतप्यमाना का मे गतिरिति विमृशन्ती कामपि वृद्धपरि[4]व्राजिकां मातृस्थानीयां देवशेषकुसुमैरुपस्थितामपश्यत्। तस्याः पुरो रहसि सकरुणं रुरोद। तयाप्यश्रुमुख्या बहुप्रकारमनुनीय रुदितकारणं पृष्टा त्रपमाणापि कार्य्यगौरवात् कथञ्चिदब्रवीत्। अम्ब किं ब्रवीमि दौर्भाग्यं नाम जीवन्मरणमङ्गनानां विशेषतश्च कुलवधूनां। तस्याहमस्म्युदाहरणभूता। मातृप्रमुखो

---

[1] Valabhi is seldom mentioned in Sanscrit writings. According to Colonel Tod it was sacked by the Huns in the beginning of the sixth century; but it would appear to have survived this calamity, and to have been a place of note as late as the date of our author, by its having a place in his narratives.

[2] Thence also we may infer that Valabhi was a place of commerce; and although not a sea port, yet being not far from the coast it was connected with maritime trade. According to Tod it is still to be traced at Balbi, 10 miles north-west of Bhawanagar. See Annals of Rujusthán, I. 216.

[3] A place named Madhumatí.

[4] A female Buddhist mendicant.

ऽपि ज्ञातिवर्गो मामवज्ञयैव पश्यति । तेन सुदृष्टां मां कुरु न चेत् त्यजेयमद्य निःप्रयोजनान् प्राणान् । आविरामाच्च मे रहस्यं न श्राव्यमिति पादयोः पपात। सैनामुत्थायोद्बाष्पा प्रोवाच वत्से माध्यवस्यः साहसं। इयमस्ति त्वन्निदेशवर्त्तिनी यावति मयोपयोगस्तावति भवाम्यनन्याधीना यद्येवासि निर्विण्णा तपश्चर त्वं मदधिष्ठिता पारलौकिकाय कल्याणाय। नन्वयमुदर्कः[1] प्राक्तनस्य दुःकृतस्य यदनेनाकारेणेदृशेन शीलेन जात्या चैवंभूतया समनुगता सत्यकस्मादेव भर्त्तृद्वेष्यतां गतासि । यदि कश्चिदस्त्युपायः पतिद्रोहप्रतिक्रियायै दर्शयामु मतिर्हि ते पटीयसीति । अथासौ कथञ्चित्क्षणमधोमुखी ध्यात्वा दीर्घोष्णश्वासपूर्व्वमवोचत् । भगवति पतिरेकदैवतं वनितानां विशेषतः कुलजानामतस्तच्छुश्रूषणाभ्युपायभूतं किञ्चिदाचरणीयं । अस्त्यस्मत्प्रातिवेश्यो वणिक् । अभिजनेन विभवेन राजान्तरङ्गभावेन च सर्व्वपौरानतीत्य प्रवर्त्तते। तस्य कन्या कनकवती नाम मत्समानरूपावयवा ममातिस्निग्धा सखी तया सह तद्विमानहर्म्यतले ततोऽपि द्विगुणमण्डिता विहरिष्यामि। त्वया तु तन्मातृप्रार्थनं सकरुणमभिधाय पतिरेतद्गृहं कथञ्चनानेयः। समीपगतेषु च युष्मासु क्रीडामत्ता नाम कन्दुकं भ्रंशयेयम् । अथ तमादाय तस्य हस्ते दत्वा वक्ष्यसि पुत्र तवेयं भार्य्यासखी निधिपतिदत्तस्य श्रेष्ठिमुख्यस्य कन्या कनकवती नाम त्वामियमनवस्थो नि-

---

[1] "Consequence," "result."

ष्करुणश्चेति रत्नवतीनिमित्तमत्यर्थं निन्दति तदेष कन्दुको विपक्षधनं प्रत्यर्प्पणीयमिति । स तथोक्तो नियतमुन्मुखीभूय तामेव प्रियसखीम्मन्यमानो मां बद्धाञ्जलिना च मानायै मह्यं भूयस्त्वत्प्रार्थितः साभिलाषमर्प्पयिष्यति । तेन रन्ध्रेणोपश्लिष्य रागमुन्मुखीकृत्य यथासौ कृतसङ्केतो देशान्तरमादाय मां गमिष्यति तथोपपादनीयमिति । हर्षाभ्युपेतयानया तथैव सम्पादितं । अथैतां कनकवतीति वृद्धतापसीविप्रलब्धो बलभद्रः सरत्नसारभूषणमादाय निशि निरन्धतमसि प्रावसत् । सा तु तापसी वार्त्तामापादयत् । मन्देन मया निर्निमित्तमुपेक्षिता रत्नवती श्वसुरौ परिभूतौ सुहृदश्चार्त्तिवर्त्तितास्तदद्यैव संसृष्टो जीवितुं जिह्रेमीति[1] बलभद्रः पूर्वेद्युर्मामकथयत् । नूनमसौ तेन नीता । व्यक्तिश्चाचिराद्भविष्यतीति । तच्छ्रुत्वा तद्बान्धवास्तदन्वेषणं प्रति शिथिलयत्नास्तस्थुः । रत्नवती तु मार्गे काञ्चित्पण्यदासीं सङ्गृह्य तयोह्यमानपाथेयाद्युपस्करा खेटकपुरमगमत् । अमुत्र च व्यवहारकुशलो बलभद्रः स्वल्पेनैव मूल्येन महद्धनमुपार्ज्जयत् पौराग्रगण्यश्चासीत् परिजनश्च भूयानर्थवशात्समाजगाम । ततस्तां प्रथमदासीं न कर्म्म करोषि हृष्टं मुष्णास्यप्रियं ब्रवीषीति परुषमुक्त्वा बह्वताडयत् । चेटी तु प्रसादकालोपाख्यातरहस्यास्या वृत्तान्तैकदेशमात्तरोषा निर्बिभेद । तच्छ्रुत्वा लुब्धेन तु दण्डवाहिना[2]

[1] First pers. sing. pres. of ह्री, "to be ashamed," 3d conjugation.

[2] The head of the police, the magistrate, but acting subordinately to the corporation of elders or Pancháyat.

पौरवृद्धसन्निधौ निधिपतिदत्तस्य कन्यां कनकवतीं मोषेणापहृत्यास्मत्पुरे निवसत्येष दुर्मतिर्बलभद्रः। तस्य सर्व्वस्वहरणं न भवद्भिः प्रतिबन्धनीयमिति नितरामभर्त्स्यत। भीतश्च बलभद्रमभिजगाद रत्नवती। न भेतव्यमेवं ब्रूहि नेयं निधिपतिदत्तकन्या कनकवती वलभ्यामेव गृहगुप्तदुहिता रत्नवती नामेयं दत्ता पितृभ्यां मया च न्यायोढा। न चेत् प्रतीथ[1] प्रणिधिं प्रहिणुतास्या[2] बन्धुपार्श्वमिति। बलभद्रस्तु तथोक्त्वा श्रेणीप्रातिभाव्येन[3] तावदवातिष्ठत् यावत्पुरवृद्धलेख्यलब्धवृत्तान्तो गृहगुप्तः खेटकपुरमागत्य सहजामाचा दुहितरमतिप्रीतः प्रत्यनैषीत्। तथा दृष्ट्वा रत्नवती कनकवतीति भावयतस्तस्यैव बलभद्रस्यातिवल्लभा जाता तद्ब्रवीमि कामो नाम सङ्कल्प इति। तदनन्तरमसौ नितम्बवतीवृत्तान्तमप्राक्षीत्। सोऽहमब्रवम्॥

अस्ति शूरसेनेषु मधुरा[4] नाम नगरी तत्र कश्चित् कुलपुत्रः[5] कलासु गणिकासु चातिसक्तो मित्रार्थे स्वभुजमात्रनिर्व्यूढानेककलहः कलहकण्टक इति कर्कशैरभिख्यापिताख्यः प्रत्यवात्सीत्। स चैकदा कस्यचिदागन्तोश्चित्रकरस्य हस्ते चित्रपटं ददर्श। तत्र काचिदालेख्यगता युवतिरालोकमात्रेणैव कल-

[1] Second pers. plur. pres. of इ, "to go," with प्रति prefixed, "to believe," "to have faith in."

[2] Second pers. plur. imp. of हि, "to send," 5th conjugation, with प्र prefixed.

[3] "By the security of his company, or the association of trades to which he necessarily belonged."

[4] It is rather remarkable that all the copies read Madhurá instead of Mathurá.

[5] One of the meanings of कुलपुत्र is "a Súdra," in which sense it is here employed.

हकण्टकस्य कामातुरं चेतश्चकार स च तमब्रवीत् । भद्र विरुद्धमिवैतत् प्रतिभाति । यतः कुलजादुर्लभं वपुराभिजात्यशंशिनी च नम्रता पाण्डुरा मुखछविरनतिपरिभुक्तसुलभा च तनुः प्रौढतानुविद्धा च दृष्टिः। न चैषा प्रोषितभर्त्तृका प्रवासचिह्नस्य वेण्यादेरदर्शनात् । लक्ष्म चैतद्दक्षिणपार्श्ववर्त्ति तदियं वृद्धस्य कस्यचिद्वणिजो नातिपुंस्त्वस्य गृहिणी त्वयातिकौशलाद्यथादृष्टमालिखिता भवितुमर्हतीति । स तमभिप्रशंस्याशंसत् । सत्यमिदमवन्तिपुर्य्यामुज्जयिन्यामनन्तकीर्त्तिनाम्नः सार्थवाहस्य भार्य्या यथार्थनाम्ना नितम्बवती नाम एषा सौन्दर्य्यविस्मितेन मया एवमालिखितेति । स तदैवोन्मनायमानस्तद्दर्शनाय वव्राजोज्जयिनीं भार्गवो[1] नाम भूत्वा भिक्षानिभेन[2] तद्गृहं प्रविश्यैनां ददर्श । दृष्ट्वा चात्यारूढमन्मथो निर्गत्य पौरमुखेभ्यः श्मशानरक्षामयाचत। अलभत च। तत्र लब्धैश्च शवावगुण्ठनपटादिभिः[3] काममर्हन्तिकां नाम श्रमणिकामु[4]पासाञ्चक्रे। तन्मुखेन च नितम्बवतीमुपमन्त्रयामास सा चैनं निर्भर्त्सयन्ती प्रत्याचचक्षे। श्रमणिकामुखाच्च दुष्करशीलभ्रंशां कुलस्त्रियमुपलभ्य रहसि दूतिकामशिक्षयत् । भूयोऽप्युपतिष्ठ सार्थवाहस्य भार्य्यां ब्रूहि चोपह्वरे संसारदोषदर्शनात् समा-

---

[1] A name implying "an astrologer."

[2] "Under the pretence of asking for alms."

[3] The clothes in which the dead bodies were wrapped, the perquisite of the keeper of the Smaśán or ground where they were burnt.

[4] The female is a Buddhist, by the term that follows, a Sramaṅiká; but Arhat more commonly implies a Jain, although it is also a Bauddha designation. Possibly the two sects were beginning to be confounded, the Jains commencing to take the place of the Buddhists, their predecessors, about this time.

धिमास्थाय मुमुक्षमाणो मादृशो जनः कुलवधूनां शीलपातने घटत इति क्व घटते । एतदपि त्वामत्युदारया समृद्ध्या रूपेणातिमानुषेन प्रथमेन वयसोपपन्नां किमितरनारीसुलभं चापलं स्पृष्टं न चेति परीक्षा कृता तुष्टास्मि । तथैवमदुष्टभावतया त्वामिदानीमुत्पन्नापत्यां द्रष्टुमिच्छामि । भर्त्ता तु भवत्या केनचिद्ग्रहेणाधिष्ठितोऽसमर्थोऽभूत् । न च शक्यं तस्य विघ्नमप्रतिकृत्यापत्यमस्माल्लब्धुम् । अतः प्रसीद वृक्षवाटिकामेकाकिनी प्रविश्य मदुपनीतस्य कस्यचिन्मन्त्रवादिनः स्वच्छन्दमेव हस्ते चरणमर्प्पयित्वा तदभिमन्त्रितेन प्रणयकुपिता नाम भूत्वा भर्त्तारमुरसि प्रहर्त्तुमर्हसि । उपर्य्यसावुत्तमधातुपुष्टिमूर्ज्जितापत्योत्पादनक्षमामासादयिष्यति । अनुवर्त्तिष्यते देवीमिव अत्रभवतीं न शङ्का कार्य्येति । सा तथोक्ताव्यक्तमभ्युपेष्यति । नक्तं मां वृक्षवाटिकां प्रवेश्य तामपि प्रवेशयिष्यसि । तावतैव त्वयाहमनुगृहीतो भवेयमिति सा तथैवोपग्राहितवती सोऽतिप्रीतस्तस्यामेव क्षपायां वृक्षवाटिकायां गतो नितम्बवतीं निर्ग्रन्थिकाप्रयत्नेनोपनीतां पादे परामृशन्निव हेमनूपुरमेकमाक्षिप्य क्षुरिकयोरुमूले किञ्चिदालिख्य द्रुततरमपासरत् । सा तु सान्द्रत्रासा स्वमेव दुर्नयं गर्हमाणा जिघांसन्तीव श्रमणिकां तद्व्रणं भवनदीर्घिकायां प्रक्षाल्य दत्वा पटबन्धनं सा भयापदेशादपरञ्चापनीय नूपुरं शयनपरा त्रिचतुराणि दिनान्येकान्ते निन्ये । स धूर्त्तो विक्रेष्य[1]

---

[1] First pers. sing. indef. fut. of क्री, "to buy," verb, 9th cl. with वि prefixed, "to sell."

इति तेन नूपुरेण तमनन्तकीर्त्तिमुपाससाद । स दृष्ट्वा मम गृहिण्या एवैष नूपुरः कथमयमुपलब्धस्त्वयेति तमब्रुवाणं निर्बन्धेन पप्रच्छ । स तु बणिग्ग्राम[1]स्याग्रे वक्ष्यामीति स्थितो ऽभूत् । पुनरसौ स्वगृहिण्यै स्वनूपुरयुगलं प्रेषयेति सन्दिदेश सा च सलज्जंससाध्वसञ्चाद्यरात्रौ विश्रामप्रविष्टायाः वृक्षवाटिकायां प्रभ्रष्टो ममैकः प्रतिशिथिलबन्धो नूपुरः सो ऽद्याप्यन्विष्टो न दृष्टः सपुनरयं द्वितीय इत्यपरं प्राहिणोत् । अनया च वार्त्तयामुं पुरस्कृत्य सबणिग्जनः समाजगाम । स चानुयुक्तो धूर्त्तः सविनयमावेदयत् । विदितमेव खलु वो यथाहं युष्मदाज्ञया पितृवनमभिरक्ष्य तदुपजीवी प्रतिवसामि । लुब्धाश्च कदाचिन्मद्दर्शनभीरवो निशि दहेयुरपि शवानीति निशास्वपि श्मशानमधिशये । अपरेद्युर्दग्धादग्धं मृतकं चितायाः प्रसभाकर्षन्तीं श्यामाकारां नारीमपश्यम् । अर्थलोभात्तु निगृह्य ससाध्वसं सा गृहीता शस्त्रिकयोरुमूले यदृच्छया किञ्चिदुल्लिखतमेष च नूपुरश्चरणादाक्षिप्तस्तावत्येव द्रुतगतिः सा पलायिष्ट । सो ऽयमस्यागमः परं भवन्तः प्रमाणमिति । विमर्शेन च तस्याः शाकिनीत्व[2]मैकमत्येन पौराणामभिमतमासीत् भर्त्रा च परित्यक्ता तस्मिन्नेव श्मशाने बहुविलप्य पाशेनोद्बध्य मर्त्तुकामा तेन धूर्त्तेन नक्तमगृह्यत ।

---

[1] Association of traders, the corporation, or, in this case, the municipality.

[2] B. and D. have डाकिनीत्वं ; the sense is the same. The character of a female goblin, a Śákiní or Ḍákiní ; an evil being in the person of a woman, and who, to the usual attributes of a witch, is supposed to add the practice of holding orgies in cemeteries, and feeding occasionally on dead bodies.

अनुनीता च सुन्दरि त्वदाकारोन्मादितेन मया त्वदावर्ज्जने बहूनुपायान् भिक्षुकीमुखेनोपन्यस्य तेष्वसिद्धेषु पुनरयमुपायो यावज्जीवमसाधारणीकृत्य रन्तुमाचरितस्तत् प्रसीदानन्यशरणायास्मै दासजनायेति मुहुर्मुहुश्चरणयोर्निपत्य प्रयुज्य शान्त्वनशतानि तामगत्यन्तरामात्मवश्यामकरोत् । तदिदमुक्तं दुष्करसाधनं प्रज्ञेति । इदमाकर्ण्य ब्रह्मराक्षसो मामपूजयत् ॥

अस्मिन्नेव क्षणे नातिप्रौढपुन्नाग[1]मुकुलस्थूलानि मुक्ताफलानि सह सलिलबिन्दुभिरम्बरतलादपतन् । अहं तु किन्निदमित्युच्चक्षुरालोकयम् कमपि राक्षसं काञ्चिदङ्गनां विचेष्टमानगात्रीमाकर्षन्तमपश्यम् । कथमपहरति निष्कामामपि स्त्रियमनाचारो नैर्ऋत[2] इति गगनगमनमन्दशक्तिरशस्त्रश्चातप्ये । स तु मत्सम्बन्धी ब्रह्मराक्षसः तिष्ठ तिष्ठ पाप क्वापहरसीति भर्त्सयन्नुत्थायापरराक्षसेन समसृज्यत । तां तु रोषादनपेक्षापविद्धाममरवृक्षमञ्जरीमिवान्तरिक्षादापतन्तीमुन्मुखप्रसारितोभयकरः कराभ्यामग्रहीषम् । उपगृह्य च वेपमानां सम्मीलिताक्षीं मदङ्गस्पर्शसुखेनोद्भिन्नरोमाञ्चां तादृशीमेव तामनवतारयन्नतिष्ठम् । तावत्तावुभावपि शैलशृङ्गभङ्गैः पादपैश्च रभसोन्मूलितैर्मुष्टिपादप्रहारैश्च परस्परमक्षपयेताम्[3] ।

---

[1] A kind of tree (rottleria tinctoria), "pearls large as its blossoms fell from the sky."

[2] A Rákshasa.

[3] Third pers. dual 1st præt. causal of क्षै, "to perish;" atm. pada being used in a reciprocal or reflective sense, "they two mutually destroyed each other."

पुनरहमतिमृदुनि पुलिनवति कुसुमलवलाञ्छिते सरस्तीरेऽवरोप्य सस्पृहं निर्वर्णयंस्तां मत्प्राणैकवल्लभां राजकन्यकां कन्दुकावतीमलक्षयम् । साहि मया समाश्वास्यमाना तिर्य्यङ् मामभिनिरूप्य जातप्रत्यभिज्ञा सकरुणमरोदीत् । अवादीच्च नाथ त्वद्दर्शनादुपोढरागा तस्मिन्कन्दुकोत्सवे पुनः सख्या चन्द्रसेनया त्वत्कथाभिरेव समाश्वसितास्मि त्वं किल समुद्रमध्ये मज्जितः पापेन मद्भ्रात्रा भीमधन्वनेति श्रुत्वा सखीजनं परिजनञ्च वञ्चयित्वा जीवितं जिहासुरेकाकिनी क्रीडावनमुपागमम् । तत्र च मामचकमत[1] कामरूप एष राक्षसाधमः सोऽयं मया भीतयावधूतप्रार्थनः स्फुरन्तीं मां निगृह्याभ्यधावत् । अत्रैवमवसितोऽभूत् । अहञ्च दैवात्तवैव जीवितेशस्य हस्ते पतिता भद्रं तवेति श्रुत्वा च तया सहावरुह्य नावमध्यारोहम् । मुक्ता च नौः प्रतिवातप्रेरिता तामेव दामलिप्तां प्रत्युपातिष्ठत । अवरूढाश्च वयमश्रमेण तनयस्य च तनयायाश्च नाशादनन्यापत्यस्तुङ्गधन्वा सुह्मपतिर्निष्कलः स्वयं सकलत्र एव निष्कलङ्के गङ्गारोधस्यनशनेनोपरन्तुं प्रतिष्ठते । सह तेन मर्त्तुमिच्छत्यनन्यनाथानुरक्तः पौरवृद्धलोक इत्यश्रुमुखीनां प्रजानामाक्रन्दमशृणुम । अथाहमस्मै राज्ञे यथावृत्तमाख्याय तदपत्यद्वयं प्रत्यर्प्पितवान् प्रीतेन तेन जामाता कृतोऽस्मि दामलिप्तेश्वरेण तत्पुत्रो मदनुजीविजातो मदा-

---

[1] Third pers. sing. indef. præt. of कम, "to desire," verb, 1st conjugation. As this verb is in some respects inflected like a causal, so the 3d præt. takes the like form. Gr. 158.

ज्ञप्तेन चामुना प्राणवदुज्झिता चन्द्रसेना कोशदासमभजत्। ततश्च सिंहवर्म्मसाहाय्यार्थमत्रागत्य भर्त्तुस्तव दर्शनोत्सवसुखमनुभवामीति ॥

श्रुत्वा चित्रेयं दैवगतिरवसरेषु पुष्कलः पुरुषकार इत्यभिधाय भूयः स्मिताभिषिक्तदन्तच्छदो मन्त्रगुप्ते हर्षोफुल्लं चक्षुः पातयामास देवो राजवाहनः। स किल करकमलेन किञ्चित्संवृताननो ललितवल्लभारभसदत्तदन्तक्षतव्यसनविह्वलाधरमणिर्निरोष्ठ्यवर्णमात्मचरितमाचचक्षे ॥

इति श्री दण्डिना विरचिते दशकुमारचरिते मित्रगुप्तचरितं नाम षष्ठ उच्छ्वासः ॥

मन्त्रगुप्तचरितं सप्तम उच्छ्वासः

राजाधिराजनन्दन नगरन्ध्रगतस्य ते गतिं ज्ञास्यन्नहञ्च गतः कदाचित्कलिङ्गान्। कलिङ्गनगरस्य नात्यासन्नसंस्थितजनदाहस्थानसंसक्तस्य कस्यचित् कान्तारधरणिजस्यास्तीर्णसरसकिसलयसंस्तरे तले निषद्य निद्रालीढदृष्टिरशयिषि। जगति च कालरात्रिशिखण्डजालकान्धकारे चरितरक्षसि क्षरितनिहारे निजनिलयनिलीननिःशेषजने नितान्तशीते

---

[1] "Dead," "the burning of dead bodes," संस्थितजनदाह.

निशीथे घनतरशाखिशाखान्तरालनिर्ह्रादि[1] नेत्रनिंसिनीं नि-
द्रां निगृह्णत् कर्णदेशं गतं कथं खलेनानेन दग्धसिद्धेन
रिंसाकाले निदेशं दित्सता जन एष रागेणानर्गलेनार्दित
इत्थंखिलीकृतः[2] क्रियेतास्याणकनरेन्द्रस्य[3] केनचिदनन्तशक्तिना
सिद्ध्यन्तराय इति किङ्करस्य किङ्कर्य्याश्चातिकातरं रटितं ।
तदाकर्ण्य क एष सिद्धः का च सिद्धिः किञ्चानेन किङ्करेण
करिष्यत इति दिदृक्षाक्रान्तहृदयः किङ्करगतया दिशा किञ्चि-
दन्तरङ्गतस्तरलतरनरास्थिशकलरचितालङ्कारकान्तकायं दह-
नदग्धकाष्ठनिष्ठाङ्गाररजः[4]कृताङ्गरागं तडिल्लताकारजटाधरं
हिरण्यरेतस्यरण्यचक्रान्धकारराक्षसेक्षणगृहीतनानेन्धनग्रास-
चञ्चदर्चिषि दक्षिणेतरेण करेण तिलसिद्धार्थ[5]कादीन्निरन्तरच-
टचटायिता[6]नाकिरन्तं कञ्चिदद्राक्षम् । तस्याग्रे सकृताञ्जलिः
किङ्करः किं करणीयं दीयतां निदेश इत्यतिष्ठत् । आदिष्टश्चायं
तेनातिकृष्टाशयेन गच्छ कलिङ्गराजस्य कर्दनस्य कन्यां कन-
कलेखां कन्यागृहादिहानयेति । स च तथाकार्षीत् । ततश्चैनां

---

[1] A. C. and E. have अन्तरालनिर्ह्रादिनि; B. and D. अन्तनलिनिर्ह्रादि; the preferable reading is अन्तरालनिर्ह्रादि; and the whole may be rendered, "a dialogue (referring to रटितं, some lines below) came to my ears, preventing the sleep which was kissing (निंसिनीं) my eyes, sounding among the branches of the thickly-clustered trees."

[2] "Made empty or powerless;" from खिल, "empty," "defeated," "overcome."

[3] आणकनरेन्द्र here means, "inferior or base magician."

[4] "The dust (or ashes) of the coals (left) by the destruction (combustion) of wood."

[5] Sesamum and white mustard seeds.

[6] "Crushed or crumbled;" from चट, "to break in pieces:" the repetition is in some degree imitative.

त्रासेनालघीयसास्रजर्जरेण च कण्ठेन रणरणिकागृहीतेन च हृदयेन हा तात हा जननीति क्रन्दन्तीं कीर्णम्लानशेखरस्रजि शीर्णनहनशिरसिजानां सञ्चये निगृह्यासिना शिलाशितेन शिरश्चिकर्त्तिषयाचेष्टत झटिति चाच्छिद्य तस्य हस्तात् तां शस्त्रिकां तया निकृत्य तस्य तच्छिरः सजटाजालं निकटस्थस्य कस्यचित् जीर्णसालस्य स्कन्धरन्ध्रे न्यधिषि। तन्निध्याय हृष्टतरः स राक्षसः क्षीणाधिरकथयत्। आर्य्य कदर्य्यस्यास्य कदर्थनाद्[1] न कदाचिन्निद्रायाति नेत्रे। तर्ज्जयति त्रासयति चाकृत्ये चाज्ञां ददाति तदत्र कल्याणराशिना साधीयः कृतं यदेष नरकाकः कारणानां नारकाणां[2] रसज्ञानायापनीतः शेते शीतेतरदीधितिदेहजस्य नगरं। तदित्थं दयानिधेरनन्ततेजसस्ते ऽयं जनः काञ्चिदाज्ञाञ्चिकीर्षति। आदिशालं कालहरणेनेत्यनंसीत्। आदिशञ्च तं सखे सैषा सज्जनाचरितासरणि[3]र्यदणीयसि कारणे ऽनणीयानादरः सन्दृश्यते। न चेदिदं नेच्छसि सेयं सन्नताङ्गयष्टिरक्लेशार्हा सत्यनेनाकृत्यकारिणात्यर्थं क्लेशिता तन्नयैनां निजनिलयं नान्यदितः किञ्चिदस्ति चिन्ताराधनं न इति। अथ तदाकर्ण्य कर्णशेखरणीलनीरजायितान्धीरेतरतारकां दृशं तिर्य्यक्किञ्चिदञ्चितां सञ्चारयन्ती सलिलचरकेतनशरासनानतां चिल्लिकालतां[4] ललाटरङ्गस्थलीलास्य-

---

[1] "Oppression," "vexatious conduct."

[2] All but C. have नारकीणां; which may be deduced from नरक, "hell," though its immediate derivative नारक, "infernal;" by adding इन्, नारकिन्, "deserving the pains of hell," but the form is unusual and superfluous.

[3] "A road," "a path," "a line of conduct."

[4] "The eye brow," चिल्लिकालता, भ्रूलता.

नर्त्तकीं लीलालसं लालयन्ती कण्टकितरक्तगण्डरेखाराग-लज्जान्तरालचारिणी चरणाग्रेण तिरश्चीननखार्चिश्चन्द्रिकेण धरणीतलं साचीकृताननसरसिजं लिखन्ती दन्तच्छदकिशलयलङ्घिना हर्षास्रसलिलधाराशीकरकणजालसंक्लेदितस्य स्तनतटचन्दनस्यार्द्रतां निरस्यतास्यान्तरालनिसृतेन तनीयसानिलेन हृदयलक्ष्यदलनदक्षरतिसहचरसायकस्य दयितेन तरङ्गितदशनचन्द्रिकानि कानिचिदेतान्यक्षराणि कलकण्ठीकलान्यसृजत् । आर्य्य केन कारणेनैनं दासजनं कालहस्तादाच्छिद्यानन्तरं रागानिलचालितरणरणिकातरङ्गिण्यनङ्गसागरे किरसि । यथा ते चरणसरसिजरजःकणिका तथाहं चिन्तनीया । यदि दयास्ति ते ऽ च जने ऽ नन्यसाधारणः करणीयः स एष चरणाराधनक्रियायां । यदि च कन्यागाराध्यासने रहस्यक्षरणादनर्थ आसङ्क्येत नैतदस्ति । रक्तरा हि नस्तचसख्यश्चेट्यश्च यथा न कश्चिदेतज्ज्ञास्यति तथा यतिष्यन्त इति । स चाहं देहजेनाकर्णाकृष्टसायकासनेन चेतस्यतिनिर्द्दयं ताडितस्तत्कटाक्षकालायसनिगडगाढसंयतः किङ्कराननिहितदृष्टिरगादिषम् । यथेयं रथचरणजघना कथयति तथा चेन्नाचरेयं नयेत नक्रकेतनः क्षणेनैकेनाकीर्त्तनीयां दशां । जनश्चैनं सहानयानया कन्यकया कन्यागृहं हरिणनयनयेति । नीतश्चाहं निशाचरेण शारदजलधरजालकान्तिकन्यकानिकेतनं । तत्र च काञ्चित्कालकलां चन्द्राननानिदेशाच्चन्द्रशालैकदेशे तद्दर्शनचलितधृतिरतिष्ठम् । सा च स्वच्छन्दतः शयानाः करतललालससङ्घट्टनापनीतनिद्राः काश्चिदधिगतार्थाः सखी-

रकार्षीत् । अथागत्य ताम्बरणनिहितशिरसः क्षरदस्रकरालितेक्षणा निजशेखरकेसराग्रसंलग्नषट्चरणगणरणितसंशयितकलगिरः शनैरकथयन् । आर्य्ये यदत्यादित्यतेजसस्त एषा नयनलक्ष्यतां गता ततः कृतान्तेन गृहीता दत्ता चेयं चित्तजेन गरीयसा साक्षीकृत्य रागानलं तदनेनाश्चर्य्यरत्नेन नलिनाक्षस्य ते रत्नशैलशिलातलस्थिरं रागतरलेनालङ्क्रियतां हृदयं। ततः सखीजनेनातिदक्षिणेन दृढतरकृतस्नेहनिगडस्तया सन्नताङ्ग्या सङ्गन्त्यारंसिषि ॥

अथ कदाचिदायासितजायारहितचेतसि[1] लालसालिलङ्घनग्लानघनकेसरे राजदरण्यस्थलीललाटलीलायिततिलके ललितानङ्गराजाङ्गीकृतनिर्णिद्रकर्णिकाकाञ्चनछत्रे दक्षिणदहनसारथियाहृतसहकारचञ्चलकलिके कालाण्डज[2]कण्ठरागरक्तरक्ताधरा[3]रतिरणाग्रसन्नाहशालिनि शालीनकन्यकान्तःकरणसङ्क्रान्तरागलङ्घितलज्जे दर्दुरगिरितटचन्दनाश्लेषशीतलानिलाचार्य्यदत्तनानालतानृत्तलीले काले कलिङ्गराजः सहाङ्गनाजनेन सह च तनयया सकलेन च नगरजनेन दशचीणि च दिनानि दिनकरकिरणजालालङ्घनीये रणदलिसङ्घलङ्घिततनतलताग्रकिशलयालीढसैकततटे तरलतरङ्गशीकरासारसङ्गशीतले सागरतीरकानने क्रीडारसजातासक्तिरासीत् । अथ

---

[1] This and such of the following compounds as are not epithets of the immediately succeeding terms are epithets of काले, (at the season) "when the hearts of those separated from their wives are distressed," &c.

[2] Kálándaja; literally, "black-bird:" here denotes the Indian cuckoo.

[3] रक्ताधरा, "a female chorister of heaven," a Kinnarí.

सन्ततगीतसङ्गीतसङ्गताङ्गनासहस्रभृङ्गारहेलानिरर्गलानङ्गसङ्घर्षहर्षितश्च रागतृष्णैकतन्त्रस्तत्र रन्ध्रेऽन्ध्रनाथेन जयसिंहेन सलिलतरणसाधनानीतेनानेकसंख्येनानीकेन द्रागागत्यागृह्यत सकलत्रः। सा चानीयत चासचञ्चलाक्षी दयिता नः सह सखीजनेन कनकलेखा। तदहं दाहेनानङ्गदहनजनितेनान्तरिताहारचिन्तश्चिन्तयन् दयितां गलितगात्रकान्तिरित्यतर्कयम्। गता सा कलिङ्गराजतनया जनित्रा जनयित्र्या च सहारिहस्तं। निरस्तधैर्य्यस्तां स राजा नियतं संजिघृक्षेत्[1]। तदसहा च सा सती गररसादिना सद्य सन्तिष्ठेत। तस्याञ्च तादृशीं दशां गतायां जनस्यास्यानन्यजेन हन्येत शरीरधारणासा का स्याद्गतिरिति। अत्रान्तरेऽन्ध्रनगरादागच्छन्नग्रजः कश्चिदैक्ष्यत। तेन चेयं कथा कथिता। यथा किल जयसिंहेनानेकनिकार[2]दत्तसङ्घर्षेण जिघांसितः[3] सकर्द्दनः कनकलेखादर्शनैधितेन रागेणारक्ष्यत। सा च दारिका यक्षेण केनचिदधिष्ठिता न तिष्ठत्यग्रे नरान्तरस्यायस्यति[4] च नरेन्द्र[5]सार्थसङ्ग्रहणेन तन्निराकरिष्यन् नरेन्द्रो न चास्तिसिद्धिरिति। तेन चाहं दर्शिताशः शङ्करनृत्तरङ्गदेशजातस्य जरत्सालस्य स्कन्ध-

---

[1] Third pers. sing. pot. mood desiderative of गृह, "to take," with सम् prefixed. The initial of the radical is changed to घ when the final is combined with the sign of the voice as क्ष.

[2] "Injury," "offence," अपकारः.

[3] Pass. part. of the desiderative voice of हन, "to kill," "intended to be put to death."

[4] The Raja.

[5] Narendra, in this place, means, "a sorcerer," "an exorciser."

रन्ध्रान्तर्जटाजालं निकृष्य तेन जटिलताङ्गतः कन्थाचीरसञ्च-यान्तरितसकलगात्रः कांश्चिच्छिष्यानग्रहीषं[1] तांश्चनानाश्चर्य्य-क्रियातिसंहिता[2]ज्जनादाकृष्टान्नचैलादित्यागान्नित्यहृष्टानका-र्षम् । अयासिषञ्च दिनैः कैश्चिदन्धनगरं तस्य नात्यासन्ने सलिलराशिसदृशस्य कलहंसगणदलितनलिनदलसंहतिग-लितकिञ्जल्कशकलशारस्य सारसश्रेणिशेखरस्य सरसस्तीरका-नने कृतनिकेतनः स्थितः । शिष्यजनकथितचित्रचेष्टाकृष्टस-कलनागरजनातिसन्धानदक्षः सन् दिशिदिशीत्यकीर्त्यं जनेन। य एष जरदरण्यस्थलीसरस्तीरे स्थण्डिलशायी यतिस्तस्य किल सकलानि रहस्यानि[3] सषडङ्गानि च छन्दांसि रसनाग्रे[4] सन्नि-हितान्यन्यानि च शास्त्राणि येन यानि न ज्ञायन्ते स तेषां तत्सकाशादर्थनिर्णयं करिष्यति। असत्येन नास्यास्यं संसृज्यते। सशरीरश्चैष दयाराशिः । एतत्सकाशादर्थग्रहेणाद्यचिरं चरि-तार्था दीक्षा । तच्चरणरजः कणैः कैश्चन शिरसि कीर्णैरनेक-स्यानेक आतङ्कश्चिरं चिकित्सकैरसंहार्य्यः संहृतस्तदङ्घ्रिक्षाल-नसलिलसेकैर्निष्कलकशिरसां नश्यन्ति क्षणेनैकेनाखिलनरे-न्द्रयत्नलङ्घिनश्चण्डतारा ग्रहा न तस्य शक्यं शक्तेरियत्ताज्ञानं। न चास्याहङ्कारकणिकेति । सा चेयं कथानेकजनास्यसञ्चा-

---

[1] First pers. sing. indef. præt. of ग्रह, "to take," the augment इ being made long.

[2] C. and E. have अतिसन्धित, which might be formed, although the more regular part. of धा is हित, making अतिसंहित, "deceived," "cheated."

[3] The Upanishads.

[4] A curious coincidence of phraseology, "he has all the Vedas on the tip of his tongue."

रिणी तस्य कनकलेखाधिष्ठानधनदाज्ञाकरनिराक्रियातिसक्त-चेतसः क्षत्रियस्याकर्षणायाशकत् स चाहरहरागत्यादरेणाति-गरीयसार्चयन्नर्थैश्च शिष्यान् संगृह्णन्नधिगतक्षणः कदाचित् कांक्षितार्थसार्थसाधनाय शनैरयाचिष्ट । ध्यानधीरस्थानद-र्शितज्ञानसन्निधिश्चैनं निरीक्ष्य निचाय्याकथयम्[1] । तात स्थान एष हि यत्नस्तस्य हि कन्यारत्नस्य सकलकल्याणलक्षणैकरा-शेरधिगतिः । क्षीरसागररशनालङ्कृतायाः गङ्गानदीसहस्रहा-रयष्टिराजितायाः धराङ्गनाया एवासादनाय साधनं । न च यक्षस्तदधिष्ठायी केनचिन्नरेन्द्रेण तस्या लीलाञ्चितनीलनी-रजदर्शनायाः दर्शनं सहते तदत्र सह्यन्तां चीण्यहानि यैरहं यतिष्येऽर्थस्यास्य साधनाय । तथादिष्टे च हृष्टे क्षितीशे गते निशि निशि निर्निशाकरार्च्चिषि निरन्धान्धकारकणनिकरनि-गीर्णदशदिशि निद्रानिगलितनिखिलजनदृशि निर्गत्य जल-तलनिलीनगाहनीयं नीरन्ध्रं कृच्छ्राच्छिद्रीकृतान्तरालं तदेकतः सरस्तटं तीर्थासन्निकृष्टं केनचित् खननसाधनेनाकार्षम् । घनशिलेष्टकाच्छन्नछिद्राननं तत्तीरदेशं जनैरशङ्कनीयं निश्चित्य दिनादिस्नाननिर्णिक्तगात्रश्च नक्षत्रसन्तानहारयष्ट्यग्रग्रथित-रत्नं क्षणदान्धकारगन्धहस्तिदारणैककेसरिणं कनकशैलशृङ्ग-रङ्गलास्यलीलानटं गगनसागरघनतरङ्गराजिलङ्घनैकनक्रं

[1] "Having considered." The commentator has निचाय्य, दृष्ट्वा, "having seen;" but as एनं निरीक्ष्य, "having looked at him," immediately precedes, the "seeing" here meant is that of reflexion. B. C. and D. have निश्चित्य ; A. E. and the commentary निचाय्य.

कार्य्याकार्य्यसाक्षिणं सहस्रार्च्चिषं सहस्राक्षदिगङ्गनारक्तचन्दनाङ्गरागायितकिरणजालं रक्तनीरजाञ्जलिनाराध्य निजनिकेतनं न्यभ्यशिश्रयम् ॥

याते च दिनचये ऽस्तगिरिशिखरगैरिकतटसाधारणच्छायातेजस्यचलराजकन्यकाकदर्थनायान्तरिक्षाख्येन शङ्करशरीरेण संसृष्टायाः सन्ध्याङ्गनायाः रक्तचन्दनचर्च्चितैकस्तनकलशदर्शनीये दिनाधिनाथे स जनाधिनाथश्चागत्य जनस्यास्य धरणिन्यस्तचरणनखकिरणाच्छादितकिरीटः कृताञ्जलिरतिष्ठत् । आदिष्टश्च दिष्ट्या दृष्टेष्टसिद्धिरिहजगति हि न निरीहदेहिनं श्रियः संश्रयन्ते । श्रेयांसि च सकलान्यनलसानां हस्ते नित्यसान्निध्यानि । यतस्ते साधीयसा सच्चरितेनानाकलितकलङ्केन चर्च्चितेनात्यादररचितेनाकृष्टचेतसा जनेनानेन सरस्तथा संस्कृतं यथेह ते ऽद्य सिद्धिःस्यात्। तदेतस्यां निशि गलदर्द्धायां गाहनीयं। गाहनानन्तरञ्च सलिलतले सततगतीनन्तः सञ्चारिणःसन्निगृह्य यथाशक्ति शय्या कार्य्या ततश्च तटस्खलितजलस्थगितजलजखण्डवलितदण्डकण्टकाग्रदलितदेहराजहंसत्रासजर्जररसितसन्दत्तकर्णस्य जनस्य क्षणादाकर्णनीयं जनिष्यते जलसङ्घातस्य किञ्चिदाररटितं शान्ते च तत्र सलिलरटिते क्लिन्नगात्रःकिञ्चिदारक्तदृष्टिर्येनाकारेण निर्य्यास्यसि निचाय्य तं निखिलजननेत्रानन्दकारिणं न स यक्षः शक्ष्यत्यग्रतः स्थितये स्थिरतरनिहितस्नेहशृङ्खलनिगडितं च कन्यकाहृदयं क्षणे-

---

[1] "A sound," "a noise," रसितः शब्दः·

नैकेनासहनीयदर्शनान्तरायं स्यात् । अस्याश्च धराङ्गनाया नात्याहतनिराकृतारिचक्रचक्रं करतलगतं चिन्तनीयं न तत्र संशयः । तच्चेदिच्छस्यनेकशास्त्रज्ञानधीरधिषणैरधिकृतैरितरैश्च हितैषिणैराकलय्य जालिकशतमानाय्यान्तरं नागरशतैर्यथेष्टहष्टान्तरालं सरः क्रियेत रक्षा च तीरात् चिंशद्दण्डान्तराले सैनिकजनेन सादरं रचनीया कस्तत्र तज्जानाति यच्छिद्रेणारयश्चिकीर्षन्तीति । तत्तस्य हृदयहारिजातं तदधिकृतैश्च तत्रकृत्ये रन्ध्रदर्शनसहैरिच्छां च राज्ञः कन्यकातिरागजनितां नितान्तनिश्चलां निश्चित्यार्थ एष न निषिद्धः । तथास्थितश्च तदासादनहढतराशयश्च स आख्यायत[1] । राजन्नत्र ते जनान्ते चिरं स्थितं । न चैकत्र चिरस्थानं नः शस्तं । कृतकृत्यश्चेह न तिष्ठामि यस्य ते राष्ट्रे ग्रासाद्ग्रासादितं तस्य ते किञ्चिदनाचर्य्यं कार्य्यं गतिरार्य्यगर्ह्येति । तत्रैतच्चिरस्थानस्य कारणं तच्चाद्य सिद्धं । गच्छ गृहान् यथार्हजलेन हृद्यगन्धेन स्नातः सितस्रगङ्गरागः शक्तिसहशेन दानेनाराधितधरणितलतैतिल[2]गणस्तिलस्नेहसिक्तयष्ट्यग्रग्रथितचैलाञ्चल[3]खण्डकाग्निशिखा-

---

[1] Third pers. sing. 1st præt. passive voice of ख्या, "to speak," "he was told or thus spoken to."

[2] Taitala is said to have for one sense that of "a divinity," तैतिलौ देवकलिङ्गौ; whence धरणितलतैतिल is equivalent to भूदेव, "a Brahman," "a god on earth."

[3] A. and C. have कार्त्तिकाग्निशिखा, "the flames of the fire of Kárttika,"—either the month, or of the divinity,—but in what sense is not explained. The other copies read as the text, and are intelligible: "The darkness of the night being dispelled by a thousand torches, (or lit.) by the thousand flames of fire from fragments of cloth fastened to the end of a stick which have been sprinkled with sesamum oil."

सहस्रग्रस्तनैशान्धकारराशिरागत्यार्थसिद्धये यतेथा[1] इति । स किल कृतज्ञतां दर्शयन्नसिद्धिरेषा सिद्धिर्यदसन्निधिरिहार्य्याणां कष्टा चेयं निःसङ्गता या निरागसं दासजनं त्याजयति न च निषेधनीया गरीयसां गिर इति स्नानाय गृहानयासीत् । अहञ्च निर्गत्य निर्जने निशीथे सरस्तीररन्ध्रनिलीनः सन्नीषच्छिद्रदत्तकर्णः स्थितः स्थिते चार्द्धरात्रे कृतयथादिष्टक्रियः स्थानस्थानरचितरक्षः स राजा जालिकजनानानीय निराकृतान्तःशल्यं शङ्काहीनः सरःसलिलं सलीलगतिरगाहत । गतश्च कीर्णकेशं संहतकर्णनासिकं सरसस्तलं हास्तिनं[2] नक्रलीलया नीरनिलीनया तं तथाशयानं कन्धरायां न्यग्रहीषम् । खरतरकालदण्डघट्टनातिचण्डैश्च करचरणघातैर्निर्दयदत्तनिग्रहः क्षणेनैकेनाजहात् स चेष्टां ततश्चाकृष्य तच्छरीरं तीरच्छिद्रे निधाय नीरान्निरयासिषम् । सद्यः सङ्गतानां च सैनिकानां तदत्यचित्रीयत[3]ाकारान्तरग्रहणं । गजस्कन्धगतः सितच्छत्रादिसकलराजचिह्नराजितश्चण्डतरदण्डिदण्डताडनत्रस्तजनदत्तान्तरया राजरथ्यया यातस्तां निशां नयनरसनिरस्तनिद्रारतिरनैषम् । नीते च जनस्याक्षिलक्षतां लाक्षारसदिग्धदिग्गजशिरः सदृक्षे शक्रदिगङ्गनारत्नादर्शेऽर्कचक्रे कृतकरणीयः

---

[1] Second pers. sing. pot. mood atm. pada of यत, "to make effort."

[2] "The depth of which was an elephant's stature," हास्तिनं हस्तिप्रमाणं. C. has हस्तिनक्रलीलया; and B. and D. probably intend the same, although they give erroneously हस्तिनकुलीलया.

[3] Third pers. sing. 1st præt. of a nominal verb, from चित्र, "wonderful," "the change of form caused the great wonder of the assembled troops."

किरणजालकरालरत्नराजिराजितराजार्हासनाध्यासी यथा सदृशाचारदर्शिनः शङ्कायन्त्रिताङ्गान् सन्निधिनिषादिनः सहायानगादिषम् दृश्यतां शक्तिरार्षो । यत्तस्य यत्नैरजेयस्येन्द्रियाणां संस्कारेण नीरजसा नीरजसान्निध्यशालिनि सहर्षालिनि सरसि सरसिजदलसन्निकाशछायस्याधिकतरदर्शनीयस्याकारान्तरस्य सिद्धिरासीत् । अद्य सकलनास्तिकानां[1] जायेत लज्जानतं शिरस्तदिदानीं चन्द्रशेखरनरकशासनसरसिजासनादीनां[2] त्रिदशेशानां स्थानान्यादररचितनृत्तगीताराधनानि क्रियन्तां ह्रियन्तां[3] च गृहादितः क्लेशनिरसनसहान्यर्थिसार्थैर्धनानीति । आश्चर्य्यरसातिरेकहृष्टहृष्टयस्ते जय जगदीश स्वतेजसातिशय्य दशदिशः स्थगयन्निजेन यशसादिराजयशांसि । इत्यसकृदाशास्याचरन् यथादिष्टाः क्रियाः स चाहं दयितायाः सखीं हृदयस्थानीयां शशाङ्कसेनां कन्यकां कदाचित् कार्य्यान्तरागतां रहस्याचक्षिषि । कच्चिदयं जनः कदाचिदासीदृष्ट इति । अथ सा हर्षकाष्ठाङ्कतेन हृदयेनेषदालक्ष्य दशनदीधितिलतां लीलालसं लासयन्ती ललिताञ्चितकरशाखान्तरितदन्तछदकिसलया हर्षजलक्लेदजर्जरनिरञ्जनेक्षणा रचिताञ्जलिर्नितरां जाने यदि न स्यादैन्द्रजालिकस्य जालं किञ्चि-

---

[1] The Nástikas, in Brahmanical phraseology, are Buddhists and Jains; both are probably intended.

[2] A rather singular enumeration of objects of veneration, Śiva, Yama, and Brahmá; but the orthodox divinities seem to have been neglected by the Raja just murdered, alluding no doubt to struggles between the parties, which we have reason to suppose were not unfrequent about this period.

[3] Third pers. plur. imp. passive voice of हृ, "to take."

देतादृशं । कथञ्चैतत्कथयेति स्नेहनिर्यन्त्रणं शनैरगादीत् । अहञ्चास्यै कार्त्स्न्येनाख्याय तदाननसङ्क्रान्तेन सन्देशेन सञ्जनय्य सहचर्य्यानिरतिशयं हृदयाह्लादं । ततश्चैतया दयितया निरर्गलीकृतातिसत्कृतकलिङ्गनाथन्यायदत्तया सङ्गत्यान्धकलिङ्गराज्यं कलिङ्गनाथे न्यासम् । तस्यास्यारिणा लिलङ्घयिषितस्याङ्गराजस्य साहय्यकायालघीयसा साधनेनागत्याच ते सखिजनसङ्गतस्य यादृच्छिकदर्शनानन्दराशिलङ्घितचेता जात इति तस्य तत् कौशलं स्मितज्योत्स्नाभिषिक्तदन्तच्छदः सह सुहृद्भिरभिनन्द्य चित्रमिदं महामुनेर्वृत्तमत्रैव खलु फलितमतिकष्टं तपस्तिष्ठतु तावन्नर्म्महर्षप्रकर्षस्पृशोः प्रज्ञासत्वयोर्दृष्टमिहस्वरूपमित्यभिधाय पुनरवतरतु भवानिति बहुश्रुते विश्रुते विकचराजीवसदृशं दृशं चिक्षेप देवो राजवाहनः सो ऽप्याचचक्षे ॥

इति श्री दण्डिना विरचिते दशकुमारचरिते मन्त्रगुप्तचरितं नाम सप्तम उच्छ्वासः

विश्रुतचरितं नामाष्टम उच्छ्वासः

देव मयापि परिभ्रमता विन्ध्याटव्यां को ऽपि कुमारः क्षुधा तृषा च क्लिश्यन्नक्लेशार्हः क्वचित्कूपाभ्याशे ऽष्टवर्षदेशीयो दृष्टः स च त्रासगद्गदमवदत् । महाभाग क्लिष्टस्य मे क्रियतामार्य्य

साहाय्यकं। अस्य हि मे प्राणापहारिणीं पिपासां प्रतिकर्तुमु-
दकमुदञ्चन्निह कूपे को ऽपि निष्कलः[1] ममैकशरणभूतः पतितः
तमलमस्मि नाहमुद्धर्तुमिति। अथाहमभ्येत्य व्रतत्या कया-
पि बद्धमुत्तार्य्य तञ्च बालं वंशनालीमुखोद्धृताभिरद्भिः फलैश्च
पञ्चषैः शरक्षेपोच्छ्रितस्य लिकुच[2]वृक्षस्य शिखरात्पाषाण-
पातितैः प्रत्यानीतप्राणवृत्तिमापद्य तरुतलनिषसस्तं जरन्त-
मब्रवम्। तात क एष बालः को वा भवान् कथञ्चेयमाप-
दापन्नेति। सोऽश्रुगद्गदमगदत् श्रूयतां महाभाग॥

विदर्भो नाम जनपदस्तस्मिन् भोज[3]वंशभूषणमंशावतार इव
धर्म्मस्यातिसत्वः सत्यवादी वदान्यो विनीतो विनेता प्रजानां
रञ्जितभृत्यः कीर्त्तिमानुदग्रो मूर्त्तिबुद्धिभ्यामुत्थान[4]शीलः शा-
स्त्रप्रमाणकः शक्यभव्यकल्यारम्भी सम्भावयिता बुद्धान् प्रभा-
वयिता सेवकानुद्भावयिता बन्धून् न्यग्भावयिता शत्रूनसम्ब-
द्धप्रलापेष्वदत्तकर्णः कदाचिदप्यवितृष्णो गुणेष्वतिनदीष्णः[5]
कलासु नेदिष्ठो धर्म्मार्थसंहितासु स्वल्पेऽपि सुकृते सुतरां
प्रत्युपकर्त्ता प्रत्यवेक्षिता कोशवाहनयोर्यत्नेन परीक्षिता सर्व्वा-
ध्यक्षाणामुत्साहयिता कृतकर्म्मणामनुरूपैर्दानमानैः सद्यः
प्रतिकर्त्ता दैवमानुषीणामापदां षाड्गुण्योपयोगनिपुणो मनु-

---

[1] In this place निष्कल means, "an old man."

[2] "A fruit-bearing tree," Artocarpus lacucha.

[3] "Of the race of Bhoja." One would infer from this that the work, or at least this chapter, was composed subsequent to Bhoja's death, unless the introduction of his name were meant as a compliment to the Raja.

[4] "Possessed of manly vigour or spirit," उत्थानःपौरुषे.

[5] "Skilful."

मार्गेण प्रणेता चातुर्वर्ण्यस्य पुण्यश्लोकः[1] पुण्यवर्म्मा नामासीत् । स पुण्यैःकर्म्मभिः प्राप्य[2] पुरुषायुषं पुनरपुण्येन प्रजानामगण्यतामरेषु[3]। तदनन्तरमनन्तवर्म्मा नाम तदायतिरवनिमध्यतिष्ठत् । स सर्व्वगुणैः समृद्धो ऽपि दैवाद्दण्डनीत्याम् नात्याद्दतो ऽभूत् तमेकदा रहसि वसुरक्षितो नाम मन्त्रिवृद्धः पितुरस्य बहुमतः प्रगल्भवागभाषत । तात सर्व्वैवात्मसम्पदभिजनात् प्रभृत्यन्यूनैवात्रभवति लक्ष्यते बुद्धिश्च निसर्गपट्वी[4] कलासु नृत्तगीतादिषु चित्रेषु च काव्यविस्तरेषु प्राप्तविस्तारा तवेतरेभ्यः प्रतिविशिष्यते । तथाप्यसावप्रतिपद्यात्मसंस्कारमर्थशास्त्रेष्वनग्निशोधितेव हेमजातिर्नातिभाति बुद्धिः। बुद्धिहीनो हि भूभृदत्युच्छ्रितो ऽपि परैरध्यारुह्यमाणमात्मानं न चेतयते न च शक्तः साध्यं साधनं वा विभज्य वर्त्तितुम् । अयथावृत्तश्च कर्म्मसु प्रतिहन्यमानः स्वैः परैश्च परिभूयते । न चावज्ञातस्याज्ञा प्रभवति प्रजानां योगक्षेमाराधनाय । अतिक्रान्तशासनाश्च प्रजा यत्किञ्चनवादिन्यो यथाकथञ्चिद्वर्त्तिन्यः सर्व्वाः स्थितीः सङ्किरेयुः निर्मर्य्यादश्च लोको लोकादितो ऽमुतश्च स्वामिनमात्मानञ्च भ्रंशयेत् । आगमदीपदृष्टेन खल्वध्वना सुखेन वर्त्तते लोकयात्रा । दिव्यं हि चक्षुर्भूतभवद्भविष्यत्सुव्यवहितविप्रकृष्टादिषु च विषयेषु शास्त्रं नामाप्र-

---

[1] "Of virtuous reputation," यशसि श्लोकः. It is hence a denominative also of king Nala.

[2] Indeclinable part. pass. "having lived."

[3] Third pers. sing., 1st præt. pass. voice, "he was enumerated among the immortals."

[4] "Naturally inclined or addicted to," from पद्व, "a road," निसर्गपद्वः, "that which follows nature."

तिहतवृत्तिस्तेन हीनः सतोरप्यायतविशालयोर्लोचनयोरन्ध एव जन्तुरर्थदर्शनेष्वसामर्थ्यात्। अतो विहाय वाह्यविद्यास्वभिषङ्गमागमयस्व दण्डनीतिं कुलविद्यां तदर्थानुष्ठानेन चावर्ज्जितशक्तिसिद्धिरस्खलितशासनः शाधि[1] चिरमुदधिमेखलामुर्व्वीमिति। एतदाकर्ण्य स्थान एव गुरुभिरनुशिष्टं तथा क्रियत इत्यन्तःपुरमविशत्। ताञ्च वार्त्तां पार्थिवेन प्रमदासन्निधौ प्रसङ्गेनोदीरितामुपनिशम्य समीपोपविष्टः चित्तानुवृत्तिकुशलः प्रसादवित्तो गीतनृत्तवादित्रादिष्ववाह्यो वाह्यनारीपरायणः पटुरयन्त्रितमुखो बहुभङ्गि[2]विशारदः परमर्मान्वेषणपरः परिहासयिता परिवादरुचिः पैशुन्यपण्डितः सचिवमण्डलादप्युत्कोचहारी सकलदुर्नयोपाध्यायः कामतन्त्रकर्णधारः कुमारसेवको विहारभद्रो नाम स्मितपूर्व्वं व्यज्ञापयत्। देव दैवानुग्रहेण यदि कश्चिद्राजजनं भवति विभूतेस्तमकस्मादुच्चावचैरुपप्रलोभनैः कदर्थयन्तः स्वार्थं साधयन्ति धूर्त्ताः। तथाहि। केचित्प्रेत्य किल लभ्यैरभ्युदयातिशयैराशामुत्पाद्य मुण्डयित्वा शिरो बध्वा दर्भरज्जुभिरजिनेनाच्छाद्य नवनीतेनोपलिप्यानशनञ्चशाययित्वा सर्व्वस्वं स्वीकरिष्यन्ति तेभ्योऽपि घोरतराः पाषण्डिनः पुत्रदारशरीरजीवितान्यपि मोचयन्ति। यदि कश्चित्पटुजातीयो[3] नास्यै मृगतृष्णिकायै हस्तगतं त्यक्तुमि-

[1] Second pers. sing. imp. of शास, "to instruct," "to govern."

[2] "Equivoque," "double-entendre;" it also implies "irony," or "any covert or crooked speech."

[3] "Like a sensible or clever person." जानीयर्, affix, implying "resemblance or sort."

च्छेत् तमन्ये[1] परिवार्य्याहुः । एकामपि काकिणीं कार्षापणल-
क्षमापादयेम शस्त्राहते सर्व्वशत्रून् घातयेम एकशरीरमात्रमपि
मर्त्त्यं चक्रवर्त्तिनं विदधीमहि[2] यद्यस्मदुद्दिष्टेन मार्गेण चर्य्येत
इति । स पुनरिमान् प्रत्याह । कोऽसौ मार्ग इति । पुनरिमे
ब्रुवते । ननु चतस्रो राजविद्यास्त्रयीवार्त्तान्वीक्षिकीदण्डनी-
तिरिति[3] तासु तिस्रस्त्रयीवार्त्तान्वीक्षक्यो महत्यो मन्दफलाश्च
तास्तावदासतां[4] । अधीष्व तावद्दण्डनीतिमियमिदानीमाचा-
र्य्यविष्णुगुप्तेन[5] मौर्य्यार्थे षड्भिः श्लोकसहस्रैः संक्षिप्ता सैवेय-
मधीत्य सम्यगनुष्ठीयमाणा यथोक्तकर्म्मक्षमेति स तथेत्यधीते
शृणोति च तत्रैव जरां गच्छति । तत्तु किल शास्त्रं शास्त्रा-
न्तरानुबन्धि सर्व्वमेव वाङ्मयमविदित्वा न तत्वतोऽधिगंस्यते ।
भवतु कालेन बहुनाल्पेन वा तदर्थाधिगतिः । अधिगतशा-
स्त्रेण चादावेव पुत्रदारमपि न विश्वास्यं । आत्मकुक्षेरपि कृते
तण्डुलैरियद्भिरियानोदनः सम्पद्यत इयतश्चौदनस्य पाकायै-

---

1 "He can convert a cowri—the shell used as coin—into a hundred thousand kárshápaňas, measures of gold." "These are the alchemists, so they profess to multiply money indefinitely, to kill without weapons," *i.e.* by charms, and to secure imperial power.

2 First pers. plur. pot. mood atm. pada of धा, "to hold," third conj. with वि prefixed, "to form," "to regulate."

3 The four sciences of Princes are "the three vedas," the Puráňas (Várttá), Logic, and Policy.

4 Third pers. plur. imper. atm. pada of आस, "to sit," 2d conj. "let them be," "let them be neglected."

5 Vishňugupta is the same as Chánakya, the preceptor of Maurya, or of Chandragupta of the Maurya dynasty. See the Mudrá Rákshasa: he is the reputed author of a work on Níti, which is here said to contain six thousand stanzas: at present fragments only are procurable.

तावदिन्धनं पर्य्याप्तमिति मानोन्मानपूर्व्वकं देयं । उत्थितेन राज्ञा क्षालिते मुखे मुष्टिमर्द्धमुष्टिं वाभ्यान्तरीकृत्य कृत्स्नमायव्ययजातमह्नः प्रथमेऽष्टमे भागे श्रोतव्यं । शृखत एवास्य द्विगुणमपहरन्ति तेऽध्यक्षधूर्त्ताश्चत्वारिंशतं चाणक्योपदिष्टानाहरणोपायान् सहस्राध्यात्मबुद्ध्यैव ते विकल्पयितारः । द्वितीयेऽन्योन्यं विवदमानानां प्रजानामाक्रोशैर्दह्यमानकर्णः कष्टञ्जीवति। तत्रापि प्राड्विवाकादयः स्वेच्छया जयपराजयौ विदधानाः पापेनाकीर्त्त्या च भर्त्तारमात्मनश्चार्थैर्योजयन्ति । तृतीये स्नातुं भोक्तुञ्च लभते भुक्तस्य च यावदन्धः परिणामस्तावदस्य विषभयं न शाम्यत्येव भुक्त्या। चतुर्थे हिरण्यप्रतिग्रहाय हस्तं प्रसारयन्नेवोत्तिष्ठति । पञ्चमे मन्त्रिचिन्तया महान्तमायासमनुभवति । तत्रापि मन्त्रिणो मध्यस्था इवान्योन्यं मिथःसम्भूय दोषगुणैर्दूतचारवाक्यानि शक्याशक्यतां देशकालकार्य्यावस्थाश्च स्वेच्छया विपरिवर्त्तयन्तः स्वपरमित्रमण्डलान्युपजीवन्ति वाह्याभ्यन्तरांश्चश्चकोपान् गूढमुत्पाद्य प्रकाशं प्रशमयन्त स्वस्वामिनमवशमवगृह्णन्ति । षष्ठे स्वैरविहारो मन्त्रो वा सेव्यः सोऽस्यैतावान् स्वैरविहारकालो यस्य तिस्रस्त्रिपादोत्तरनाडिका[2] । सप्तमे च तुरङ्गबलप्रत्यवेक्षण-

---

[1] Here follows a satirical description of the appropriation of the royal day and night, divided each into eight portions. A more grave account of them is to be found in the books of law, as the Mitakshara. See also Vikramorvasí, Act 2. Scene 1.

[2] A Nádiká is twenty-four minutes. The whole time that the prince has to amuse himself in, if he chuses, is three Nádikás and three quarters, or, in English time, an hour and a half.

प्रयासः[1]। अष्टमेऽस्य सेनापतिसखस्य विक्रमचिन्ताक्लेशः। पुनरुपास्यैव सन्ध्यां प्रथमे रात्रिविभागे गूढपुरुषा द्रष्टव्यास्तन्मुखेन चातिनृशंसाः शस्त्राग्निरस[2]प्रणिधयोऽनुष्ठेयाः। द्वितीये भोजनानन्तरं श्रोत्रिय इव स्वाध्यायमारभते। तृतीये तूर्य्य[3]घोषेण संविष्टश्चतुर्थपञ्चमौ शयीत किल कथमिवास्याजस्रचिन्तायाः सविह्वलमनसो वराकस्य निद्रासुखमुपनमेत्। पुनः षष्ठे शास्त्रचिन्ताकार्य्यचिन्तारम्भः सप्तमे तु मन्त्रग्रहो दूतादिप्रेषणानि च दूताश्च नामोभयचप्रियाख्यानलब्धानर्थान् वीतशुल्कबाधवर्त्मनि बणिज्यया वर्द्धयन्तः कार्य्यमविद्यमानमपि लेशेनोत्पाद्यानवरतं भ्रमन्ति। अष्टमे पुरोहितादयोऽभ्येत्यैनमाहुः। अद्य दृष्टो दुःस्वप्नो दुःस्थिता ग्रहाः शकुनानि चाशुभानि शान्तयः क्रियन्तां सर्व्वमस्तु सौवर्णमेव होमसाधनं। एवंसति कर्म्म गुणवद् भवति ब्रह्मकल्पा इमे ब्राह्मणाः कृतमेभिः स्वस्त्ययनं कल्याणतरं भवति ते चामी कष्टदारिद्र्या बह्वपत्या यज्वानो वीर्य्यवन्तश्च अद्याप्यप्राप्तप्रतिग्रहा दत्तञ्चैभ्यः स्वर्ग्यमायुष्यमरिष्टनाशनञ्च भवतीति। बहु बहु दापयित्वा तन्मुखेन स्वयमुपांशु भक्षयन्ति। तदेवमहर्न्निशमविहितसुखलेशमायासबहुलमविरलकदर्थनञ्च नयतो नयज्ञस्यास्ता[4]ञ्चक्रवर्त्तिता स्वमण्डलमात्रमपि दूरा-

[1] In the eighth watch the Raja is to hold a military council.

[2] "Poison."

[3] In the third watch of the night, after being serenaded with musical instruments, the Raja may retire to rest, and sleep for the next two watches.

[4] Third pers. sing imp. of आस, "to sit," "to remain." आस्ताञ्चक्रवर्त्तिता, "royalty may be or is."

रक्षम्भवेत्। शास्त्रज्ञसमाज्ञातो हि यद्ददाति यन्मानयति यत्प्रियम्ब्रवीति तत्सर्व्वमतिसन्धातुमित्यविश्वासो ऽविश्वास्यता हि जन्मभूमिरलक्ष्म्या यावता च नयेन विना लोकयात्रा स लोकत एव सिद्धः न तत्र शास्त्रेणार्थः। [1] स्तनन्धयो ऽपि हि तैस्तैरुपायैः स्तनपानं जनन्या लिप्सते। तदपास्यातियन्त्रणामनुभूयन्तां यथेष्टमिन्द्रियसुखानि। ये ऽप्युपदिशन्ति। एवमिन्द्रियाणि जेतव्यानि। एवमरिषड्वर्गस्त्याज्यः [2] सामादिरुपापवर्गः स्वेषु परेषु चाजस्रं प्रयोज्यः। सन्धिविग्रहचिन्तयैव नेयः कालः स्वल्पो ऽपि सुखावकाशो न देय इति। तैरप्येभिर्मन्त्रिवकैर्युष्मतश्चौर्य्यार्जितं धनं दासीगृहेष्वेव भुज्यते। के चैते वराका ये ऽपि मतिकर्क्कशास्तन्त्रकारा शुक्राङ्गिरसविशालाक्षबाहुदन्तिपुत्रपराशरप्रभृतयस्तैः [3] किमरिषड्वर्गो जितः। कृतं वा तैःशास्त्रानुष्ठानं तैरपि हि प्रारब्धेषु कार्य्येषु दृष्टे सिद्ध्यसिद्धी। पठन्तश्चापठद्भिरतिसन्धीयमाना बहवः। नन्विदमुपपन्नं देवस्य यदुत सर्व्वलोकवन्द्या जातिरयातयामं वयो दर्शनीयं वपुरपरिमाणा विभूतिस्तत्सर्व्वं सर्व्वाविश्वासहेतुना सुखोप-

---

[1] B. and D. read नयेन विना न याति लोकयात्रा; C. has समयेन विना लोकयात्रा. The reading of the text is sufficient: "As long as the course of the world (proceeds) without policy, the object (of government) seems to be accomplished through the world (by ordinary means, or or of its own nature, or spontaneously) not by the Sástras."

[2] The class of six "moral" foes comprises desire, wrath, covetousness, folly, inebriety, and malignity.

[3] Sukra is the teacher of the Asuras; Angiras of the Brahmans: Parásara is also a well-known teacher: the other two seem put down at random; Visáláksha being either Siva or Garuda, and Báhudanti putra being Jayadatta the son of Indra.

भोगप्रतिबन्धिना बहुमार्गविकल्पनात्सर्व्वकार्य्येष्वमुक्तसंशयेन तन्त्रावा[1]येनैव मा कृ[2]था मा कृथा वृथा सन्ति हि ते दन्तिनां दशसहस्राणि हयानां लक्षत्रयमनन्तपादातमपि पूर्णान्येव हेमरत्नैः कोषगृहाणि सर्व्वश्चेषजीवलोक समग्रमपि युगसहस्रं भुञ्जानो न ते कोष्ठागाराणि रेचयि[3]ष्यन्ति। किमिदमपर्य्याप्तं यदन्यार्ज्जनायासः प्रस्तूयते जीवितं हि नाम जन्मवतां चतुःपञ्चान्यहानि तत्रापि भोगयोग्यमल्पाल्पं वयःखण्डमपण्डिताः पुनरर्ज्जयन्त एव ध्वंसन्ते नार्ज्जितस्य वस्तुनो लवमप्यास्वादयितुमीहन्ते। किम्बहुना राज्यभारं भारक्षमेष्वन्तरङ्गभूतेषु भक्तिमत्सु समर्प्योप्सरसः प्रतिरूपाभिरन्तःपुरिकाभीरममाणो गीतसङ्गीतपानगोष्ठीश्च यथर्त्तु बध्नन् यथार्थं कुरु शरीरलाभमिति पञ्चाङ्गीस्पृष्टभूमिरञ्जलिचुम्बितचूडश्चिरमशेत। प्राहसीच्च प्रीतिफुल्ललोचनोऽन्तःपुरप्रमदाजनः जननाथश्च सस्मितमुत्तिष्ठन्ननु हितोपदेशाद्गुरवो भवन्त किमिति गुरुत्वविपरीतमनुष्ठितमिति तमुत्थाप्य क्रीडानिर्भरमतिष्ठत् ॥

अथैतेषु दिनेषु भूयो भूयः प्रस्तुतेऽर्थे प्रेर्य्यमाणो मन्त्रिवृन्देन वचसाभ्युपेत्य मनसैवाचिन्तज्ञ इत्यवज्ञातवान्। अथैवं मन्त्रिणो मनस्यभूत्। अहो मे मोहाद्बालिश्यमनुचितेऽर्थे चोदय-

---

1 "From anxious care of the kingdom," or "fear of enemies," आवापस्त्वरिचिन्तनं.

2 Second pers. sing. indef. præt. of कृ, "to do;" used imperatively with मा, and therefore rejecting the augment.

3 Third pers. plur. indef. future of the causal of रिच, "to be empty," "will not exhaust or cause to be empty."

न्नक्षिगतो ऽहमस्य हास्यो जातः स्पष्टमस्य चेष्टा नामायथापूर्व्वं तथा हि न मां स्निग्धं पश्यति न स्मितपूर्व्वं भाषते न रहस्यानि विवृणोति न हस्ते स्पृशति न व्यसनेष्वनुकम्पते नोत्सवेष्वनुगृह्णाति न विलोभनवस्तूनि प्रेषयति न मत्सुकृतानि प्रगणयति न मे गृहवार्त्तां पृच्छति न मत्पक्षान् प्रत्यवेक्षते न मामासन्नकार्य्येष्वभ्यन्तरीकरोति न मामन्तःपुरं प्रवेशयति। अपि च मामनर्हेषु कर्म्मसु नियुंक्ते मदासनमन्यैरवष्टभ्यामानमनुजानाति मद्वैरिषु विश्रम्भं दर्शयति मदुक्तस्योत्तरं न ददाति मत्समानदोषान्विगर्हयति मर्मणि मामुपहसति स्वमतमपि मया वर्ण्यमानं प्रत्यवक्षिपति महार्हाणि वस्तूनि मत्प्रहितानि नाभिनन्दति नयज्ञानां स्खलितानि मत्समक्षं मूर्खैरुद्घोषयति। सत्यमाह चाणक्यः। चित्तज्ञानानुवर्त्तिनो ऽनर्था अपि प्रिया स्युः दक्षिणा अपि तद्भाववहिः कृता द्वेष्या भवेयुरिति। तथापि का गतिरविनीतो ऽपि न परित्याज्यः पितृपैतामहैरस्मादृशैरयमधिपतिरपरित्यजन्तो ऽपि कमुपकारमश्रूयमाणवाचः कुर्म्मः। सर्व्वथा नयज्ञस्य वसन्तभानोरश्मकेन्द्रस्य हस्ते राज्यमिदं पतितमपि नामापदो भाविन्यः प्रकृतिस्थमेनमापादयेयुः। अनर्थेषु सुलभव्यलीकेषु क्वचिदुत्पन्नो-

---

[1] "Disliked," "hateful." E. adds अर्थीव, "like a petitioner," instead of अनुचित. It reads also अरुचित, "disagreeable."

[2] B. D. have अस्माकमुपसेवितमिदं राजकुलमीदृशश्चायमधिपतिः, but it is not necessary. The sense without it, "This prince, although ungracious, is not to be abandoned by such as we are, descended from such progenitors."

ऽपि द्वेषः सद्वृत्तमस्मै न रोचयेत्। भवतु भविता तावदनर्थः स्तम्भितपिशुनजिह्वो यथाकथञ्चिदभ्रष्टपदस्तिष्ठेयमिति ॥

एवं गते मन्त्रिणि राजनि च कामवृत्ते चन्द्रपालितो नामाश्मकेन्द्रामात्यस्येन्द्रपालितस्य सूनुरसद्वृत्तः पितृनिर्वासितो नाम भूत्वा बहुभिश्चारणैर्बह्वीभिरनल्पकौशलाभिः शिल्पकारिणीभिरनेकछन्नकिङ्करैश्च गूढपुरुषैः परिवृतोऽभ्येत्य विविधाभिः क्रीडाभि र्विहारभद्रमात्मसादकरोत्। अमुना चैव सङ्क्रमेण राजन्यास्पदमलभत। लब्धरन्ध्रश्च स यद्यद्व्यसनमारभते तत्तथेत्यवर्णयत्। देव यथा मृगया ह्यौपकारिकी न तथान्यत्। अत्र हि व्यायामोत्कर्षादापत्सूपकर्त्ता दीर्घाध्वलङ्घनक्षमो जङ्घाजवः कफापचयादारोग्यैकमूलमाशयाग्निदीप्तिर्मेदोपकर्षादङ्गानां स्थैर्य्यकार्कश्यातिलाघवादीनि शीतोष्णवातवर्षक्षुत्पिपासासहत्वं सत्वानामवस्थान्तरेषु चित्तचेष्टितज्ञानं हरिणगवलगवयादि बधेन शस्यलोपप्रतिक्रिया वृकव्याघ्रादिघातेन स्थलपथशल्यशोधनं। शैलाटवीप्रदेशानां विविधकर्म्मक्षमानामालोचनमाटविकवर्गविश्रम्भनमुत्साहशक्तिसन्धुक्षणेन प्रत्यनीकचिचासनमिति बहुतमाः गुणाः। द्यूतेऽपि द्रव्यराशेस्तृणवत्त्यागादनुपमानमाशयौदार्य्यं जयपराजयानवस्थानाद्धर्षविषादयोरविधेयत्वं पौरुषैकनिमित्तस्यामर्षस्य वृद्धिरक्षहस्तभूम्यादिगोचराणामत्यन्तदुरुपलक्ष्याणां कूटकर्म्मणामु-

---

[1] He vindicates the seven vices of princes; viz. "women, gambling, hunting, drinking, violence in word or deed, and seizure of private property," not exactly in the same order.

[2] "The appetite," "the fire of the stomach."

पलक्षणादनन्तबुद्धिनैपुण्यं । एकविषयोपसंहाराच्चित्तस्यातिचित्रमैकाग्र्यमध्यवसायस्सहचरेषु साहसेष्वभिरतिरतिकर्कशपुरुषप्रतिसंसर्गादनन्यधर्षणीयतामानावधारणमकृपणं च शरीरयापनमिति । उत्तमाङ्गनोपभोगेऽप्यर्थधर्म्मयोः सफलीकरणं पुष्कलः पुरुषाभिमानः भावज्ञानकौशलमलोभक्लिष्टमाचेष्टितमखिलासु कलासु वैचक्षण्यमलब्धोपलब्धिलब्धानुरक्षणरक्षितोपभोगभुक्तानुसन्धानरुष्टानुनयादिष्वजस्रमभ्युपायरचनया बुद्धिवाचोः पाटवमुत्कृष्टेष्टशरीरसंस्कारात् सुभगवेषतयालोकसम्भावनीयता परं सुहृत्प्रियत्वं गरीयसी परिजनव्यपेक्षा स्मितपूर्व्वाभिभाषित्वमुद्रिक्तसत्वता दाक्षिण्यानुवर्त्तनमपत्योत्पादनेनोभयलोकश्रेयस्करत्वमिति । पानेऽपि नानाविधरोगभङ्गपटीयसामासवानामासेवनात्स्पृहणीयवयोव्यवस्थापनमहङ्कारप्रकर्षादशेषदुःखतिरस्करणमङ्गजरागदीपनादङ्गनोपभोगशक्तिसन्धुक्षणमपराधप्रमार्ज्जनात्मानशल्योन्मार्ज्जनमश्राव्यशंसिभिरनर्गलप्रलापैर्विश्वासोपवृंहणं मत्सराननुबन्धादानन्दैकतानता शब्दादीनामिन्द्रियार्थानां सातत्येनानुभवः संविभागशीलतया सुहृद्वर्गसंवर्द्धणमनुपमानमङ्गलावण्यमनुत्तराणि विलसितानि भयार्त्तिनिराकरणाच्च साङ्ग्रामिकत्वमिति । वाक्पारुष्यं दण्डो दारुणो दूषणानि चार्थानामेव यथावकाशमौपकारिकाणि न हि मुनिरिव नरपतिरुपशमरतिरभिभवितुमरिकुलमलमवलंवितुञ्च लोकतन्त्रमिति । असावपि गुरूपदेशमिवात्यादरेण तस्य मत-

[1] "Close attention," "singleness of purpose or object."

मन्ववर्त्तत। तच्छीलानुसारिण्यश्च प्रकृतयो[1] विशृङ्खलमसेवन्त व्यसनानि सर्व्वश्च समानदोषतया न कस्यचिच्छिद्रान्वेषणायायतिष्ट समानभर्त्तृ[2]प्रकृतयस्तन्त्राध्यक्षाः स्वानि कर्म्मफलान्यभक्षयन्। ततः क्रमादायद्वाराणि व्यशीर्य्यन्त व्ययमुखानि विटविधेयतया विभोऽहरहर्व्यवर्द्धन्त सामन्तपौरजानपदमुख्याश्च समानशीलतयोपारूढविश्रम्भेण राज्ञा सजानयः पानगोष्ठीष्वभ्यन्तरीकृताः स्वं स्वमाचारमत्याचरिषुः। तदङ्गनासुचानेकापदेशपूर्व्वमपाचरन्नरेन्द्रस्तदन्तः पुरेषु चामी भिन्नवृत्तेषु मन्दत्रासा बहुसुखैरवर्त्तन्त सर्व्वश्चकुलाङ्गनाजनः पांसुलजनभङ्गिभाषणरतो भग्नचारित्रयन्त्रणस्तृणायापि न गणयित्वा भर्त्तॄन् धातृ[3]गणमन्त्रणान्यशृणोत्। तन्मूलाश्च कलहा सामर्षाणामुद्भवन्। अहन्यन्त दुर्व्वला बलिभिः। अपहृतानि धनवतां धनानि तस्करादिभिरपहृतपरिभूतयः प्रहताश्च पातकपथा हतबान्धवाः हृतवित्ता बधबन्धातुराश्च मुक्तकण्ठमाक्रोशन्नश्रुकण्ठ्यः प्रजाः दण्डश्चायथाप्रहितो भयक्रोधावजनयत्। कृशकुटुम्बेषु लोभः पदमधत्त विमानिताश्च तेजस्विनो मानेनादह्यन्त। तेषु तेषु चाकृत्येषु प्रासरन् परोपजापाः[4]। तदा च मृगयुवेषता मृगबाहुल्यवर्णनेनाद्रिद्रोणीरनपसारमार्गाः शुष्कतृणवंशगुल्माः प्रवेश्यद्वारतोऽग्निविसर्गैर्व्याघ्रादिबधं प्रोत्साह्य तन्मुखपातनैरिष्टकूपतृष्णोत्पातनेनातिदूरहारितानां

---

1 The different members of the state.

2 Tantra here implies "a kingdom."

3 One of its synonimes is, "a gallant," धाता जारे विधातरि, Ajayapála.

4 "Dissensions," उपजापो भेदः.

प्राणहारिभिः क्षुत्पिपासाभिवर्द्धनैस्तृणगुल्मगूढच्छन्नतटप्रदरपातहेतुभिर्विषममार्गप्रधावनैर्विषमुखीभिः क्षुरिकाभिश्चरणकण्टकोद्धरणैर्विष्वग्विसरविच्छिन्नानुयातृतयैकाकीकृतानां यथेष्टघातनैर्मृगदेहापराद्धैर्नामेषुमोक्षणैः सपणबन्धमधिरुह्यादिशृङ्गाणि दुरधिरोहाण्यनन्यलक्ष्यैः प्रभ्रंसनैरटविकच्छन्ना विपिनेषु विरलसैनिकानां प्रतिरोधनैरक्षद्यूतपक्षियुद्धयात्रोत्सवादिसङ्कुलेषु बलवदनुप्रवेशनैरितरेषां हिंसोत्पादनैर्गूढोत्पादितव्यलीकेभ्यो ऽप्रियाणि प्रकाशं लब्धासाक्षिषु तद्विख्यात्याकीर्त्तिगुप्तिहेतुभिः पराक्रमैः परकलत्रेषु सुहृत्त्वेनाभियोज्य जारान्भर्त्तृनुभयं वा प्रहृत्य तत्साहसोपन्यासयोग्यनारीहारितानां सङ्केतेषु प्रागुपनीय पश्चादभिद्रुत्याकीर्त्तनीयैः प्रमापणैरुपप्रलोभ्य विलप्रवेशनेषु निधानखननेषु मन्त्रसाधनेषु च विघ्नव्याजसाध्यैर्व्यापादनैर्मत्तगजाधिरोहणाय प्रेर्य्य प्रत्यवायनिर्वर्त्तनैर्व्यालहस्तिनं कोपयित्वा लक्षीकृतमुख्यमण्डलेष्वपक्रमणैर्दायाद्यर्थे विवदमानानुपांशु हत्वा प्रतिपक्षेष्वयशः पातनैः सामन्तपुरजनपदेष्वयथावृत्तानप्रकाशमभिप्रहृत्य तद्वैरि नाम घोषणैर्योग्याङ्गनाभिरहर्निशमभिरमय्य राजयक्ष्मोत्पादनैर्वस्त्राभरणमाल्याङ्गरागादिषु रसविधानकौशलैश्चिकित्सामुखेनामयवृंहणैरन्यैश्चाभ्युपायैरश्मकेन्द्रप्रयुक्तास्तीक्ष्णरसदादयः प्रक्षपितप्रवीरमनन्तवर्म्मकटकं जर्जरमकुर्व्वन् ॥

अथ वसन्तभानुर्भानुवर्म्माणं नाम वानवास्यां प्रोत्सा-

[1] Vánavási, a city in the south of India, the remains of which, in the Sunda district, were discovered by Colonel Colin Mackenzie. It is the Banavasi of Ptolemy.

ह्यानन्तवर्म्मणा व्यग्राहयत्[1] । तत्परामृष्टराष्ट्रपर्य्यन्तश्चानन्तवर्म्मा तमभियोक्तुं बलसमुत्थानमकरोत् । सर्व्वसामन्तेभ्यश्चाश्मकेन्द्रः प्रागुपेत्यास्य प्रियतरोऽभूत् । अपरेऽपि सामन्ताः समगंसत । गत्वा चाभ्यर्णे नर्म्मदारोधसि न्यविशत् । तस्मिंश्चावसरे महासामन्तस्य कुन्तल[2]पतेरवन्तिदेवस्यात्मनाटकीयां क्ष्मातलोर्व्वशीं नाम चन्द्रपालितादिभिरतिप्रशस्तनृत्तकौशलमाहूयानन्तवर्म्मा नृत्तमद्राक्षीदतिरक्तश्चभुक्तवानिमां वधूत्त[3]मामश्मकेन्द्रस्तु कुन्तलपतिमेकान्ते समभ्यधत्त । प्रमत्त एष राजा कलत्राणि नः परामृशति कियत्यवज्ञा सोढव्या मम शतमस्ति हस्तिनां पञ्चशतानि च ते तदावां सम्भूय मुरले[4]शं वीरसेनमृचीकेशमेकवीरं कोङ्कणपतिं कुमारगुप्तं साशिक्यनाथञ्च नागपालमुपजपा[5]वस्ते चावश्यमस्याविनयमसहमाना अस्मत्मतेनैवोपवर्त्तेरन् । अयञ्च वानवास्यः प्रियं मे

---

[1] Third pers. sing. 1st prœt. of the causal of ग्रह, "to take;" with वि prefixed, "to make war."

[2] Kuntala, a country in the south of India, usually placed to the south of the Tungabhadra river, but it must have extended formerly nearer to the Nerbudda.

[3] The reading of B. All the other copies have मधुमत्तां, which may be correct.

[4] With exception of Konkaña, or the Concan, the northern portion most probably, the names of the countries here specified are not identifiable with any modern appellations, nor have we anywhere else any clue to their position. Richika is probably the Rishika of the Puráñas, and Sásikya the country of the Śaśikas of the same. See Vishñu Puráña, 189, where the two terms occur as various readings. The Muralas have not been met with as far as I remember. We may safely infer from the context that these various tribes occupied the country between the Kuntalas and the Konkañas, or the Tungabhadra and the ghats on the south and west, and the Nerbudda on the north, spreading through the northern Mahratta country, the west of Hyderabad and Kandesh.

[5] First pers. sing. dual imp. of जप, "to speak inaudibly;" with उप prefixed, "to plot," as treason.

मित्रममुनैनं दुर्विनीतमग्रतो व्यतिषक्तं पृष्ठतः प्राहरेम कोषवाहनञ्च विभज्य गृह्णीम इति । हृष्टेन चामुनाभ्युपेते विंशति वरांशुकानां पञ्चविंशति काञ्चनकुङ्कुमकम्बलानां[1] प्राभृतीकृत्याप्तमुखेन तैः सामन्तैः सम्मन्त्र्य तानपि स्वमतावस्थापयत् । उत्तरेद्युस्तेषां सामन्तानां वानवास्यस्य चानन्तवर्म्मा नयद्वेषादामिषत्वमगमत्[2] । वसन्तभानुश्च तत्कोषवाहनमवशीर्णमात्माधिष्ठितमेव कृत्वा यथाप्रयासं यथाबलञ्च विभज्य गृह्णीत युष्मदनुज्ञया येन केनचिदंशेनाहं तुष्यामीति शाठ्यात्सर्व्वानुवर्त्ती तेनैवामिषेण निमित्तीकृतेनोत्पादितकलहः सर्व्वसामन्तानध्वंसयत् तदीयञ्च सर्व्वस्वं स्वयमेवाग्रसत् । वानावास्यं केनचिदंशेनानुगृह्य प्रत्यावृत्य सर्व्वमनन्तवर्म्मराज्यमात्मसादकरोत् ॥

अस्मिंश्चान्तरे मन्त्रिवृद्धो वसुरक्षितः कैश्चिन्मौलैः सम्भूय बालमेनं भास्करवर्म्माणमस्यैव ज्यायसीं भगिनीं त्रयोदशवर्षां मञ्जुवादिनीमनयोश्च मातरं महादेवीं वसुन्धरामादायापसर्पन्नापदोऽस्याभावितया दाहज्वरेण देहमजहात् । अस्मादृशैर्मित्रैस्तु नीत्वा माहिष्मतीं भर्त्तृद्वैमातुरायभ्रात्रेऽमित्रवर्म्मणे सापत्या देवी दर्शिताभूत् । ताञ्चार्य्यामनार्य्योऽसावन्यथाभ्यमन्यत निर्भर्त्सितश्च तया सुतमियमखण्डचारित्रा राज्यार्हं

---

[1] By the "blankets" are to be understood, the commentator says, Kashmir shawls. C. and E. have पलानां, as if they meant so many "palas," a certain weight of saffron and gold.

[2] "The condition of flesh." Anantavarmá, through neglect of policy, became the food or the prey of those princes, and of the king of Vanavási.

चिकीर्षति नैर्घृण्यात्तमेनं बालमजिघांसत्। इदं तु ज्ञात्वा देव्याहमाज्ञप्तस्तात नालीजङ्घ जीवतानेनार्भकेण यत्र क्वचिदबधायजीवञ्जीवेयञ्चेदहमप्येनमनुसरिष्यामि ज्ञापय मां क्षेमप्रवृत्तः स्ववार्त्तामिति। अहं तु सङ्कुले कथञ्चिदेनं निर्गमय्य विन्ध्याटवीं व्यगाहिषि। परिचारदुःस्थितञ्चैनमाश्वासयितुं घोषे क्वचिदहानि कानिचिद्विश्रमय्य तत्रापि राजपुरुषसम्पातभीतो दूरमपसरम्। तत्रास्य दारुणपिपासापीडितस्य वारि दातुकामः कूपेऽस्मिन्नपभ्रश्यपतितस्त्वयैवमनुगृहीतस्त्वमेवास्यातः शरणमेधि[1] विशरणस्य राजसूनोरित्यञ्जलिमबध्नात्। किमीया[2] जात्यास्य मातेत्यनुयुक्ते मयामुनोक्तं पाटलीपुत्रस्य बणिजो वैश्रवणस्य दुहितरि सागरदत्तायां कोशलेन्द्रात् कुसुमधन्वनोऽस्य माता जातेति यद्येवमेतन्मातुर्मेत्पितुश्चैको मातामह इति सस्नेहं तमहं सस्वजे वृद्धेनोक्तं सिन्धुदत्तपुत्राणां कतमस्ते पितेति सुश्रुत इत्युक्तो सोऽत्यहृष्यत। अहं तु तं नयावलिप्तमश्मकं नयेनैवोन्मूल्य बालमेनं पित्र्ये पदे प्रतिष्ठापयेयमिति प्रतिज्ञाय कथमस्यैनां क्षुधं क्षपयेयमित्यचिन्तयम्। तावदापतितौ च कस्यापि व्याधस्य त्रीनिषूनतीत्य द्वौ मृगौ स च व्याधस्तस्य हस्तादवशिष्टमिषुद्वयं कोद-

---

[1] Second pers. sing. imperative mood of अस, "to be."

[2] All the MSS. agree in reading this किमीया, a very unusual derivative of किम्, although it may be formed with the technical aff. छ, like तदीय, &c. It must be the nominative, agreeing with माता, "what like is his mother by birth or caste," जात्या, in the instrumental case.

ग्डञ्चाक्षिप्याबधिषम्। एकश्च सपत्राकृतो ऽन्यश्च निष्पत्राकृतो ऽपतत्[1]। तच्चैकं मृगं दत्वा मृगयवे ऽन्यस्यापलोमत्वचः क्लोमापोह्य निःकुलाकृत्य विकृत्योर्वस्थिग्रीवादि शूलाकृत्य दावाङ्गारेषु तप्तेनामिषेण तयोरात्मनश्च क्षुधमत्यतार्प्सम्[2]। एतस्मिन्कर्म्मणि मत्सौष्ठवेनातिहृष्टं किरातमस्मि पृष्टवान्। अयि जानासि माहिष्मतीवृत्तान्तमिति। असावाचष्ट तत्र व्याघ्रत्वचोहतीश्चविक्रीयाद्यैवागतः किं न जानासि प्रचण्डवर्म्मा नाम चण्डवर्म्मानुजो ऽमित्रवर्म्मदुहितरं मञ्जुवादिनीं विलुप्सुरभ्येतीति तेनोत्सवोत्तरा पुरी। अथ कर्णे जीर्णमब्रवम्। धूर्त्तो ऽमित्रवर्म्मा दुहितरि सम्यक् प्रतिपत्त्या मातरं विश्वास्य तन्मुखेन प्रत्याकृष्य बालकं जिघांसति। तत्प्रतिगत्य कुशलमस्य मद्वार्त्तां च देव्यै रहो निवेद्य पुनः कुमारः शार्दूलभक्षित इति प्रकाशमाक्रोशः कार्य्यः स दुर्म्मतिरन्तः प्रीतो वहिर्दुःखं दर्शयन् देवीमनुनेष्यति। पुनस्तया त्वन्मुखेन स वाच्यो यदपेक्षया त्वन्मतमत्यक्रमिषं सो ऽपि बालः पापेन मे परलोकमगात्। अथ तु त्वदादेशकारिण्येवमहं स तथोक्तः

---

[1] One pierced the animal to the feathered part, the other passed quite through and left the feathers behind; hence one is said to be सपत्राकृतः, and the other निष्पत्राकृतः.

[2] First pers. sing. indef. præt. of तृप, "to satisfy," which takes different forms. A. and E. have अतार्पम्, but this must be an error, for it could only be derived from तॄ, "to cross over," as analogous to कृ, "to make," अकार्षम्; but तॄ forms either अतारिषम् or अतार्षि. B. D. have अतक्षिपम्, from तक्ष, "to make thin or reduce," which is correct, although the application of the verb is somewhat strained. C., as if dissatisfied with both readings, substitutes अवाक्षिपम्, "I threw off or removed," 1st præt. of क्षिप, verb, 6th conjugation, with अव prefixed: the emendation is more violent than that adopted conjecturally in the text.

प्रीतिं प्रतिपद्याभिपत्स्यति । पुनरनेन वत्सनाभनाम्ना महाविषेण सन्नीय तोयं तत्र मालां मज्जयित्वा तया सवक्षसि मुखे च हन्तव्यः स एवायमसिप्रहारः पापीयसस्तव भवतु यद्यस्मि पतिव्रता पुनरनेनागदेन सङ्गमितेऽम्भसि तां मालां मज्जयित्वा स्वदुहित्रे देया मृते तु तस्मिंस्तस्यां च निर्विकारायां सत्यां सतीत्येवैनां प्रकृतयोऽनुवर्त्तिष्यन्ते पुनः प्रचण्डवर्म्मणे सन्देश्यमनाथकमिदं राज्यमनेनैव सह बालिकेयं स्वीकार्य्येति तावदावां कापालिकवेषछन्नौ देव्यैव दीयमानभिक्षौ पुराद्बहिरुपश्मशानं वत्स्यावः पुनरार्य्यप्रायान् पौरवृद्धानाप्तांश्च मन्त्रिवृद्धानेकान्ते ब्रवीतु देवी स्वप्नेऽद्य मे देव्या विन्ध्यवासिन्या कृतः प्रसादोऽद्यचतुर्थेऽहनि प्रचण्डवर्म्मा मरिष्यति पञ्चमेऽहनि रेवातटवर्त्तिनि मङ्गवने परीक्ष्य वैजन्यं जनेषु निर्गतेषु कपाटमुद्घाट्य त्वत्सुतेन सह कोऽपि द्विजकुमारो निर्य्यास्यति स राज्यमिदमनुपाल्य बालं ते प्रतिष्ठापयिष्यति । स खलु बालो मया व्याघ्रीरूपया तिरस्कृत्य स्थापितः । सा चेयं वत्सा मञ्जुवादिनी तस्य द्विजातिदारकस्य दारत्वेनैवकल्पितेति तदेतदतिरहस्यं युष्मास्वेव गुप्तं तिष्ठतु यावदेतदुपपत्स्यत इति स साम्प्रतमतिप्रीतः प्रयातोऽर्थश्चायं यथाचिन्तितमनुष्ठितोऽभूत् । प्रतिदिशञ्च लोकवादः प्रासर्प्पत् । अहो माहात्म्यं पतिव्रतानामसिप्रहार एव हि स मालाप्रहारस्तस्मिञ्जातो । न शक्यमुपधियुक्तमेतत्कर्म्मेति वक्तुं यतस्तदेव दत्तं दाम दुहित्रे स्तनमण्डनमेव तस्यै जातं न मृत्युः । योऽस्याः पतिव्रतायाः शासनमतिवर्त्तते स भस्मैव भवेदिति ॥

अथ महाव्रतिवेषेण[1] माञ्च पुत्रञ्च भिक्षायै प्रविष्टौ दृष्ट्वा-पस्रुतस्तनी प्रत्युत्थाय हर्षाकुलमब्रवीत्। भगवन्नयमञ्जलिर-नाथो ऽयं जनो ऽनुगृह्यतामस्ति ममैकः स्वप्नः स किं सत्यो नवेति। मयोक्तं फलमस्याद्यैव द्रक्ष्यसीति। यद्येवं बहुभागधे-यमस्या वो दास्याः। स खल्वस्याः सानाथ्यशंसी स्वप्नः। मद्द-र्शनरागबद्धसाध्वसां मञ्जुवादिनीं प्रणमय्य भूयः सा हर्षगर्भ-मब्रूत। तच्चेन्मिथ्या सोयं युष्मदीयो बालकपाली श्वो मया निरोद्धव्य इति मया सस्मितं मञ्जुवादिनीरागदीनदृष्टिलीढ-धैर्य्येणैवमस्त्विति लब्धभैक्षो नालीजङ्घमाकार्य्य[2] निर्गम्य तत-श्च तञ्चानुयान्तं शनैरपृच्छम्। क्वासावल्पायुः प्रथितः प्रचण्ड-वर्म्मेति सो ऽब्रूत राज्यमिदं ममेत्यपास्तशङ्को राजास्थानमण्डप एव तिष्ठत्युपास्यमानः कुशीलवैरिति यद्येवमुद्याने तिष्ठेति तं जरन्तमादिश्य तत्प्राकारैकपार्श्वैकस्याञ्चिच्छून्यमठिकायां मात्राः[3] समवतार्य्य तद्रक्षणनियुक्तराजपुत्रः कृतकुशीलववे-षलीलः प्रचण्डवर्म्माणमेत्यन्वरञ्जयम्। अनुरञ्जितातपे तु समये जनसमा[4]नज्ञानोपयोगी संहृत्य नृत्यगीतनानारुदितादि हस्तचङ्क्रमणमूर्द्धपादालानपादापीडवृश्चिकमकरलङ्घनादीनि

---

[1] The Mahávrata is the same as the Kápálika, the assumption of a mendicant life, in professed imitation of Śiva, and receiving alms in a skull.

[2] "Having called."

[3] "Clothes," मात्राः परिछद इति वैजयन्ती.

[4] B. D. have जनसमाजोपयोगीनि, intended to agree with करणानि, actions or performances suited to the knowledge or taste of an assemblage of people; but it seems, preferably, to be an epithet of the narrator, "I, versed in the knowledge common to the people;" that is, in the various arts of gesticulation, tumbling, and posture-making subsequently named, the character of which may be inferred from the nomenclature.

मत्स्योद्वर्त्तनादीनि च करणानि पुनरादायासन्नवर्त्तिनां छुरिकास्ताभिरुपहितवर्ष्मा चित्रदुःकराणि करणानि श्येनपातोत्क्रोशपातादीनि दर्शयन् विंशतिचापान्तरालावस्थितस्य प्रचण्डवर्म्मणः छुरिकयैकया प्रत्युरसं प्रहृत्य जीवाद्वर्षसहस्रं वसन्तभानुरित्यभिगर्ज्जन् मद्गाचमुत्कर्त्तुमुद्यतासेः कस्यापिचारभटस्य पीवरांसबाहुशिखरमाक्रम्य तावतैव तं विचेतो कुर्व्वन्नाकुलञ्च लोकमुच्चक्षुर्कुर्व्वन् द्विपुरुषोच्छ्रितं प्राकारमत्यलङ्घयम् अवप्लुत्य चोपवने मदनुयातिनामेष पन्था दृश्यत इति ब्रुवाण एव नालीजङ्घसमीकृतसैकतास्पृष्टपादन्यासया तमालवीथ्या चानुप्राकारं प्राचा प्रतिप्रधावितः पुनरवाचोच्चितेष्टकचितत्वादलक्ष्यपातेन प्रद्रुत्य लङ्घितप्राकारवप्रखातवलयस्तस्यां शून्यमठिकायां तूर्णमेव प्रविश्य प्रतिविमुक्तपूर्व्ववेषःसहकुमारेण मत्कर्म्मतुमुलराजद्वारदुःखलब्धवर्त्मा श्मशानोद्देशमभ्यगाम्। प्रागेव तस्मिन् दुर्गागृहे प्रतिमाधिष्ठान एव मया कृतं भग्नपार्श्वस्थैर्य्यस्थूलप्रस्तरस्थगितवाह्यद्वारं विलं। अथ गलति मध्यरात्रे वर्षधरोपनीतमहार्हरत्नभूषणपट्टनिवसनौ तं विलमावां प्रविश्य तूष्णीमतिष्ठाव देवी तु पूर्व्वद्युरेव यथार्थमग्निसंस्कारं मालवाय दत्वा प्रचण्डवर्म्मणे च तामवस्थामश्मकेन्द्रोपधिकृतामेव सन्दिश्योत्तरेद्यु प्रत्युषस्येव पूर्व्वसङ्केतितपौरामात्यसामन्तवृद्धैः सहाभ्येत्य भगवतीमर्च्चयित्वा सर्व्वजनप्रत्यक्षं परीक्षितकुक्षिवैजन्यं तद्भवनं विधाय दत्तदृष्टिः सह जनेन स्थित्वा पटीयांसं पटहशब्दमकारयत्। अणुतरं रन्ध्रप्रविष्टेन तेन नादेनाहं दत्तसञ्ज्ञः शि-

रसैवोत्क्षिप्य सप्रतिमं लोहपादपीठमंसलपुरुषप्रयत्नदुश्चल-मुभयकरविधृतमेकपार्श्वमेकतो निवेश्य निरगमं निरगमयञ्च कुमारं। अथ यथापूर्व्वमर्प्पयित्वा दुर्गामुद्घाटितकपाटः प्रत्यक्षीभूय प्रत्ययहृष्टहष्टिस्पष्टरोमाञ्चमुद्यताञ्जलिरूढविस्मयञ्च प्रणिपतन्तीः प्रकृतीरभ्यधाम्। इत्थं देवी विन्ध्यवासिनी मन्मुखेन युष्मानाज्ञापयति मया सकृपया शार्दूलरूपेण तिरस्कृत्याद्य वो दत्तस्तमेनमद्यप्रभृति मत्पुत्रतयामन्दमातृपक्ष इति परिगृह्णन्तु भवन्तोऽपि च दुर्घटकूटकोटिघटनापाटवप्रकटशाठ्यनिष्ठुराश्मकघटघट्टनात्मानं मां मन्यध्वमस्य रक्षितारं रक्षानिर्वेशश्चास्य स्वसेयं सुभ्रूरभ्यनुज्ञाता मह्यमार्य्ययेति। श्रुत्वैतदहो भाग्यवान् भोजवंशो यस्य त्वमार्य्यादत्तो नाथ इत्यप्रीयन्त प्रकृतयः सा तु वाचामगोचरां हर्षावस्थामस्पृशन्मे श्वश्रूस्तदहरेव च यथावदग्राहयम् मञ्जुवादिनीपाणिपल्लवं। प्रपन्नायाञ्च जामिन्यां सम्यगेव विलं प्रत्यपूरयम्। अलब्धरन्ध्रश्च लोको नष्टमुष्टिचिन्तादिकथनैरभ्युपायान्तरप्रयुक्तैर्दिव्यांशतामेव मम समर्थयमानो मदाज्ञां नात्यवर्त्तत। राजपुत्रस्यार्य्यापुत्र इति प्रभावहेतुः प्रसिद्धिरासीत्। तञ्च गुणवत्यहनि भद्राकृतमुपनाय्य पुरोहितेन पाठयन्नीतिं राजकार्य्याण्यन्वतिष्ठम्। अचिन्तयञ्च राज्यं नाम शक्तित्रयायत्तं शक्तयश्च मन्त्रप्रभावोत्साहाः परस्परानुगृहीताः कृत्येषु क्रमन्ते मन्त्रेण हि विनिश्चयोऽर्थानां प्रभावेन प्रारम्भ उत्साहेन निर्वहणं।

---

[1] "Hire," "recompense."

अतः पञ्चाङ्गमन्त्रमूलो[1] द्विरूपप्रभावस्कन्धश्चतुर्गुणोत्साहविटपो[2][3] द्विसप्ततिप्रकृतिपत्रः[4] षड्गुणकिसलयः[5] शक्तिसिद्धिपुष्प फलश्च नयवनस्पतिर्नेतुरुपकरोतु सचायमनेकाधिकरणत्वादसहायेन दुरुपजीवो यस्त्वयमार्य्यकेतुर्नाम मित्रवर्म्ममन्त्री स कोशलाभिजनत्वात् कुमारमातृपक्षो मन्त्रिगुणैश्चयुक्तस्तन्मतिमवमत्यैव ध्वस्तो मित्रवर्म्मा स चेल्लब्धः पेशलमित्यथ नालीजङ्घं रहस्यशिक्षयम् । तात आर्य्यमार्य्यकेतुमेकान्ते ब्रूहि को न्वेष मायापुरुषो य इमां राज्यलक्ष्मीमनुभवति स चायमस्मद्बालो भुजङ्गेनामुना परिगृहीतः किमुज्जीर्य्येत ग्रस्येत वेति स यद्वदिष्यति तदस्मि बोध्य इति सोऽन्यदेवं मामावेदयत् । मुहुरुपास्य प्राभृतैः प्रवर्त्त्य चित्राः कथाः संवाह्य पाणिपादमतिविश्रम्भदत्तक्षणं तमप्राक्षं त्वदुपदिष्टेन नयेन सोऽप्येवमकथयत् । भद्र मैवं वादीरभिजनस्य शुद्धिदर्शनमसाधारणं बुद्धिनैपुण्यमतिमानुषं प्राणबलमपरिमाणमौदार्य्यमत्याश्चर्य्यमस्त्रकौशलमनल्पं शिल्पज्ञानमनुग्रहार्द्रञ्चेतस्तेजश्चाप्यपरिविषह्यमभ्यमित्रीणमित्यस्मिन्नेव सन्निपातिता

---

[1] The five parts are, "friends, expedients, distinction of place and time, counteraction of evil, success."

[2] Abundance of wealth and abundance of population.

[3] Exertion of mind, speech, body, and action.

[4] The Prakritis are usually considered the constituent parts of a principality, as the prince, the minister, the people, the treasure, the army, &c. In the Amara Kosha eight only are enumerated, or occasionally nine; but in this place allusion is made to foreign princes, and their means of annoyance, as enumerated by Manu, 7. 157.

[5] Six expedients of defence, peace, war, invasion, defence, sowing dissension (between allied enemies), alliance with a more powerful prince.

गुणाः ये ऽन्यत्रैकैकशो ऽपि दुर्लभाः। द्विषतामेष चिरविल्वद्रुमः प्रह्वानां तु चन्दनतरुस्तमुद्धृत्य नीतिज्ञम्मन्यमश्मककमिमञ्च राजपुत्रमनेन पित्र्ये पदे प्रतिष्ठितमेव विद्धि नात्र संशयः कार्य्य इति। तच्चापि श्रुत्वा भूयो भूयश्चोपधाभिर्विशोध्य तं मे मतिसहायमकरवम्। तत्सखञ्च सत्यशौचानमात्यान्विविधव्यञ्जनांश्च गूढपुरुषानुदपादयम्। तेभ्यश्चोपलभ्य लुब्धसमृद्धमत्युत्सिक्तमविधेयप्रायञ्च प्रकृतिमण्डलमलुब्धतामभिव्यख्यापयन् धार्म्मिकत्वमुद्भावयन् नास्तिकान् कदर्थयन् कण्टकान् विशोधयन्नमित्रोपधीरुपघ्नन् चातुर्वर्ण्यञ्च स्वधर्म्मकर्म्मसु स्थापयन्नभिसमाहरेयमर्थोनर्थमूला हि दण्डविशिष्टकर्म्मारम्भाः न चान्यदस्ति पापिष्ठं तत्र दौर्बल्यादित्याकलय्य योगान्नवतिष्ठम् ॥

इति श्री दण्डिना विरचिते दशकुमारचरिते विश्रुतचरितं नाम अष्टम उच्छ्वासः ॥

दशकुमारचरितं समाप्तमिति ॥

ERRATA.

PAGE.	LINE.				
1,	1,	for	पूर्व्वपीटिका	read	पूर्व्वपीठिका
7,	16,	..	वल्लभा	...	वल्लभो
12,	10,	..	कुतूहाकुल	...	कुतूहलाकुल
17,	4,	..	जनदर्ल्लभ	...	जनदुर्ल्लभ
25,	9,	..	भूसुरान्	...	भूसुराद्
..	18,	..	ऽहंमिदं	...	ऽहमिदं
26,	1,	..	गणस्प	...	गणस्य
..	14,	..	सङ्कः	...	शङ्कः
30,	13,	..	स्थापपम्	...	स्थापयम्
32,	7,	..	प्रवलतया	...	प्रवलतया
33,	2,	..	निर्गमिष्पति	...	निर्गमिष्यति
..	13,	..	निर्गमिष्पामी	...	निर्गमिष्यामी
44,	12,	..	माधुर्य्ये	...	माधुर्य्ये
45,	11,	..	नामधेयोहम्	...	नामधेयोऽहम्
57,	19,	..	हृवद्य	...	हृशद्य
58,	1,	..	देवमप	...	देवमुप
62,	12,	..	देवकल्पाणि	...	देवकल्याणि
67,	8,	delete	मा		
70,	1,	for	प्रलोम	...	प्रलोभ
76,	6,	..	वास्तं	...	वात्सं
82,	10,	..	धममित्र	...	धनमित्र
84,	9,	..	रागमञ्जगरि	...	रागमञ्जरि
86,	16,	..	भूपः	...	भूयः

PAGE.	LINE.				
88,	6,	for	अत्रस्थ	read	अवस्थ
..	10,	..	कन्यार्थामत्य	...	कन्यार्थमित्य
..	11,	..	अम्नि	...	अग्नि
89,	3,	..	भेत्स्यन्ती	...	भेत्स्यती
90,	3,	..	असिधेत्व	...	असिधेन्वा
92,	8,	..	वन्दन	...	वन्धन
98,	7,	..	कच्चिदुप	...	कथच्चिदुप
99,	2,	..	उत्तारायितुं	...	उत्तारयितुं
102,	11,	..	नष्टापत्यां	...	नष्टापत्या
103,	1,	..	भिरलभ	...	भिरलम
105,	14,	..	कुरगड	...	कुरूगड
152,	17,	..	श्वभ्य	...	श्वभ्यः
156,	2,	..	मुरव	...	मुख
158,	10,	..	कस्मिश्चित्	...	कस्मिंश्चित्
164,	15,	..	उल्लिखत	...	उल्लिखित
172,	10,	..	जनस्यास्थ	...	जनस्यास्य
173,	16,	..	निष्कलक	...	निष्कलङ्क
178,	18,	..	ञ्जिलि	...	ञ्जलि
179,	2,	..	कात्स्येन	...	जत्स्न्येंन
182,	23,	..	जानीयर्	...	जातीयर्
183,	8,	..	मौख्य	...	मौर्ख्ये
187,	2,	..	तन्तावायेन	...	तन्तावापेन
195,	7,	..	दूरसपसरभ्	...	दूरसपासरम्

LONDON:

PRINTED BY WILLIAM WATTS,
Crown Court, Temple Bar.

SOCIETY

FOR THE

PUBLICATION OF ORIENTAL TEXTS.

THE Students of Oriental Literature have always had much cause to regret the existence of many circumstances which tend to embarrass and retard the prosecution of their researches. To enable them to carry out their investigations to any considerable extent, they have necessarily been compelled to have recourse to Works existing only in Manuscript, of which copies are always difficult to be procured. Even when any of the more celebrated Works have been brought to Europe, they are generally to be found only in some of the Public Libraries; and are therefore inaccessible to Scholars at a distance, without inconvenience, delay, and expense. The state of inaccuracy in which they are commonly met with, renders the collation of several copies of the same Work indispensable; and much cost and labour will always be required to make such collation.

The sole remedy for these disadvantages is, manifestly, to multiply, by means of the Press, the principal Standard Works in the different Languages of the East; so that correct copies of them may be easily procurable, by all those whose labours may have been directed to this important branch of Literature. As, however, the number of persons who devote themselves to Oriental Studies is but small, the circulation of Eastern Works, even when printed, must, for some time at least, be too limited for their sale to reimburse the Publishers; nor can it be expected that individuals will often be met with, able or willing to undertake the outlay.

It has been resolved, therefore, by some of the friends of Oriental Literature in Great Britain, to endeavour to raise a Fund, from which assistance may be afforded for the publication of Standard Eastern Works: and they take this opportunity of inviting all the friends of Oriental Literature—and, indeed, of Literature in general, both at Home and on the Continent—to co-operate in a design, which, if successful, cannot fail to be of the utmost importance, in all extended Philosophical, Historical, and Philological inquiries.

The object therefore which this Society proposes to itself, is, to enable Learned Orientalists to print Standard Works, in the Syriac, Arabic, Persian, Turkish, Sanscrit, Chinese, and other Languages of the East, by defraying, either wholly or in part, the cost of such printing and publication.

In order to raise a Fund for this purpose, the Members will pay a Subscription of Two Guineas per annum: for which they will be entitled to a large-paper copy of each book published by the aid of this Fund.

The affairs of the Society will be managed by a President, Vice-Presidents, and a Committee, chosen from the Members, to whom the details of its operations will be entrusted.

DONATIONS TO THE SOCIETY.	£	s.	d.
The Right Hon. the Earl of Munster	10	10	0
The Right Hon. Sir Gore Ouseley, Bart	5	0	0
The Right Hon. W. E. Gladstone, Esq. M.P. . .	5	0	0
Nathaniel Bland, Esq.	10	10	0
Ram Komol Shen, Esq., Cashier of the Bank of Calcutta, Bengal, 200 Rupees	20	0	0
John Bardoe Elliott, Esq. of the Bengal Civil Service	100	0	0

Patron,

HER MOST GRACIOUS MAJESTY THE QUEEN.

Vice-Patron,

HIS ROYAL HIGHNESS THE PRINCE ALBERT.

OFFICERS AND COMMITTEE.

President,

Horace Hayman Wilson, Esq. M.A. F.R.S. M.R.A.S. Ph.D. Boden Professor of Sanscrit in the University of Oxford.

Vice-Presidents:

The Right Honourable the Earl of Powis, D.C.L. M.R.A.S.

The Right Honourable the Lord Prudhoe, D.C.L. F.R.S. F.S.A.

The Honourable Mountstuart Elphinstone, D.C.L. M.R.A.S.

Sir George Thomas Staunton, Bart. D.C.L. M.P. F.R.S. F.S.A. V.P.R.A.S.

Nathaniel Bland, Esq. M.A. M.R.A.S.

Treasurer,

William H. Morley, Esq.

Honorary Secretary,

The Rev. William Cureton, M.A. F.R.S.

Committee:

Nathaniel Bland, Esq. M.A. M.R.A.S.

Beriah Botfield, Esq. M.P. M.A. F.R.S. F.S.A. M.R.A.S.

The Rev. William Cureton, M.A. F.R.S.

William Erskine, Esq. M.R.A.S.

Forbes Falconer, Esq. M.A. M.R.A.S. Professor of Oriental Languages in University College, London.

Duncan Forbes, Esq. M.A. M.R.A.S. Professor of Oriental Languages in King's College, London.

M. P. de Gayangos.

The Rev. T. Jarrett, M.A. Professor of Arabic in the University of Cambridge.

Francis Johnson, Esq. Oriental Professor at the East-India College, Haileybury.

Edward William Lane, Esq.

The Rev. Samuel Lee, D.D. M.R.A.S. Regius Professor of Hebrew in the University of Cambridge.

John Lee, Esq. LL.D. F.S.A. Treas. R.A.S.

John David M'Bride, D.C.L. Lord Almoner's Reader of Arabic in the University of Oxford.

Colonel William Miles, M.R.A.S.

The Rev. William H. Mill, D.D. M.R.A.S. late Principal of Bishop's College, Calcutta.

Mírzá Muhammad Ibráhím, late Oriental Professor at the East-India College, Haileybury.

William H. Morley, Esq.

William Oliver, Esq. M.R.A.S.

The Rev. Edward B. Pusey, D.D. Regius Professor of Hebrew in the University of Oxford.

The Rev. Stephen Reay, M.A. Laudian Professor of Arabic in the University of Oxford.

The Rev. G. Cecil Renouard, B.D. M.R.A.S. late Professor of Arabic in the University of Cambridge.

The Rev. James Reynolds, M.A. M.R.A.S.

The Venerable Archdeacon Robinson, D.D.

John Shakespear, Esq. M.R.A.S. late Oriental Professor at the East-India College, Addiscombe.

W. S. W. Vaux, Esq. M.A.

LIST OF SUBSCRIBERS.

HER MOST GRACIOUS MAJESTY THE QUEEN.

HIS ROYAL HIGHNESS THE PRINCE ALBERT.

His Grace the Duke of Northumberland, K.G. LL.D. F.R.S. F.S.A. F.L.S. F.G.S.

The Right Honourable the Earl Powis, D.C.L. M.R.A.S.

The Right Honourable Lord Prudhoe, D.C.L. F.R.S. F.S.A.

The Count Miniscalchi of Verona.

The Honourable Robert Clive.

The Honourable Mountstuart Elphinstone, D.C.L. M.R.A.S.

Sir George Thomas Staunton, Bart. D.C.L. M.P. F.R.S. F.S.A. V.P.R.A.S.

The Honourable the Court of Directors of the East-India Company (5 Subs.)

The Imperial Academy of Sciences of St. Petersburg (2 Subs.)

The Imperial Academy of Vienna.

The Library of the University of Göttingen.

The Library of the University of Tubingen.

The Library of Exeter College, Oxford.

Henry John Baxter, Esq. M.R.A.S.

Nathaniel Bland, Esq. M.A. M.R.A.S.

Beriah Botfield, Esq. M.P. M.A. F.R.S. M.R.A.S.

Richard Burton, Esq.

E. B. Cowel, Esq.

The Rev. William Cureton, M.A. F.R.S.

Professor Dozy, Ph.D., Leyden.

J. B. Elliott, Esq.

William Erskine, Esq. M.R.A.S.

Forbes Falconer, Esq. M.A.
Duncan Forbes, Esq. M.A. M.R.A.S.
Rev. W. Garnett, M.A.
M. P. de Gayangos.
William Alexander Greenhill, Esq. M.D.
Edwin Guest, Esq. M.A.
George B. Hart, Esq.
Rev. George Hunt, M.A.
The Rev. Thomas Jarrett, M.A.
Francis Johnson, Esq.
Professor Juynboll, Leyden.
Edward William Lane, Esq.
Professor Christian Lassen, Bonn.
The Rev. Samuel Lee, D.D. M.R.A.S.
John Lee, Esq. LL.D. F.S.A. Treas. R.A.S.
John David M'Bride, D.C.L.
The Rev. S. C. Malan, M.A. M.R.A.S.
The Rev. William H. Mill, D.D. M.R.A.S.
Mírzá Muhammad Ibráhím.
George Morgan, Esq.
William H. Morley, Esq.
C. T. Newton, Esq. M.A.
John Nicholson, Esq. M.A. Ph.D.
William Oliver, Esq. M.R.A.S.
Sir Thomas Phillips, Bart.
Louis Hayes Petit, Esq. M.A. F.R.S. F.S.A. M.R.A.S.
Dr. Pijnappel, Leyden.
The Rev. Edward B. Pusey, D.D.
The Rev. Stephen Reay, M.A.
M. Reinaud, Membre de l'Institut, Paris.
The Rev. G. Cecil Renouard, B.D. M.R.A.S.
The Rev. James Reynolds, M.A. M.R.A.S.
Frederick Ricardo, Esq.
The Venerable Archdeacon Robinson, D.D.
John Scott, Esq. M.D.
John Shakespear, Esq. M.R.A.S.
George Smith, Esq.
Colonel Taylor.
Professor Tennant.
John N. Tomkins, Esq.
W. S. W. Vaux, Esq. M.A.
John W. Willcock, Esq.
H. J. Williams, Esq.
Horace Hayman Wilson, Esq. M.A. F.R.S. M.R.A.S. Ph.D.
Professor Ferdinand Wüstenfeld, Göttingen.

ALREADY PUBLISHED:

SYRIAC.

ܟܬܒܐ ܕܐܘܣܒܝܘܣ ܩܣܪܝܐ ܕܥܠ ܕܢܚܐ ܐܠܗܝܐ.

"Theophania, or Divine Manifestation of Our Lord and Saviour Jesus Christ," by EUSEBIUS, Bishop of Cæsarea.

EDITED, FROM AN ANCIENT MANUSCRIPT RECENTLY DISCOVERED,

By PROFESSOR SAMUEL LEE, D.D.

Price 15*s*.

[The Original Greek of this Work is lost.]

ARABIC.

كتاب الملل والنحل "Book of Religious and Philosophical Sects."
By MUHAMMAD AL-SHAHRASTÁNÍ. PARTS I., *Price* 12*s*., and II., *Price* 18*s*.: Complete.
Edited by the Rev. WILLIAM CURETON.

كتاب تهذيب الاسما "Biographical Dictionary of Illustrious Men, chiefly at the Beginning of Islamism." PARTS I.—VIII.
By YAHYA AL-NAWAWI.
Edited by DR. FERDINAND WÜSTENFELD.

عمدة عقيدة اهل السنّة والجماعة

"Pillar of the Creed of the Sunnites:"
being a Brief Exposition of their Principal Tenets,
By HÁFIDH-AL-DÍN ABÚ'L-BARAKÁT ABD-ALLAH AL-NASAFI.
To which is subjoined, A shorter Treatise of a similar Nature,
By NAJM-AL-DÍN ABÚ HAFS UMAR AL-NASAFI.
Edited by the Rev. WILLIAM CURETON.
Price 5*s*.

SANSCRIT.

सामवेदसंहिता "The Samá-veda."
Edited by the Rev. G. STEVENSON: printed under the Superintendence of Professor H. H. WILSON.
Price 12*s*.

दशकुमारचरितं "The Daśa Kumára Charita."
Edited by Professor H. H. WILSON.
Price 15*s*.

PERSIAN.

مخزن الاسرار "The Treasury of Secrets."
By SHAIKH NIZÁMÍ of Ganjah.
PART I. containing the Text.
Edited by N. BLAND, Esq.
Price 10*s*. 6*d*.

IN THE PRESS:

SYRIAC.

"Analecta Biographica Syriacc: or, Lives of Eminent Bishops and others, illustrative of the History of the Church in the East during the 4th, 5th, and 6th Centuries."
Edited by the Rev. W. CURETON.

ARABIC.

The Historical Work of AL-MARRÁKISHI, entitled
المعجب في تلخيص اخبار المغرب
Edited by M. REINHART DOZY, Ph.D.

PERSIAN.

يوسف و زليخا "Yúsuf and Zulaikhá," by FIRDAUSÍ.
Edited by WILLIAM H. MORLEY, Esq.

سحر حلال "Lawful Magic," and شمع و پروانه "The Taper and Moth."
By MAULANA AHLÍ of Shíráz.
Edited by N. BLAND, Esq.

تحفة الاحرار "The Gift of the Noble,"
The first Poem of the Heft Aurang of MULLA ABD-AL-RAHMAN JÁMÍ.
Edited by Professor FORBES FALCONER.

PART II. of the "Makhzan Al-Asrár" of Nizámí, containing the Persian Commentary and Variants.

SANSCRIT.

यजुर्वेदसंहिता "The Prayers and Hymns of the Yajur-veda."
Edited by the Rev. W. H. MILL, D.D.

THE FOLLOWING WORKS ARE IN PREPARATION FOR THE PRESS.

SYRIAC.

THE CHRONICLE OF ELIAS OF NISIBIS.

Edited by the Rev. WILLIAM CURETON.

ARABIC.

الجامع الصغير The most authentic Muhammadan Traditions, collected and arranged, in Alphabetical Order, by JALÁL-AL-DÍN ABD-AL-RAHMÁN AL-SUYÚTI.

Edited by the Rev. W. CURETON.

PERSIAN.

تاريخ الهند والسند "A History of India," from the جامع التواريخ of RASHÍD AL-DÍN.

Edited by WILLIAM H. MORLEY, Esq.

حديقة سنائي "The Hadicah, or Garden," of Hakím Senái.

Edited by Professor DUNCAN FORBES.

سكندر نامه "The Sikander Nameh" of Nizámi.

Edited by NATHANIEL BLAND, Esq.

*** All Communications addressed to the Committee, or the Honorary Secretary, the Rev. W. CURETON, at the House of the Royal Asiatic Society of Great Britain and Ireland, will be promptly attended to.

It is requested, that Individuals, or Institutions, who are willing to subscribe to the Society for the Publication of Oriental Texts, or to further its objects by Donations, will send their names, addressed to the Treasurer, "WILLIAM H. MORLEY, Esq. 15, Serle Street, Lincoln's Inn, London," and to inform him where their Subscriptions or Donations will be paid.

SUBSCRIBERS *are requested to apply for the Works published by the Society to* MR. MADDEN, *Oriental Bookseller, No.* 8, *Leadenhall Street.*

WILLIAM WATTS, PRINTER, CROWN COURT, TEMPLE BAR.